१५७ विष्णोरेव सर्ववेदप्रतिपाद्यता ।

१५८ विष्णोरेव सर्वोत्तमत्वं पूर्वमीमांसकानामपि संमतम् ।

१५९ विष्णोः सर्वोत्तमत्वे शैवाद्यागमविरोधस्य अकिञ्चित्करता ।

१६० दीक्षणीयाया देवतापरिग्रहार्थत्वानुपपत्तिः ।

१६१ 'अग्निर्वै देवानां' इत्यस्य स्तावकत्वेऽपि विष्णोः सर्वोत्तमत्वसिद्धिः ।

१६२ अत्र प्रतीयमाने अवमत्वपरमत्वे प्राथम्यान्तिमत्वरूपे इति मतस्य दूषणम् ।

प्रकरणसंख्या

१६३ क्वचिदुत्तमपदस्य अन्तिमे प्रयोगः गौणः ।

१६४ तस्य अन्तिमे मुख्यवृत्तावपि विष्णोः सर्वोत्तमत्वाहानिः ।

१६५ विष्णुसर्वोत्तमत्वोपसंहारः ।

१६६ विष्ण्वादिपदानां शिवपरत्वशंकानिरासः ।

१६७ शिवादिशब्दानां विष्णुपरता ।

१६८ रुद्रादिपदानां रूढिबाधकसंभवादिना जगत्कारणत्वादिन नारायणस्यैव श्रुत्यादिप्रतिपाद्यतोपसंहारः ।

॥ स्मृतिपरिच्छेदः ॥

१६९ स्मृतिविचारस्य सार्थक्यसम्पादनम् ।

१७० मात्स्यपुराणाद्यवष्टम्भेन शिवस्य पारम्याशंकनम् ।

१७१ शैवागमस्य प्रामाण्यानिर्णयः ।

१७२ प्रलयेऽवस्थितस्य नारायणत्वमेव ।

१७३ पञ्चरात्रस्य प्रामाण्यनिर्वहणम् ।

१७४ भारतस्य विष्णोरेव सर्वोत्तमत्वे तात्पर्यम् ।

१७५ भारते आपाततोऽपि परमशिवस्य जगत्कारणत्वं न प्रतीयते ।

१७६ मानववचनस्य सैद्धान्तिकं व्याख्यानम् ।

१७७ शैवागमानामप्रामाण्यं भारतसंमतम् ।

१७८ शिवात् विष्णोरुत्तमत्वे भागवतसंमतिः ।

१७९ आदित्यपुराणमपि शिवसर्वोत्तमत्वं नालम्बते ।

१८० रामायणं विष्णोः शिवादुत्तमत्वं आलम्बते ।

१८१ गीतायाः विष्णोरेव सर्वोत्तमत्वे निर्भरः ।

प्रकरणसंख्या

१८२ गीतायाः शिवविषयकत्वाशङ्कानिरासः ।

॥ युक्तिपरिच्छेदः ॥

१८३ परमशिवोत्कर्षस्य सत्यत्वे जगत्सत्यत्वाद्यापत्तिः ।

१८४ शैवागमसिद्धोत्कर्षस्य नरविषाणायमानता ।

१८५ तस्य मिथ्यात्वे शैवागमाप्रामाण्याद्यापादनम् ।

१८६ परमशिवोत्कर्षप्रतिभासस्य दुर्लभत्वम् ।

१८७ परमशिवस्य परमाज्ञत्वापातः ।

१८८ परमशिवस्य बन्धमोक्षसदसद्भावपक्षयोः दोषाविष्कारः ।

१८९ परमशिवोत्कर्षस्य बाध्यत्वे अनुपपत्तिप्रदर्शनम् ।

१९० शैवागमानां मिथो व्याघातः ।

१९१ परमशिवोत्कर्षस्य अबाध्यत्वपक्षनिरासः ।

१९२ परमशिवोत्कर्षबाधकानुमानानि ।

१९३ विष्णुसर्वोत्कर्षसाधकानुमानानि ।

१९४ विष्णोरेव सर्वोत्तमत्वमिति निगमनम् ।

॥ श्रीविष्णुतत्त्वदीपिकोदाहृतप्रमाणाकरसूची ॥

१. अथर्वशिखोपनिषत्

		प्रकरणसंख्या	खण्डः
1	ओमित्येतदक्षरं	24 etc	1
2	कारणं तु ध्येयः	141	3
3	किमादौ प्रयुक्तं	146	1
4	ध्याता रुद्रः	24	3
5	ध्यायीतेशानं	134 etc	,,
6	प्राणं मनसि सह	24 etc	,,
7	ब्रह्मविष्णुरुद्रेन्द्राः	135 etc	,,
8	भगवन्किमादौ	24 etc	1
9	सर्वमिदं ब्रह्म	147	3

२. अथर्वशिर उपनिषत्

			खण्डः
10	अहमेकः प्रथमं	3 etc	1
11	एको रुद्रो न द्वितीयाय	137	5
12	ततो देवा रुद्रं	7 etc	1
13	दिशश्च	57	,,
14	देवा ह वै स्वर्गं लोकं	4 etc	,,

15	नान्यः कश्चिन्मत्तः	8	etc	1
16	विश्वतश्चक्षुरुत	,,	,,	—
17	सत्येन सत्यं	7		1
18	सोऽन्तरात्	57	etc	,,

३. अनुव्याख्यानम्

				अ.	पा.	अ.
19	विद्वद्रूढिर्वैदिका स्यात्	52	etc	1	1	6
20	स्वातन्त्र्यं तद्गतत्वञ्च	48		1	4	1

४. अमरकोशः

				काण्डः	वर्गः	श्लोकः
21	ईश्वरः शर्व ईशानः	13	etc	1	1	30
22	एके मुख्यान्यकेवलाः	54	etc	3	3	16
23	पुरुषात्मात्ममानवौ	15	etc	3	3	219
24	लक्ष्मीः पद्मालया पद्मा	104		1	1	27
25	विष्णुर्नारायणः कृष्णः	168		1	1	18

५. आथर्वणो(मुण्डको)पनिषत्

			मुण्डकं	खण्डः	मन्त्रः
26	अक्षरात्संभवतीह	34	1	1	7
27	तपसा चीयते ब्रह्म	11	1	1	8
28	यथा सुदीप्तात्पावकात्	,,	2	1	1

६. आदित्यपुराणम्

29	तस्यैव मूर्तयस्तिस्रः	7 etc

७. आयुष्यसूक्तम्

30	एकः पुरस्ताद्य इदं	25 etc
31	श्रियं लक्ष्मीमौपलां	17 etc

८. ऋग्वेदसंहिता

				अष्टकः	अध्यायः	वर्गः	मन्त्रः
32	अग्निर्मूर्धा दिवः ककुत्	17		6	3	39	1
33	अजस्य नाभावध्येकं	42		8	3	17	6
34	अस्य देवस्य मीळ्हुषः	74	etc	5	4	7	5
35	अहं मनुरभवं	4		3	6	15	1
36	अहं रुद्राय धनुः	35	etc	8	7	14	1
37	इन्द्रो यातोऽवसितस्य	36		1	2	38	5
38	देवांश्च याभिर्यजते	78		4	6	25	3
39	धियो यो नः प्रचोदयात्	11		3	4	10	5
40	न ऋते त्वत्क्रियते	111		8	6	13	4
41	नकिरिन्द्र त्वदुत्तरः	35	etc	3	6	19	1
42	नासदासीन्नो सत्	9	etc	8	7	17	1
43	नि षु सीद गणपते	171		8	6	13	4
44	परो दिवा पर एना	43		8	3	17	5

45	परो मात्रया तन्वा	158		5	6	24	1
46	यो देवानां नामधाः	42	etc	8	3	17	3
47	यं कामये तं तं	35	etc	8	7	11	5
48	विश्वतश्चक्षुरुत	42		8	3	16	3
49	विश्वस्मादिन्द्र उत्तरः	36		8	4	1	1
50	विष्णुरित्था परमं	150		7	5	29	3
51	सूर्य आत्मा जगतः	36		1	8	7	1
52	सोमः पवते जनिता	61	etc	7	4	6	5
53	हिरण्यगर्भः समवर्तत	36	etc	8	7	3	1

९. ऐतरेयब्राह्मणम्

				पञ्चिका	अध्यायः	खण्डः
54	अग्निर्मुखं प्रथमः	36		1	1	4
55	अग्निर्वै देवानां	158	etc	1	1	1
56	अग्निः सर्वा देवताः	36		2	1	3
57	तदन्तरेण सर्वाः	160		1	1	1
58	त्रयो वर्णा अजायन्त	131		5	5	7

१०. ऐतरेयोपानिषत्

				आरण्यकं	अध्यायः	खण्डः
59	अकारो वै सर्वा वाक्	23	etc	2	3	6
60	अथातो विभूतयः	34	etc	2	1	7

61	अयं पितै ते पुत्राः	101		2	1	8
62	अः इति ब्रह्म	127		2	3	8
63	आत्मानं परस्मै	40		3	2	3
64	आत्मा वा इदमेकः	,,		2	4	1
65	आपा इत्यापः	148		2	1	8
66	एतमेव ब्रह्मेत्याचक्षते	29	etc	3	2	3
67	एतं ह्येव बहृवृचाः	40		,,	,,	,,
68	एवमेते श्रोत्रं	98		2	1	7
69	एष इमं लोकं	24	etc	2	2	1
70	एष पन्था एतत्कर्म	,,		2	1	1
71	एष वा अक्षरं	46		2	2	2
72	णकारो बलं	40		3	2	6
73	तदिति वा एतस्य	33	etc			
74	तमिदन्द्रं सन्तं	40		2	4	8
75	तस्माच्छतर्चिनः	34		2	2	1
76	तस्मादक्षरं	80	etc	2	2	2
77	ता एता देवताः सृष्टाः	40	etc	2	4	2
78	ता वा एताः सर्वा ऋचः	34	etc	2	2	2
79	यत्र ह क्व च	175		2	1	8
80	वाग्वै माता प्राणः पुत्रः	61	etc	3	1	6
81	विश्वामित्रं ह्येतत	46		2	2	3

82	श्रोत्रेण सृष्टाः	93	2	1	7
83	स ईक्षत लोकान्नु	11	2	4	1
84	सर्वे वेदाः सर्वे घोषाः	127	2	2	2
85	सर्वेषां भूतानां	92	3	2	4

११. कल्पसूत्राणि

86	अथ नारायणाभ्यां	110	
87	पुरुषेण नारायणेन	,,	
88	स्योनं ते सदनं	155	आ. श्रौ. 2—10

१२. काठकोपनिषत्

			अध्यायः	वल्ली	मन्त्रः
89	अङ्गुष्ठमात्रः पुरुषः	13 etc	2	1	13
90	अव्यक्तात्पुरुषः	91	1	3	11
91	ईशानो भूतभव्यस्य	91	2	1	13
92	एतद्ध्येवाक्षरं	81 etc	1	2	16
93	तदेव शुक्रं	39	2	2	8
94	तद्विष्णोः परमं पदं	,, etc	1	3	9
95	पुरुषान्न परं	,,	1	3	11
96	मध्ये वामनमासीनं	91 etc	2	2	3
97	सर्वे वेदा यत्पदं	87 etc	1	2	15
98	स्वर्गे लोके न भयं	55		1	11

१३. कालाग्निरुद्रोपनिषत्

99	तस्य प्रजापतेः	7 etc

१४. कूर्मपुराणम्

100	ज्ञानं तदैश्वरं दिव्यं	182

१५. कृष्णयजुर्वेदब्राह्मणम्

			अष्टकं	प्रश्नः	दशिनी
101	अग्निरग्रे प्रथमः	36 etc	2	4	23
102	इदं वा अग्रे	151	2	2	50
103	तस्मिन्त्सीदामृते	155	3	7	44
104	परोक्षप्रिया इव	83	2	3	47
105	यज्ञो वै विष्णुः	149	3	3	37

१६. कृष्णयजुर्वेदसंहिता

			काण्डः	प्रश्नः	पञ्चाशत्
106	अग्निहोत्रं जुहोति	159	1	5	36
107	त्रिः प्रथमामन्वाह	162	2	5	39
108	नमस्ते रुद्र	60	4	5	1
109	यदाग्नेयोऽष्टाकपालः	21	2	6	16
110	राजानौ वा एतौ देवतानां	36	2	6	8
111	सोमारौद्रं चरुं	51	2	2	55

112	सोमो वै रेतोधाः	51	2	2	55

१७. कैवल्यश्रुतिः

			खण्डः	मन्त्रः
113	उमासहायं परमेश्वरं	12	1	7
114	ज्ञात्वा तं मृत्युमत्येति	,,	1	9

१८. गारुडम्

				अ	पा	सू
115	सिसृक्षोः परमाद्विष्णोः	146	(श्रीमद्भाष्यम्)	1	1	1

१९. चतुर्वेदशिखा

				अ	पा	सू
116	सहस्रशीर्षा पुरुषः	113	(श्रीमद्भाष्यम्)	1	2	26

२०. छान्दोग्योपनिषत्

			अध्यायः	खण्डः	भागः
117	आकाशादेव	105	1	9	1
118	एकमेवाद्वितीयं	137	6	2	1
119	ओमित्येतदक्षरं	127	1	1	1
120	कुतस्तु खलु सोम्य	151	6	2	2
121	तदैक्षत बहु स्यां	11	6	2	3
122	तद्धैक आहुः	151	6	2	1

123 सदेव सोम्येदं	3 etc	6	2	1
124 सर्वं खल्विदं ब्रह्म	159	3	14	1

२१. जैमिनीयसूत्राणि

		अध्यायः	पादः	सूत्रम्
125 ग्रहणार्थञ्च	158	12	1	25
126 छागो वा मन्त्रवर्णात्	120	6	8	31
127 ततश्चावचनं	18	9	1	37
128 यस्मिन्गुणोपदेशः	52	1	4	3
129 वचनात्त्वयथार्थं	18	8	2	3
130 विरोधे त्वनपेक्षं	169	1	3	3
131 सन्दिग्धे तु वाक्यशेषात्	50 etc	1	4	24

२२. तत्त्वप्रकाशिका

		अ	पा	सू
132 विश्वो वायुः	148	1	2	23

२३. तत्त्वप्रकाशिकोदाहृतप्रमाणम्

		अ.	पा.	सू.
133 अथ कस्मादुच्यते	29 etc	1	1	1
134 गुरोर्नाम न गृह्णीयात्	35	,,	,,	,,

२४. ताण्ड्यमहाब्राह्मणम्

		अध्यायः	खण्डः	भागः
135 (अ)आपो वा ऋत्वियं	16	7	8	1

136 पञ्चदशान्याज्यानि	52	20	1	1

२५. तैत्तिरीयोपनिषत्

			वल्ली	अनुवाकः
137 असद्वा इदमग्रे	139	etc	2	7
138 आत्मन आकाशः	162		2	1
139 ओमिति ब्रह्म	127	etc	1	8
140 तद्विजिज्ञासस्व	28	etc	3	1
141 यतो वा इमानि भूतानि	2	etc	,,	,,
142 सोऽकामयत	11	etc	2	6

२६. नारायणश्रुतिः

143 अहंनामा हरिर्नित्यम	57	(विष्णुतत्त्वनिर्णयः	1–प
144 परोक्षत्वात्स इत्यपि	,,	,,	,,

२७. नारायणाथर्वशिरउपनिषत्

			भागः
145 नारायणाद्ब्रह्मा	44	etc	1
146 नारायणाद्रुद्रः	135	etc	1
147 पुरुषो ह वै	15	etc	1

२८. नारायणोपनिषत्

		दशिनी
148 अणोरणीयान्	126	26

149	अन्तर्बहिश्च	57		30
150	अम्भस्यपारे	129		1
151	आत्मा नारायणः	126	etc	29
152	ईशानः सर्व	155		38
153	उद्धृतासि	132		8
154	ऋतꣳ सत्यं परं ब्रह्म	154		40
155	एतद्वै महोपनिषदं	132		99
156	कामोऽकार्षीत्	48	etc	78
157	तदेव ब्रह्म	29	etc	2
158	तदेवर्तं	154		,,
159	तदेवाग्निस्तद्वायुः	47	etc	,,
160	तस्याः शिखायाः	145		30
161	त्वया हतेन	129		9
162	धातुः प्रसादात्	23	etc	26
163	नारायणपरं ब्रह्म	30	etc	29
164	नारायणं महाज्ञेयं	,,		,,
165	परमः स्वराट्	48		30
166	प्राणानां ग्रन्थिः	83	etc	94
167	ब्रह्महत्यां वा एते	132		55
168	मृत्तिके देहि	,,		8

169 मृत्तिके ब्रह्मदत्ता	132		8
170 मृत्तिके हन	48	etc	,,
171 यच्च किञ्चिज्जगत्	30		29
172 यमन्तः समुद्रे	33	etc	1
173 यद्वेदादौ	23	etc	28
174 यो देवानां प्रथमं	21	etc	,,
175 विश्वाधिको रुद्रः	23	etc	,,
176 विष्णुमुखा वै	129	etc	10
177 स ब्रह्म स शिवः	130	etc	30
178 सहस्रशीर्षं देवम्	90	etc	29

२९. नीलग्रीवश्रुतिः

अ पा अ

179 ऋतं सत्यं परं ब्रह्म 156 (अनुव्याख्यानम्) 1 1 6

३०. नृसिंहतापनीयोपनिषत्

180 ऋतꣳ सत्यं परं ब्रह्म 156 (पूर्वतापिनी) 1 6

181 मात्रामात्राः प्रतिमात्राः 23 etc (उत्तरतापिनी) खण्डः २

३१. नृसिंहपुराणम्

182 स एष वासुदेवोऽयं 16 etc

३२. न्यायसुधोदाहृतं प्रमाणम्

पुटम्

183 सवत्यनोकृतं ब्रह्म 127 10

184 ओङ्कारेण सर्वा वाक्   23 15

३३. परमश्रुतिः

			अ	श्लो
185 देशतः कालतश्चैव	166	(गीतातात्पर्यम्)	2	17
186 प्रादुर्भावो हरेर्जनिः	149	(विष्णुतत्त्वनिर्णयः)	प	2
187 ब्रह्मा शिवः सुराद्याश्च	82	,,		,,

३४. परमोपनिषत्

188 आततत्वाच्च मातृत्वात	45	(विष्णुतत्त्वनिर्णयः)	प	1
189 सत्यस्य सत्यम्	154	,,		,,

३५. पाणिनीयधातुपाठः

190 विष्लृ व्याप्तौ   40 etc   1095

३६. पाणिनीयसूत्राणि

		अ	पा	सू
191 विप्रसंभ्यो ड्वसंज्ञायाम	142	3	2	180
192 सुपां सुलुक्	32	7	1	39

३७. पुराणम्

193 एवं तिसृभिरेवैतत   23

३८. पुरुषसूक्तम्

194 अहोरात्रे पार्श्वे   17 etc

195	उतामृतत्वस्य	13 etc
196	चन्द्रमा मनसः	98
197	दिशः श्रोत्रात्	97
198	पद्भ्यां शूद्रः	90
199	पुरुष एवेदं	,,
200	पुरुषं पशुं	,,
201	मुखादिन्द्रश्च	97
202	श्रीश्च ते लक्ष्मीश्च	17
203	सहस्रशीर्षा	90
204	ह्रीश्च ते	17 etc

३९. पूर्वमीमांसोदाहृतवचनानि

			अध्यायः	पादः	अधिकरणम्
205	अक्ताः शर्कराः	50	1	4	19
206	अग्नेर्ऋग्वेदः	99 etc	3	3	1
207	आज्यैः स्तुवते	52 etc	1	4	3
208	उच्चैर्ऋचा क्रियते	53	3	3	1
209	एकादश वै पशोः	10	10	7	18
210	एका देया	152	6	7	10
211	एतया निषादस्थपतिं	32	6	1	12
212	ऐन्द्र्या गार्हपत्यं	107 etc	3	2	2

213	औदुम्बरी वा सर्वा	169	1	3	2
214	औदुम्बरीं स्पृष्ट्वा	,,	,,	,,	,,
215	छागस्य वपायाः	120	6	8	9
216	जामि वा एतद्यज्ञस्य	31	2	2	4
217	तस्मादुच्चैर्ऋचा	99	3	3	1
218	दध्ना जुहोति	159	2	2	10
219	दीक्षाः सोमस्य	158	3	7	5
220	पशुना यजेत	120	4	1	5
221	पृष्ठैरुपतिष्ठते	16	7	3	12
222	यदाजिमीयुः	52	1	4	3
223	यद्यपि चतुरवत्ती	10	10	7	18
224	यस्योभयं हविः	78	2	1	7
225	शूर्पेण जुहोति	160	1	2	3
226	सोमेन यजेत	52	1	4	1

४०. पैङ्गिश्रुतिः

227 मूर्तं सदिति संप्रोक्तं 151 (तत्वोद्योतः)

४१. बृहदारण्यकम्

			अध्यायः	ब्राह्मणम्	भागः
228	ब्रह्म वा इदमग्र आसीत्	37 etc	3	5	4
229	यो विज्ञाने तिष्ठन्	71	5	7	22

४२. ब्रह्मवैवर्तः

				अ	पा	सू
230	आत्मब्रह्मादयः शब्दाः	49	(श्रीमद्भाष्यम्)	1	3	1

४३. ब्रह्मसूत्राणि

				अ	पा	सू
231	अर्चिरादिना	162		4	3	1
232	जन्माद्यस्य यतः	2	etc	1	1	2
233	शब्दादेव	13	etc	1	3	24

४४. ब्रह्मसंहिता

				अ	पा	सू
234	यथा हि पौरुषं सूक्तं	113	(श्रीमद्भाष्यम्)	1	2	26

४५. ब्रह्माण्डपुराणम्

235 ऋगाद्या भारतं 169 (विष्णुतत्त्वनिर्णयः) प-1

				अ	पा	सू
236	रुजं द्रावयते	168	(श्रीमद्भाष्यम्)	1	3	3
237	शिवः सुखात्मकत्वेन	80	”		”	

४६. ब्राह्मपुराणम्

				अ	पा	सू
238	यथैव पौरुषं सूक्तम्	113	(श्रीमद्भाष्यम्)	1	2	26

४७. भगवद्गीता

			अध्यायः	श्लोकः
239	ईश्वरः सर्वभूतानां	6	18	61

240	उत्तमः पुरुषस्त्वन्यः	6	etc	15	17
241	किं पुनर्ब्राह्मणाः	132		9	33
242	क्षरः सर्वाणि	82		15	16
243	तमेव शरणं	6	etc	18	62
244	द्वाविमौ पुरुषौ	181		15	16
245	नष्टो मोहः	182		18	73
246	मन्मना भव	8	etc	9	34
247	यस्मात्क्षरं	62	etc	15	18
248	यो लोकत्रयं	,,		15	17
249	वेदैश्च सर्वैः	157		15	15
250	सर्वस्य चाहं	72	etc	,,	,,

४८. भागवतम्

			स्कन्धः	अध्यायः	श्लोकः
251	तत उद्यम्य निशितं	178	10	66	47
252	ततो ह त्रिवृदोङ्कारः	23			
253	दत्तं दूर्वाससं	63	4	1	15
254	ब्रह्मा तदुपधार्याथ	110	10	1	19
255	समाहितात्मनः	23			
256	सोमोऽभूद्ब्रह्मणोंऽशेन	63	4	1	33

४९. भाल्लवेयश्रुतिः

			अ	पा	सू
257	नामानि सर्वाणि	83 etc (श्रीमद्भाष्यम्)	1	1	1

५०. मनुस्मृतिः

			अध्यायः	श्लोकः
258	आपो नारा इति प्रोक्ताः	130	1	10
259	ततः स्वयम्भूर्भगवान्	170	1	6

५१. महाकौर्मपुराणम्

260	भारतं सर्वशास्त्रेषु	181 (गीताभाष्यम्)

५२. महाभारतम्

			पर्व	अध्यायः	श्लोकः
261	ईश्वरश्चेतनः कर्ता	26 etc	12		
262	तस्मादात्मानमेवाग्रे	64	,,		
263	पञ्चरात्रस्य कृत्स्नस्य	173	,,		
264	यत्र भूतपतिः स्रष्टा	26 etc	6	6	46
265	वामपार्श्वात्तथा	175	13		
266	विष्णुरात्मा भगवतः	6			
267	स एष भगवानीशः	26 etc	13		
268	सांख्यं योगः पाशुपतं	173	12		

५३. महाभाष्यम्

			अ	पा	सू
269	अस्य गोर्द्वितीयः	144	1	3	19

५४. महोपनिषत्

			अध्यायः
270	एको ह वै नारायणः	40 etc	1
271	नारायणः परं ब्रह्म	30	

५५. माण्डूक्योपनिषत्

272	एष सर्वेश्वरः	6	6

५६. मीमांसावार्तिकम्

273	यस्य येनार्थसम्बन्धः	7 etc

५७. मैत्रायण्युपनिषत्

			प्रपाठकः	भागः
274	तमो वा इदमेकं	9 etc	4	5

५८. लिङ्गपुराणम्

275	अव्यक्तादभवत्स्थाणुः	22 etc
276	ज्येष्ठसाम्नां त्रयेणैव	17 etc
277	द्यौर्मूर्धा तु विभोस्तस्य	19

५९. लौकिकन्यायः

278	तुष्यतु दुर्जनः	164
279	मुख्यामुख्ययोः	106
280	सर्वं वाक्यं सावधारणम्	32

६०. वायुपुराणम्

281 सोमं ससर्ज यज्ञार्थं 18 etc

६१. वाल्मीकिरामायणम्

		का	स	श्लो
282 तदा तु देवताः सर्वाः	180	1	75	14

६२. विष्णुतत्त्वनिर्णयोदाहृतवचनम्

283 वासुदेवो वा इदमग्रे 40 परिच्छेदः 2

६३. विष्णुवचनश्रुतिः

284 अहमेव जगत्कर्ता 6

६४. विष्णुसहस्रनामस्तोत्रम्

		श्लोकः
285 ईशानः प्राणदः प्राणः	14 etc	21
286 एको विष्णुर्महद्भूतम्	33	140
287 विश्वं विष्णुः	14 etc	14
288 स्तुवन्नामसहस्रेण	96	4

६५. शाङ्करभाष्यम्

		अध्यायः	पादः	अधिकरणम्
289 अस्य गोर्द्वितीयः	137	1	2	3

६६. शाबरभाष्यम्

		अ	पा	अ
290 न विधौ परः शब्दार्थः	51	1	2	3

६७. शिवकर्णामृतम्

291	जगत्कारणता सत्यं	2	etc	पुटं	19

६८. शिवपुराणम्

292	तस्याङ्कमण्डलारूढा	108	
293	त्रयस्ते कारणात्मानः	26	etc
294	महालक्ष्मीरिति ख्याता	103	
295	यस्मात्सर्वमिदं	26	

६९. श्रीमद्भाष्यम्

				अ	पा	सू
296	वामनशब्दादेव	94		1	3	24

७०. श्रीमद्भाष्योदाहृतवचनानि

297	एको नारायण आसीत्	40	etc	1	2	23
298	तत एते व्यजायन्त	88		,,	,,	,,
299	न ब्रह्मा न च शङ्करः	76	etc	,,	,,	,,
300	बृह जातिजीव	28		1	1	12
301	ब्रह्मशब्दः परे विष्णौ	45		,,	,,	,,

७१. श्वेताश्वतरोपनिषत्

			अध्यायः	मन्त्रः
302	किंकारणं ब्रह्म	20 etc	1	1
303	छन्दांसि यज्ञाः	118	4	9

304	तत्सवितुर्वरेण्यं	11		4	18
305	तदक्षरं	,,	etc	,,	,,
306	नान्यः पन्थाः	12	etc	3	8
307	परास्य शक्तिः	171		6	8
308	प्रज्ञा च तस्मात्	11	etc	4	18
309	भूयः (स)सृष्ट्वा	19	etc	5	3
310	मानस्तोके तनये	12	etc	4	22
311	यदा तमः	9	etc	4	18
312	या ते रुद्र शिवा	12	etc	3	5
313	यामिषुं गिरिशंत हस्ते	,,		3	6
314	वेदाहमेतं	86		3	8
315	स कारणं	118		6	9
316	स्वयमक्षरं	82		1	10
317	हिरण्यगर्भं	22	etc	3	4

७२. षट्प्रश्नोपनिषत्

			प्रश्नः	खण्डः
318	स प्राणमसृजत	162	6	2

७३. सुबालोपनिषत्

				खण्डः
319	एको नारायण आसीत्	89	etc	
320	दिव्यो देव एकः	44	etc	6

321 नारायणाद्रुद्रः	91		
322 नैवेह किञ्चनाग्रे	44	etc	6
323 पुरुषो ह वै	91	etc	

७४. सुभाषितरत्नभाण्डागारः

324 एकैकमप्यनर्थाय	154		

७५. स्कान्दपुराणम्

325 तस्मिन्काले महाराज	113	(श्रीमद्भाष्यम्)	1 1 26

७६. हरिवंशः

326 अहं ब्रह्मा कापिलः	26	etc	
327 नामानि तव गोविन्द	14	etc	

प्रकीर्णकानि

328 असदेवेदमग्र आसीत्	151		
329 किमिव वचनं	82	शाबरभाष्यम्	2 2 27
330 तम इव हि रात्रिः	80		
331 तुरीयं सर्वदृक् सदा	144	गीताभाष्यम्	2 72
332 द्रोणं बृहस्पतेर्भागं	64		
333 न हि नाशोऽसतो भवेत्	171	अनुव्याख्यानम्	2 3 28
334 प्रजापतिर्वा इदमग्रे	9	etc	
335 प्रणवोऽष्टार्णवः स्मृतः	127		

336 यजेत्पुरुषसूक्तेन 17 etc

387 स दत्तो भूतानामधिपतिः 63

388 समे द्वितीयशब्दः स्यात् 137 (स्मृतिः) न्यायामृतम्

हरिः ॐ ।

श्रीगुरुराजाय नमः ।

श्रीवेंकटेशः प्रसन्नः ।

॥ विष्णुतत्त्वदीपिका ॥

नत्वा लक्ष्मीश्वरं विष्णुं सत्यजैत्रं जगद्‌गुरुम् ।
विष्णुतत्त्वं प्रकाश्ये[शे]ऽहमार्योक्तं च यथामति ॥

यद्यप्यार्यप्रभृतिभिर्विष्णुतत्त्वं विष्णोः सर्वोत्तमत्वादिकं परमादरेण समर्थितमेव । 'अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा[र्वा अ]न्या देवताः' इत्यादिना च स्पष्टं सिद्धमेव । एवं च नात्र विचार्यमस्ति । तथापि कैश्चित् बालव्यामोहकैः शब्दाडम्बरैरापाततोऽन्यथा समर्थितमिवाभाति । कुतूहलात्तदाभासीकर्तुमयं प्रयत्न इत्यदोषः ॥ १ ॥

'यतो वा इमानि भूतानि जायन्ते' 'जन्माद्यस्य यतः' इत्यादिश्रुतिसूत्रैः जगज्जन्मादिकारणत्वं परब्रह्मणो विष्णोः स्वरूपभूतं लक्षणमिति आर्योक्ते स्थिते सति ते खल्वेवमाहुः— जगत्कारणता सत्यं लक्षणं ब्रह्मणि स्थितम् । अत एव वयं शंभुं ब्रह्मेति प्रमिमीमहे ॥ २ ॥

तथा हि— अथर्वशिरसि 'अहमेकः प्रथममासम्' इति शिववचनम् 'सदेव सोम्येदमग्र आसीत्' इत्यादिश्रुति-

प्रतिपन्नं सर्गाद्यसमये सर्वकारणभावेनावस्थानं शिवस्य प्रतिपादयति। न चेदमन्याभिप्रायकम्, को भवानिति स्वकीयासाधारणरूपप्रश्नोत्तरस्यास्य शिववचनस्य तदन्यविषयत्वे प्रश्नोत्तरयोर्वैयधिकरण्यापत्तेः ॥ ३ ॥

ननु वाक्यस्य न आपाततः प्रतीत एवार्थः; किंतु पूर्वोत्तरवाक्यानुसारेण। अथर्वशिरसीमानि पूर्वोत्तरवाक्यानि— 'देवा ह वै स्वर्गं लोक(मगम)मायन्। ते(देवा)रुद्रमपृच्छन् को भवानिति। सोऽब्रवीदहमेकः प्रथममासं वर्त्तामि च भविष्यामि च। नान्यः कश्चिन्मत्तो व्यतिरिक्त इति। सोऽन्तरादन्तरं प्राविशत्। दिशश्चान्तरं प्राविशत्। सोहं नित्यानित्य[नित्यानित्योऽहं व्यक्ताव्यक्तो ब्रह्मा]ब्रह्माहं प्रा(श्चोऽहं)श्चः प्रत्यश्चोऽहम्' इत्यादीनि। अत्र तु रुद्रस्य सर्गाद्यसमये सर्वकारणभावेनावस्थानस्य सर्वात्मत्वस्य चोपदेशः न स्वाभिप्रायेण। किं तु 'अहं मनुरभवं सूर्यश्च' इति वामदेवस्य सार्वात्म्योपदेश इव स्वान्तर्यामिपरमात्माभिप्रायेण। अत एव, परमात्मनः खलु कारणत्वादिप्रसिद्धिः, तत्कथं (तव) 'अहमेकः प्रथममासम्' इति स्वरूपोपन्यास इति शंकापरिहारो भवति। रुद्रस्यैव वचनम् 'सोन्तरादन्तरम्' इति। तत्र स इति परमात्मोच्यते, बुद्धिसंनिहितत्वात्। अन्तर्यामिब्राह्मणोक्तदिशा सर्वशरीररूपपरात्मनः सर्वशरीराधिष्ठानद्वारा सर्वशब्दवाच्यत्वात्। सर्वशब्दवाच्यत्वाभ्युपगमादेव पूर्ववाक्येऽहंशब्देन परमात्मनः प्रकृतत्वाद्वा। तथा चायमर्थः— सः परमात्मा अन्तरात्प्राणादेरप्यन्तरं स्वात्मानं

दिशश्चान्तरं सकलादिग्वर्त्तिवस्तुजातस्य (च अन्तरं जीववर्गे) जीवादेरंतरं अन्तर्यामित्वेन प्राविशदिति । ततश्च तदभिप्रायेणैव (रुद्रस्य) सकलकारणत्वाद्युपदेशः । न च 'सोऽन्तरात्' इति वाक्यं रुद्रपरमेव किं न स्यादिति वाच्यम्, तथात्वे अहं प्राविशमित्यापत्तेः । न च 'नान्यः कश्चिन्मत्तो व्यतिरिक्तः' इति इतिकरणाच्छिववचनसमाप्तिरवगम्यते तथा च सोऽन्तरादिति श्रुतिवाक्यमेवेति स्पष्टोऽन्वय इति वाच्यम् । प्राविशदित्यनन्तरमपि सोऽहं नित्यानित्य इत्यादिरुद्रवचनानुवृत्त्या तत्समाप्त्यसिद्धेः । अन्यथा(मध्ये) श्रुतिवचनेन रुद्रवचनसंदर्भविच्छेदे उत्तरत्र पुनरब्रवीदित्यस्यापेक्षितत्वेन तदध्याहरणप्रसंगात् । इतिकरणं तु कथंचिद्धेत्वर्थत्वेनाप्युपपन्नम् । समाप्त्यर्थत्वावश्यकत्वे वा कृत्स्नरुद्रवाक्यसमाप्त्यनन्तरमेवान्वयोऽस्तु, अध्याहाराद्व्यवहितान्वयस्यैव ज्यायस्त्वात् । एवं च सोऽन्तरादित्याद्यनन्तरसंदर्भसंगत्यनुरोधेन प्रश्नवाक्यस्याप्यन्तर्यामिविषयत्वमिति चेत्– न॥ ४ ॥

उपक्रमस्यासञ्जातविरोधिनः प्रबलत्वेन तदनुरोधेनैवानन्तरसन्दर्भस्य नेयत्वात् । किंच, भवत्पक्षे देवानामन्तर्यामिप्रश्नाङ्गीकारे सर्वशब्दानामन्तर्यामिवृत्तिवदहमादिपदानामपि वृत्तेर्ज्ञातत्वात्तान्प्रत्युपपादनीयाभावात्परोक्तरीत्या सोन्तरादित्यादेरन्वयासम्भवादसांगत्यं स्यात् । न च परोक्तरीत्या सोन्तरादित्यादेरर्थकल्पनं युक्तम्, इह व्यवस्थितैकार्थपरस्य तच्छब्दस्याशब्दसंनिहितार्थपरत्वायोगात् । न च अहंशब्दस्यान्तर्यामिणि पर्यवसानात्तस्य तच्छब्दसंनिधापितार्थपरत्वं युक्त-

मिति वाच्यम् । देवैस्तत्पर्यवसानस्य प्रागनवसितत्वेन तान्प्रति तत्पदस्य तद्बोधकत्वानुपपत्तेः ॥ ५ ॥

किं च, शिव एव सर्वान्तर्यामीति शिवतत्त्वविवेके निपुणतरमस्माभिर्व्यवस्थापितत्वेन तदन्यस्यान्तर्यामिणोऽभावाच्च । माण्डूक्ये च रुद्रं प्रकृत्य 'एष सर्वेश्वरः एष सर्वज्ञः एषोऽन्तर्यामी' इत्यादिना तस्यैवान्तर्यामित्वप्रतिपादनाच्च । अन्तर्यामिब्राह्मणेऽपि तस्यैवान्तर्यामित्वप्रतिपादनाच्च ॥

'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥'

'तमेव शरणं गच्छ' 'ईश्वरः सर्वभूतानाम्' इत्यादिषु ईश्वरस्यैवोक्तेः । 'अहमेव जगत्कर्ता मम कर्ता महेश्वरः' इति विष्णुवचनश्रुतेश्च । 'विष्णुरात्मा भगवतः' इत्यत्रात्मशब्दस्य मुख्ये उपचरिते वा अभेदे तात्पर्यान्न विरोधः ॥ ६ ॥

वस्तुतस्तु 'तस्य प्रजापतेस्तिस्रस्तनवो ब्रह्मा विष्णू रुद्र इति परमात्मा ज्ञानशक्तिः शिवो देवता' इति कालाग्निरुद्रोपनिषद्वच(नाच्च)नं च 'विष्णू रुद्रः' इत्युक्त्वा 'स भूतानामधिपतिर्बभूव स चात्मेति विद्यात्' इत्युपसंहारेण शिवस्यात्मनो ब्रह्मविष्णुरुद्राः तनव इति प्रतिपादयति (यतः) । आदित्यपुराणे—

'तस्यैव मूर्तयस्तिस्रो ब्रह्मविष्णुमहेश्वराः ।
सर्वासामाधिकस्त्वात्मा शूलपाणिरिति श्रुतिः ॥'

तस्मात्सोन्तरादित्यादेः स्वस्थानेऽन्वयासंभवात् 'सत्यं सत्येन (याति) [धर्मं धर्मेण तर्पयामि] स्वेन तेजसा' इति कृत्स्नशिववाक्यसमाप्तावन्वयः, तदनन्तरं 'ततो देवा रूपं नापश्यन्' इत्यादिश्रुतिवाक्यदर्शनात्। शिववाक्यसमाप्त्यर्थस्य इतिकरणस्य शिवान्तर्धानप्रतिपादकश्रुतिवचनस्य चापेक्षितत्वात् सोंतरादित्यादेश्च देवदृश्यं स्थूलरूपं विहाय ततः परं सर्वान्तरं सर्वतो रहस्यं परिपूर्णं रूपं प्राविशदिति तदन्तर्धानप्रतिपादनसमर्थत्वात् ॥

न चैवं व्यवहितान्वये कश्चिद्दोषः, आकांक्षायाः सन्निधानाद्बलीयस्त्वात्। 'यस्य येनार्थसंबन्धो दूरस्थेनापि तेन सः। अर्थतो ह्यसमर्थानामानन्तर्यमकारणम् ॥' इति मीमांसावार्तिकोक्तेश्च ॥ ७ ॥

अथ वा 'नान्यः कश्चिन्मत्तो व्यतिरिक्तः' इत्युक्तिमुपपादयितुं शिवस्य सर्ववस्त्वभेदेन [जीवभावेन] सर्वान्तर्यामित्वेन [च] [वा] सर्ववस्तुप्रवेशप्रतिपादकत्वेन सोन्तरादित्यादि स्वस्थान एवान्वियमस्तु। न च तथा सत्यहं प्राविशमिति प्रयोगापत्तिर्दोषः, परमतेऽपि तुल्यत्वात्। यत्र यस्यानुपचरिताहंपदप्रयोगः, तत्र तस्य तत्पदेन परामर्शस्यादृष्टत्वेन स्वात्मन इव स्वान्तर्यामिणोऽपि तत्पदेन परामर्शायोगात्। यदि च स्वान्तर्यामित्वविवक्षायामहंपदप्रयोगेऽपि निष्कृष्टस्वरूपेणान्तर्यामिणः तत्पदेन परामर्शो युक्तः, तदा स्वात्मविवक्षायामहंपदप्रयोगेऽपि आत्मत्वादिसामान्यरूपान्तरेण स्वात्मनोऽपि तत्पदेन परामर्शो युक्त इति तुल्यम्। अभि-

मतं च परेषामपि गीतासु 'मन्मना भव मद्भक्तः' इत्यादावस्मच्छब्दपरामृष्ट एव वासुदेवस्यात्मनि 'तमेव शरणं गच्छ' इत्यादिवचनान्तरगततच्छब्दानामपि पर्यवसानम्। तस्मात्सर्वथाऽपि सोन्तरादित्यादेः अस्मदभिमत एवार्थे आञ्जस्यात् 'अहमेकः प्रथममासम्' इत्यथर्वशिरोवचनं शिवस्य सर्वकारणत्वं प्रतिपादयतीति युक्तम्। एवं च कृत्स्नस्यापि अथर्वशिरसः शिवप्रतिपादकत्वात्तत्राम्नातम् 'विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुः' इत्याद्यपि शिवस्य जगत्कारणत्वप्रतिपादकमनुसंधेयम् ॥ ८ ॥

तथा 'यदा तमः' इत्यादिश्वेताश्वतरमन्त्रोऽपि शिवस्य तमोविशेषाङ्कितसर्गाद्यसमयवृत्तित्वेन सर्वकारणत्वं ख्यापयति। यत्तु 'यदा तमः' इत्यनुवाद इति, पुरोवादानुसारेण तत्र शिवशब्दस्य नारायणे वृत्तिर्युक्ते[वक्तव्ये]त्युक्तम्; तत्रानुवाद इति तु सत्यमेव न तु सौबालवाक्यमेव तस्य पुरोवादः, अन्येषामप्यनूद्यमानार्थप्रापकाणाम् 'तमो वा इदमेकमा[स]सीत्' 'नासदासीन्नो सदासीत्तदानीं तम आसीत्' इति 'प्रजापतिर्वा इदमेक[एवाग्र]आसीत् नाहरासीत् न रात्रिरासीत् सोऽस्मिन्(जडे)अन्धे तमसि प्रासर्पत्' इत्यादीनां श्रवणात्। नापि 'यदा तमः' इति भागवत् 'तन्न दिवा' इत्यादिभागोऽपि कात्स्न्येनानुवादः, तद्वृत्तयोगेन तत्काले कस्यचिद्विधेयताप्रतीतेः। विधेयश्च तत्र न दिवानिशा(दि)विभागाभावः, सदसदात्मकप्रपञ्चाभावो वा, उदाहृतपुरोवादवचनजातादेव तयोः प्राप्तेः। न हि किंचिदनूद्य

किंचिद्विधातुं प्रवृत्तं वाक्यं अनुवादायावश्यापेक्षितात्पुरोवादादेव प्राप्तेऽर्थे पर्यवस्यत् साफल्यमश्नुवीत । अतस्तत्रापि तन्न दिवेत्यादिरनुवादः। एवं च यदि शिवशब्दः औत्सर्गिकार्थपरमेश्वरपरत्वं हित्वा पुरोवादविशेषप्राप्ते नारायण एव पर्यवस्येत्तदा यदा तम इति वाक्यं किं विधेयमासाद्य पर्यवस्येत् । न हि शिवशब्दस्य नारायणवृत्तित्वे पुरोवादादप्राप्तं कंचिदर्थं पश्यामः। ततश्च परमते वाक्यमेवेदं व्यर्थं प्रसज्येत । तस्मात्सर्गाद्यसमये तमःप्रापकेषु वाक्येषु क्वचिदधिष्ठाता नारायणशब्देनोच्यते, क्वचित्प्रजापतिशब्देन, क्वचित्साधारणात्मशब्देनोच्यते । तथा च विरुद्धविशेषद्वयनिरूपणादनिर्णीतविशेषपर्यवसाने सति तेषां विशेषैकविषयत्वं दर्शयितुमयं मन्त्रः तेभ्यः प्राप्तं सर्गाद्यकालिकं तमोऽनूद्य शिवशब्देन तदधिष्ठातुः परमेश्वरत्वं तेभ्योऽप्राप्तं विदधातीति तत्सार्थकत्वस्य वक्तव्यत्वात्, तदर्थं पुरोवादास्थितनारायणशब्दस्यैव शिवे वृत्तिर्वक्तव्येति युक्तम् ॥ ९ ॥

वरं हि वाक्यवैयर्थ्यात् [पदमात्रस्य] लक्षणाश्रयणम् । अभ्युपगतं च पूर्वतन्त्रे— 'एकादश वै पशोरवदानानि तानि द्विर्द्विरवद्यति' इति पशौ चोदकप्राप्तावदानद्वित्वपुनर्विधायकवाक्यस्य वैयर्थ्यपरिहाराय 'यद्यपि चतुरवत्ती यजमानः पंचावत्तैव वपा कार्या' इत्यत्र वपापदस्य हृदयादिसाधारण्येन पशुकहविर्मात्रे लक्षणा । तथा सति हृदयादिष्वपि अवदानपंचत्वसिद्ध्यर्थं उपस्तरणाभिघारणयोः सतोः हृदयादिषु त्र्यवदानप्राप्तौ हवि:र्द्विरेवावदेयं, उपस्तरणादिवृद्ध्या

तु भवति पंचत्वसंख्यापूरणमिति नियमेन भवति तत्सार्थक्यमिति ॥

एवमुक्तप्रकारेण 'यदा तमः' इति पूर्वार्धं 'तमो वा इदमेकमेवाग्र आस' इत्यादीनां केषांचिद्वाक्यानां शिवे पर्यवसानं प्रतिपादयति ॥ १० ॥

तथोत्तरार्धे 'तदक्षरम्' इति भागः 'यथा सुदीप्तात्पावकाद्विष्फुलिंगाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति ॥' इत्यादिमुण्डकादिश्रुतीनाम्, 'तत्सवितुर्वरेण्यम्' इति भागः सवितृमण्डलमध्यवर्त्तिनि परमपुरुषे जगत्कारणत्वनियतं सर्वान्तर्यामित्वलिङ्गं 'धियो यो नः प्रचोदयात्' इति उपवर्णयन्त्याः सावित्र्या ऋचः, 'प्रज्ञा च तस्मात्प्रसृता पुराणी' इति भागः 'तदैक्षत बहु स्यां प्रजायेय' इति, 'स ईक्षत लोकान्नु सृजै' इति, 'सोऽकामयत बहु स्यां प्रजायेय' इति, 'तपसा चीयते ब्रह्म ततोऽन्नमभिजायते' इति च सिसृक्षो [स्रष्टु]रादिसर्गपूर्वकालिकं स्रष्टव्यवस्तुजातालोचनमीक्षणादिशब्दैः प्रतिपादयतां छान्दोग्यादिश्रुतकारणवाक्यानां शिवे पर्यवसानं प्रतिपादयतीत्येवमयं मन्त्रः कृत्स्नकारणवाक्यानां शिवविषयत्वं निर्धारयन्नतितरामाविष्करोति शिवस्य सर्वकारणत्वम् ॥ ११ ॥

यत्तु पुरुषसूक्तमन्त्रप्रत्यभिज्ञानात् श्वेताश्वतरोपनिषन्नारायणपरेत्युक्तम्। तन्न युक्तम्, 'या ते रुद्र शिवा तनूः' 'यामिषुं

गिरिशंत हस्ते' 'मानस्तोके तनये मान आयुषि' इति श्रीरुद्राम्नातानेकमन्त्रप्रत्यभिज्ञानस्यापि सत्त्वेन तत्र विशेषपक्षपातस्य निर्मूलत्वात् । न च 'नान्यः पन्थाः' इति पुरुषसूक्तमन्त्रप्रत्यभिज्ञानमनन्यथासिद्धमिति युक्तम् । कैवल्यश्रुतावपि 'उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्' इति प्रस्तुत्य 'ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये' इति श्रवणेन मुक्त्युपायत्वावधारणस्य पुरुषसूक्तप्रतिपाद्ये नारायणे व्यवस्थितत्वासिद्धेः ॥ १२ ॥

वस्तुतस्तु पुरुषसूक्तमपि न नारायणपरम्, 'उतामृतत्वस्येशानः' इत्यत्र ईशान इत्यभिधानश्रुत्या शिवपरत्वात् । नन्वीशानपदमैश्वर्ययोगेन साधारणम् । सत्यम्, योगेन साधारणम् । योगेन साधारण्येऽपि रूढ्या तदीश्वरासाधारणम् । 'ईश्वरः शर्व ईशानः' (शंकरः)[ईशानः]शशिशेखरः । (मृड उग्रः) पशुपतिः शूली शिवः (शम्भुः) [शङ्करः] इत्याद्यभिधानकोशस्मृतिपरंपरयाऽसाधारण्येन तत्र तस्य योगरूढेरपि सिद्धेः । केवलयोगाच्च शक्तिद्वयानुग्रहलाभेन योगरूढेः प्रबलत्वात् । ब्रह्ममीमांसायाम् 'शब्दादेव प्रमितः' इत्यधिकरणे

'अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः ।
ईशानो भूतभव्यस्य स एवाद्य स उ श्वः ॥' इति

कठवल्लीमंत्रस्याङ्गुष्ठमात्र इति परिमितपरिमाणत्वालिंगाज्जीवपरत्वप्राप्तौ ईशान इत्यभिधानश्रुतिरूपाच्छब्दात्परमात्मपरत्व-

निर्णयेन तदसाधारण्यस्य स्फुटीकरणाच्च। तस्य केवलयौगिकत्वे परमात्मासाधारणशब्दाभावात् भूतभव्येशितृत्वलिंगादेव निर्णयो वक्तव्य इति 'शब्दादेवेति' सूत्रमसंगतं स्यात्। परेषामपि अङ्गुष्ठमात्रपरिमितः (अङ्गुष्ठप्रमितः) परमात्मा, 'ईशानो भूतभव्यस्य' इति परमात्मवाचकेशानशब्दादिति ईशानशब्दस्यैव शब्दशब्देन विवक्षितत्वात्। एतेन 'उतामृतत्वस्येशानः' इति पुरुषसूक्ते अमृतत्वैश्वर्यरूपकेवलयौगिकार्थविवक्षया प्रयुक्तमीशानपदं न कस्यचिद्वाचकमिति परास्तम्, 'ईशानो भूतभव्यस्य' इति ऐश्वर्यप्रतियोग्युपादानेऽपि ईशानपदस्य रूढ्युन्मेषेणाभिधानश्रुतित्वस्यांगीकारात्। यौगिकार्थसंबन्धिनः कस्यचित्पदान्तरेण अनुपादान एव समुदायशक्त्युन्मेष इति व्युत्पत्तिसिद्धनियमाभावाच्च॥ १३॥

ननु 'ईशानः प्राणदः प्राणः' इति तन्नामसहस्रमध्ये परिगणनमीशानशब्दस्य विष्णुवाचकत्वमवगमयति। तदेव च वेदोपबृंहणार्थे महाभारते पठितत्वात् अन्तरङ्गमभिधानकोशादिभ्यो वेदार्थनिर्णय इति ततोऽस्य विष्णुपरत्वमेव युक्तमीशानपदस्येति चेन्न। नामसहस्रे तु(विष्णुं)सर्वात्मतया स्तोतुं प्रवृत्ते 'विश्वं विष्णुर्वषट्कारः' इत्यादौ सर्वाभेदाभिप्रायेण देवतान्तरनाम्नामपि बहूनां परिगणनदर्शनेन ततस्तेषां शक्तिसिद्ध्ययोगात्। अन्यथा भारतलैङ्गादित्यपुराणादिपठितशिवसहस्रनामान्तर्गतस्य[विष्णुनाम्नो] विष्णोर्नाम्नोऽभावात्, हरिवंशे कैलासयात्रायाम्—

नामानि तव गोविन्द यानि लोके महान्ति च ।
तान्येव मम नामानि नात्र कार्या विचारणा ॥' इति

कृष्णं प्रति शिववचनेन विष्णुनाम्नामन्येषां च सारभूतानां नाम्नां शिवनामत्वसिद्धेश्च अभिधानश्रुत्या क्वचिदपि विष्णु-परत्वनिर्णयो न स्यात् । तस्मात्स्तुत्यर्थत्वगन्धरहितलोक-वेदसाधारणनामगणने ऐदंपर्येण प्रवृत्ताऽभिधानकोशस्मृति-रेव प्रबलत्वेन नामत्वे प्रमाणमितीशानशब्दस्य शिववाचित्व-व्यवस्थितेः, ततः पुरुषसूक्तस्य शिवपरत्वमेव युक्तम् ॥ १४ ॥

ननु पुरुषश्रुत्याद्यनेकप्रमाणैस्तस्य नारायणपरत्वमेव(मपि) युक्तमिति चेत्— न । तत्र न तावत्पुरुषशब्दो नारायणपरः । 'पुरुषावात्ममानवौ' इत्याद्यभिधानकोशस्मृतेः लौकिकवैदिक-प्रयोगप्राचुर्याच्च तस्यात्मसामान्ये शक्तेरावश्यकत्वेन तत एव 'पुरुषो ह वै नारायणः' इत्यादिनारायणविषयप्रयोगोपप-त्त्या बर्हिराज्यादिशब्दानां क्वाचित्कप्रसिद्ध्यापि तृणघृतादिजा-तिमात्रे शक्तिसिद्धेः तत एव संस्कृते तृणघृतादौ सर्वजन[आर्य]-प्रयोगस्योपपन्नत्वात् न संस्कृते विशिष्य शक्त्यन्तरं कल्प-नीयमिति बर्हिराज्याधिकरणे स्थितेन न्यायेन इह [तस्य] नारायणे विशिष्य शक्त्यन्तरस्याकल्पनीयत्वात् ॥ १५ ॥

ननु पुरुषशब्दस्य नारायणनामत्वेन निर्वचनं न्याया-ननुसारिणीमपि तत्र विशिष्य शक्तिं कल्पयतीति चेत्— न, सामान्ये शक्तस्य(अपि)पुरुषशब्दस्य क्वचित्प्रकरणवशा-न्नारायणे पर्यवसानं (अस्ति) इत्येतावज्ज्ञापनेनैव चरितार्थस्या-

र्थवादबहुलपौराणिकनिर्वचनस्याभिधानस्मृत्यादिवदन्यथासिद्धप्रयोगविषये शक्त्यकल्पकत्वात्। चित्राधिकरणे(माहेन्द्र) स्तोत्रनामत्वेन[प्र] सिद्धस्य पृष्ठशब्दस्य क्वचित् 'पृष्ठैरुपतिष्ठते' इत्यादौ स्तोत्रसाधने रथन्तरादौ लक्षणया प्रसिद्धिरस्तीत्येतज्ज्ञापनेन चरितार्थस्य 'आपो वा ऋत्वियमार्च्छन् तासां वायुः पृष्ठे व्यवर्तत' इत्यादेः रथन्तरादौ पृष्ठशब्दप्रवृत्तिनिमित्तप्रतिपादनपरस्यार्थवादिकनिर्वचनस्य तत्र(विशिष्य) न शक्त्यन्तरकल्पकत्वमिति मीमांसकैरभ्युपगमाच्च। पुरुषशब्दस्य नारायणासाधारण्यवचनात्तदैकान्त्य(मिति) वाचोयुक्तिरपि परास्ता, सर्वप्रसिद्धकोशस्मृतिविरुद्धस्य तस्य प्रशंसापरत्वस्यैव न्याय्यत्वात्।

'स एव वासुदेवोऽयं पुरुषः प्रोच्यते बुधैः।
प्रकृतिस्पर्शराहित्यात्स्वातन्त्र्याद्वैभवादपि॥

स एव वासुदेवोऽयं साक्षात्पुरुष उच्यते।
स्त्रीप्रायमितरत्सर्वं जगद्ब्रह्मपुरस्सरम्॥'

इति नृसिंहपुराणवचने[न] च तथैव विभावनाच्च। महापुरुषशब्दोऽपि न तद्वाचकः, सामान्यशक्त्यैवोपपत्तेः॥ १६॥

लक्ष्मीपतित्वलिङ्गमपि ईशानश्रुत्यनुरोधेन शिवपरमेव नेयम्, ह्रीशब्दस्य गौरीवाचकत्वात्। (न च) वाजसनेयके 'श्रीश्च ते लक्ष्मीश्च' इति पठ्यत इति (वाच्यम्) चेत्। किंचातः? श्रीशब्दस्यापि समानप्रकरणाम्नातह्रल्लेखार्थ एव पर्यवसानात्। न च वैपरीत्यं शङ्क्यम्। ह्रीशब्दस्य कमलायां

(वेदे)अदृष्टप्रयोगत्वात्। श्रीशब्दस्य 'श्रियं लक्ष्मीमौपलामम्बिकां गां षष्ठीं जयामिन्द्रसेनेत्युदाहुः' इत्यायुष्यसूक्ते गौर्यां दृष्टप्रयोगत्वात्। किं च 'ह्रीश्च ते' इति मन्त्रस्य ग्रहयज्ञे सोमाधिदेवतायाः गौर्याः पूजायां विनियोगस्य स्मृत्यर्णवादिषूक्तत्वेन ह्रीपदस्य गौरीपरत्वावश्यंभावः। अत एव तैत्तिरीयमन्त्रे 'अहोरात्रे पार्श्वे' इति शिवस्यैवार्धनारी(नरा)श्वरात्मकं रूपमुपदिश्यते। नारायणसमाख्यापि पुरुषसूक्तस्य (नाचिकेतवत्) तदृषिकत्वनिबन्धना, न तु तत्पदैक [परत्व]निबन्धना। नारायणसमाराधने विनियोगोऽपि न पुरुषसूक्तस्य शिवपरत्वं बाधते। 'अग्निर्मूर्धा दिवः ककुत्' इत्यादिमन्त्राणामपि अभिधानश्रुत्या आग्नेयादीनां अन्यदेवतापूजने जपादौ च विनियोगस्य संप्रतिपन्नत्वात्। अन्यथा 'यजेत्पुरुषसूक्तेन धनदं विश्वरूपिणम्' इति विनियोगेनान्यपरत्वापत्तेः। अस्ति च लिङ्गपुराणे शिवपूजाविधौ—

'ज्येष्ठसाम्नां त्रयेणैव तथा देवव्रतैरपि।
रथन्तरेण पुण्येन सूक्तेन पुरुषेण च॥'

इति शिवाभिषेके देवव्रतादिभिः सह विनियोगः॥ १७॥

उपबृंहणमपि विष्णुपुराणादि, दृष्टविनियुक्तमंत्रार्थविवरणरूपत्वात् श्रुतविनियोगनिर्वाहार्थत्वेनान्यथासिद्धं नानन्यथासिद्धश्रुतिप्राप्तं शिवपरत्वं बाधते। तथा हि– अस्त्येवान्यदेव[त्य]तामन्त्राणां विधिबलात् देवतान्तरयजनेऽपि विनियोगः। एवं च तेषां मन्त्राणां यजनीयदेवताप्रकाशकत्वं निर्वाह्यम्।

मन्त्राधिकरणे मन्त्राणां वाक्यविनियोगेन देवतान्तरे स्थितेः। तत्रत्यपदस्य यजनीयदेवतायां मुख्यवृत्तित्वासंभवेन 'वचनात्त्वयथाऽर्थमैन्द्री स्यात्' इत्याधिकरणन्यायेन लक्षणावृत्तेर्वाच्यत्वात्। तथा च पुरुषसूक्तस्य विष्णुपूजायां विनियोगेऽपि न तत्र पुरुषादिपदानां मुख्यत्वम्, येनोपबृंहणं शिवपरत्वं बाधेत। संति ह्यन्यत्राप्यसमवेतार्थविशेषणस्यान्यसमवेतविशेषणकस्यापि मन्त्रस्य तथैव पुराणेषु उपबृंहणानि। यथा वायुसंहितायाम्--

'सोमं ससर्ज यज्ञार्थं सोमाद्द्यौः समजायत।
धरा च वह्निः सूर्यश्च वज्रपाणिः शचीपतिः॥
विष्णुर्नारायणः श्रीमान्सर्वं सोममयं जगत्॥' इत्यादीनि॥

एवं च मन्त्रेषु असमवेतार्थाभिधानमभ्युदयकारीति नियमाद्दृष्टार्थं इति 'ततश्चावचनं तेषामितरार्थं प्रयुज्यते' इति नावमिकाधिकरणे स्थितम्॥ १८॥

पुरुषसूक्तस्य शिवपरत्वेऽपि उपबृंहणानि सन्ति। यथा— लिङ्गपुराणे 'द्यौर्मूर्धा तु [हि] विभोस्तस्य खं नाभिः परमेष्ठिनः' इत्यादीनि॥

तस्मात्पुरुषसूक्तस्य शिवपरत्वस्यैव सिद्धेर्न तन्मन्त्रप्रत्यभिज्ञानेन श्वेताश्वतरमन्त्रसंदर्भस्य नारायणपरत्वशंकावकाशः। न च हरशिवरुद्रमहेश्वराद्यनेकाभिधानश्रुतिप्रापितस्य शिवपरत्वस्य विरुद्धप्रत्यभिज्ञया बाधः संभवति, श्रुतिभ्यः प्रत्यभिज्ञायाः दुर्बलत्वात्। एवं चास्यामुपनिषदि कात्स्न्र्येन

शिवपरायाम् ‘ भूयः स सृष्ट्वा(प)यतयस्तथेशः’ इत्यादीनि (मन्त्रान्तराण्यपि) शिवस्य सर्वकारणत्वप्रतिपादकान्यनुसंधेयानि ॥ १९ ॥

किं चास्यामुपनिषदि उपक्रम एव ‘किंकारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च संप्रतिष्ठाः। अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम्’ इति मन्त्रेण केषांचिद्ब्रह्मवादिनामृषीणां किंदेवतारूपं ब्रह्मेति संशये शिव इति निश्चयो युज्यते। तस्यैवानन्तरं कृत्स्नोपनिषदां सर्वकारणत्वसर्वाधिष्ठातृत्वयोः प्रयतमानत्वात्। ‘यदा तमः’ इति मन्त्रे सर्वकारणवाक्यानां शिवविषयत्वस्य कण्ठतः प्रतिपादनात् व्यर्थः परेषां विषयान्तरोपसंहाराय छागपशुन्यायसंभ्रम इति ॥ २० ॥

तथा ‘यो देवानां प्रथमं पुरस्तात्’ इति मन्त्रोऽपि सर्वदेवप्रथमहिरण्यगर्भजनयितृत्वेन शिवे सर्वकारणत्वमाविष्करोति। न चायं ‘नारायणाद्ब्रह्मा जायते’ इत्येतदनुवादः, एतदर्थस्य पशुपतेर्हिरण्यगर्भजनयितृत्वस्य ततः प्राप्त्यभावात्। न हि प्राप्त्यभावे यदुपबन्धसहस्रेणापि कल्पयितुं शक्यते अनुवादकत्वम्। न च नारायणे रुद्रपदस्य लक्षणया ‘नारायणाद्ब्रह्मा जायते’ इत्यतः प्राप्तिः संभवतीति वाच्यम्। तर्हि ‘यदाग्नेयोऽष्टाकपालः’ इत्यादिवाक्यस्याग्न्यादिपदानामपि यत्किंचिद्देवतायां लक्षणयाऽस्याप्यनुवादकत्वापत्त्या सकलमीमांसाव्याकुलीभावप्रसंगात्। अन्योन्याश्रयत्वापत्तेश्च—रुद्रपदस्य नारायणे लक्षणासिद्धौ प्रापकसद्भावे-

नास्यानुवादकत्वम्, सिद्धे चानुवादकत्वे पुरोवादानुसारेण लक्षणाकल्पनमिति। (वस्तुतस्तु)यदि च द्वयोरपि हिरण्यगर्भकारणत्वं न संभवेत्तदा श्रुतिविशेषश्रुतयोः नारायणरुद्रपदयोरन्यतरस्य लक्षणावश्यंभावात् यदुपब्रन्धानुग्रहाय रुद्रपदस्यैव (नारायणे) लक्षणाकल्पनमिति शंक्येतापि। संभवति च द्वयोरपि कल्पभेदेन तत्कारणत्वम् ॥ २१ ॥

यत्त्वस्य मन्त्रस्य शिवपरत्वमङ्गीकृत्यावैदिकानां व्याख्यानम्— 'महर्षिः रुद्रः परमात्मनः सकाशाज्जायमानं हिरण्यगर्भं ददर्श' इति, तत्तु[न साधु] श्वेताश्वतरे 'हिरण्यगर्भं जनयामास पूर्वम्' इति मन्त्रस्य पाठात् तदनुरोधेनात्र स्वस्मात् जायमानं हिरण्यगर्भं लोकसृष्टयर्थं[अपश्यत्] पश्यति इत्यस्यात्र विवक्षितत्वात्।

'अव्यक्तादभवत्स्थाणुः शिवः परमकार(णः)णम्।
सत्कार्यकरणोपेतः ऋषिर्विश्वाधिकः प्रभुः॥

देवानां प्रथमं देवं जायमानं मुखाम्बुजात्।
ददर्श चाग्रे ब्रह्माणं (च)आज्ञया तमवैक्षत॥
दृष्टो रुद्रेण देवेशः ससर्ज सकलं जगत्॥

इति लैङ्गे तथैवोपबृंहणाच्च ॥ २२ ॥

यत्तु 'यद्वेदादौ' इति मन्त्रस्य नारायणपरत्वमुक्तम्, तन्न तावत्प्रकरणानुरोधेन। 'धातुः प्रसादान्महिमानमीशम्' इति ईशपदेन योगरूढ्या(अनितर) साधारण्येनोपक्र[क्र]मात्,

'विश्वाधिको रुद्रो महर्षिः' इति मध्ये परामर्शाच्च प्रकरणस्य शिवपरत्वावगमात्। नापि (अस्मिन्मन्त्रे) विधेयानुरोधेन, 'यः परः स महेश्वरः' इत्यत्र महेश्वरपदेनोक्तरीत्या शिवासाधारणेन यः पर इति अनूदितस्य परस्य शिवरूपताविधौ तात्पर्यावसायात्। नाप्यनुवाद्यानुरोधेन; परोक्तरीत्यापि हि प्रणवप्रकृतेरर्थोऽनुवाद्यः। न च प्रणवप्रकृतिरकारः, 'अकारो वै सर्वा वाक्' इति श्रुतेः 'ओंकारेण सर्वा वाक् संतृण्णा' इत्यादिवत् स्तुतिपरत्वात्। किं तु 'मात्रा मात्राः प्रतिमात्राः कृत्वा' इति तापनीयश्रुतौ उत्तरोत्तरमात्राणां पूर्वपूर्वमात्रालयस्थानत्वप्रतिपादनात्, भागवते 'समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः। हृदाकाशादभून्नादः' इति प्रस्तुत्य 'ततो ह त्रिवृदोंकारः' इत्युक्तत्वाच्च, अथ [या]अवसानेऽस्य चतुर्थ्यर्धमात्रेति तदर्धमात्राव्यपदिष्टः प्रणवसूक्ष्मावस्थारूपत्वेन प्रसिद्धो नाद एव प्रणवस्य प्रकृतिः। न च तस्यार्थो नारायणः।

'एवं तिसृभिरेवैतन्मात्राभिरखिलं त्रिधा।
अभिधाय शिवात्मानं बोधयत्यर्धमात्रया॥'

इत्यादिपुराणवचनैस्तस्य शिवप्रतिपादकत्वनिर्णयात्। न चायमनुवादभागस्याप्यर्थ इति नियन्तुं शक्यते। विधान्तरेणापि शिवपरत्वस्वारस्येन अनेकधा [अर्थ]वर्णनसंभवादित्यपि प्रपंचितं शिवतत्त्वविवेके। तस्मादयमपि मन्त्रः प्रकरणाद्विध्यनुवादस्वारस्याच्च शिवपरः। ततश्चैतदनुवाकमध्यविहितदहरोपासनापि नान्यविषयमवलम्बते। यस्तु अनन्तरं

नारायणस्य प्रस्तावः, स तस्योपासककोटिनिवेशतात्पर्येणेति समर्थितं सुदर्शनाचार्यैरिति ॥ २३ ॥

तथा अथर्वशिखापि शिवस्य सर्वकारणत्वं प्रतिपादयति। तत्र हि--'भगवन् किमादौ (प्रयोक्तव्यं) [प्रयुक्तं ध्यानं] ध्यायितव्यं किं तद्ध्यानं को वा ध्याता कश्च ध्येयः' इति उपक्रान्तप्रश्नचतुष्टयक्रमेण 'ओमित्येतदक्षरमादौ प्रयुक्तं ध्यानं ध्यायितव्यम्' इत्यादिना 'ध्याता रुद्रः' इत्यन्तेन प्रश्नत्रयोत्तरानन्तरं ध्येयनिर्णयार्थमिदमाम्नायते-- 'प्राणं मनसि सह करणैः। (वाशंते) [नादान्ते] परमात्मनि संप्रतिष्ठाप्य ध्यायीतेशानं प्रध्यायितव्यं सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्राः ते संप्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैर्न कारणं कारणानां [धाता] ध्याता कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुराकाशमध्ये' इत्यादि ॥

तत्र च 'ध्यायीतेशानम्' इति शिवस्य ध्येयत्वं निर्धार्य तदितरनिखिलदेवतान्तरवैमुख्येन तस्य ध्येयत्वनिर्धारणमुपपादयितुं 'सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्राः' इति देवेषु ब्रह्मादीनां प्रमुखत्वोक्तिपूर्वकं 'ते संप्रसूयन्ते' इत्यादिना तेषामपि भूतेन्द्रियादितौल्येन परमेश्वरात् प्रसूति(मात्वो)मत्त्वोपन्यासात्। 'न कारणं कारणानां [धाता] ध्याता' इति तेषां कारणभूतस्य शिवस्य प्रसूतिराहित्योपन्यासेन शिवस्य सर्वदेवेभ्यो विशेषं विभाव्य सोपपत्तिकं तस्य ध्येयत्वं पुनरुपसंहृतम्-- 'कारणं तु ध्येयः' इत्यादिना ॥

यद्यपि 'प्रसूयन्ते' इति ब्रह्मादीनां प्रसूतिमात्रमुपन्यस्तम्, न तु शिवात् प्रसूतिः, तथापि प्रतियोगिसापेक्षार्थे शब्दनिर्दिष्टे सन्निहितस्य प्रतियोगित्वेनान्वयो युक्त इति सन्निधानादीशानस्यैव कारण(त्वम्)[त्वेनान्वयः]। अत एव '(स) [न] कारणं कारणानां [धाता]ध्याता' इति, 'कारणं तु ध्येयः' इति च अनन्तरवाक्ययोस्तस्य कण्ठत एव कारणत्वनिर्देशः। तस्मादथर्वशिखापि शिवस्य सर्वकारणत्वं ख्यापयतीति युक्तमुक्तम् ॥ २४ ॥

'एकः पुरस्ताद्य इदं बभूव यतो बभूव भुवनस्य गोपाः। यमप्येति भुवनं सांपराये स नो हरिर्घृतमिहायुषेऽत्तु देवः॥' इत्यायुष्यसूक्तमन्त्रादिकमपि भगवतः परमेश्वरस्य जगत्कारणत्वे प्रमाणमनुसन्धेयम् ॥ २५ ॥

तथा शिवपुराणादिष्वपि—

'यस्मात्सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रपूर्वकम्।
सह भूतेन्द्रियैः सर्वैः प्रथमं संप्रसूयते ॥'

'एष देवो महादेवो विज्ञेयस्तु महेश्वरः।
न तस्य परमं किंचित्पदं समधिगम्यते ॥

अनेन चित्रकृत्येन प्रथमं सृज्यते जगत्।
अन्तकाले पुनश्चेदमस्मिन्प्रलयमेष्यति ॥'

इत्यादिना शिवस्य जगज्जन्मादिकारणत्वं प्रतिपाद्यते। न चागमान्तरविरोधः, मत्स्यपुराणे कल्पभेदे विष्णोर्ब्रह्मादिसर्जकत्वम्, कल्पान्तरे ब्रह्मणः विष्ण्वादिसर्जकत्वम्, पुनः कल्पान्तरे रुद्रस्य विष्ण्वादिसर्जकत्वमित्युक्तेः। एवं च

तत्तत्कल्पभेदेन सर्वपुराणानामप्यविरोधात् प्रामाण्यमेव। स्पष्टश्चायमर्थः शिवपुराणे प्रतिपादितः— 'त्रयस्ते कारणात्मानो जाताः साक्षान्महेश्वरात्। चराचरस्य विश्वस्य सर्गस्थित्यन्तहेतवः। पित्रा नियमिताः सर्वे [पूर्वं] त्रयोऽपि [त्रिषु] स्वेषु कर्मसु। ब्रह्मा सर्गे हरिस्त्राणे रुद्रः संहरणे पुनः। तथाप्यन्योन्यमात्सर्यादन्योन्यातिशयार्थिनः। तपसा तोषयित्वा तं पितरं परमेश्वरम्। ब्रह्मनारायणौ पूर्वं रुद्रः कल्पान्तरेऽसृजत्॥' इत्यादि। कल्पान्तरवृत्तान्तमधिकृत्य महर्षिभिः सृष्टानि पुराणप्रमाणानि। तेषां कारणीभूतस्य परमशिवस्योत्कर्षस्य शिवपुराणोक्तस्य चलनाभावात् अथर्वशिखादिश्रुतिभिस्स(शक्तिः तथा च) [शैन प्रबलैः] तैः सर्वकारणत्वसिद्धिः। तथा बादरायणेन महाभारते सभापर्वणि भीष्मपर्वणि च—'यत्र भूतपतिः सृष्ट्वा सर्वलोकान्सनातनः। उपास्यते तिग्मतेजा वृतो भूतैः सहस्रशः॥' इत्यादिना, 'ईश्वरश्चेतनः कर्ता पुरुषः कारणं शिवः। विष्णुर्ब्रह्मा शशी सूर्यः शक्रो देवाश्च [सान्वयाः] (सानुगाः।) सृज्यते ग्रस्यते चैव'— इत्यादिशान्तिपर्ववचनैः, 'स एष भगवानीशः सर्वतत्वादिरव्ययः। सर्वतत्वविधानज्ञः प्रधानपुरुषेश्वरः। सोऽसृजद्दक्षिणादंगात् ब्रह्माणं लोकसंभवम्। वामपार्श्वात्तथा विष्णुं लोकरक्षार्थमीश्वरः॥' इत्याद्यानुशासनिकवचनैः, 'अहं ब्रह्मा कपिलोऽथाप्यनन्तः पुत्राः सर्वे ब्रह्मणश्चातिवीराः' इत्यादिश्रीकृष्ण(कृत)स्तोत्रमध्यगतहरिवंशवचनैश्च परमशिवस्य सर्वकारणत्वं व्यवस्थापितम्। तस्माच्छ्रुतिस्मृतिभिः परमशिवस्यैव सर्वकारणत्वं सर्वेश्वरत्वं च सिद्धम्॥

इति पूर्वपक्षानुवादसंक्षेपः॥

अत्र स्वामिनः—

जगज्जन्मादिहेतुत्वं लक्षणं ब्रह्मणो ध्रुवम् ।
ब्रह्मशब्दबलादेव विष्णुं सम्यक् प्रसाधये ॥

यदत्र शंभुं ब्रह्म प्रमिमीमह इति प्रतिज्ञाय तदुपपादनार्थं अथर्वशिरसीत्याद्युदाजहार, तेन पूर्वोत्तरमीमांसाऽज्ञानं प्रकटीचकार। तत्तद्वाक्यगतस्यैव ज्ञापकस्य पूर्वोत्तरमीमांसयोरुक्तत्वात् तदभावे वाक्यान्तरोक्तस्य ॥ २७ ॥

तथाहि ब्रह्ममीमांसायां 'अथातो ब्रह्मजिज्ञासा' इति परब्रह्मजिज्ञासा विहिता प्रथमाधिकरणे। ततो द्वितीयाधिकरणे जिज्ञासावाक्ये 'तद्विजिज्ञासस्व तद्ब्रह्म' इति जिज्ञास्ये ब्रह्मशब्दमात्रश्रवणात्तस्य च 'बृह जातिजीवकमलासनशब्दराशिषु' इति धातुपाठेन जीवसाधारण्येन जीव एव ब्रह्मशब्दः, न त्वन्यत्र, अप्रसिद्धत्वादिति पूर्वपक्षे प्राप्ते, श्रीभगवता सिद्धान्तितम्—'जन्माद्यस्य यतः' इति। अस्यार्थः—अस्य प्रत्यक्षादिसिद्धस्य जगतः जन्मादि यतो भवति, तत्परब्रह्मैव जिज्ञास्यमिति। अयमभिप्रायः— 'यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवंति। यत्प्रयंत्यभिसंविशंति' इति जिज्ञासाविधिवाक्यशेषः श्रूयते। तत्र हि जगज्जन्मादिकारणत्वं जिज्ञास्यब्रह्मणोऽसाधारणमभिधीयते। न च तल्लक्षणं(जीवादिषु) (जीवे)संभावयितुं शक्यते इति परब्रह्मण एवेदं लक्षणम्। अतस्तस्यैव जिज्ञास्यत्वं नापरस्येति ॥ २८ ॥

न चाप्रसिद्धत्वदोषः, लक्षणेनैव प्रसिद्धिसंभवात् । लक्षणं हि (तु) सजातीयविजातीयव्यावृत्ततया लक्ष्यावधारणार्थं प्रयुज्यते । अत एवात्र ब्रह्मशब्दस्य भगवति मुख्यत्वादेव परशब्दानुक्तिः । न च तत्र ब्रह्मशब्दस्य मुख्यत्वमसिद्धम् , रूढिरेव हि मुख्यवृत्तिः, तस्याश्च जीवसाधारण्यादिति शंक्यम् । रूढिर्द्विविधा । विद्वद्रूढिरविद्वद्रूढिश्चेति । विद्वद्रूढिश्च वेदोक्ता रूढिः । आविद्वद्रूढिश्चामराद्युक्ता । यथा 'तदेव ब्रह्म परमं कवीनाम्' 'एतमेव ब्रह्मेत्याचक्षते' 'अथ कस्मादुच्यते ब्रह्मेति बृहंतो ह्यस्मिन्गुणाः' 'ब्रह्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यते । असंपूर्णाः परे यस्मादुपचारेण वा भवेत् ॥' इत्यादिश्रुतिस्मृत्यादिभिरवगता सा प्रबला । तया चाविद्वद्रूढेर्बाधः[धात्] । तथा च ब्रह्मशब्देनैव वाक्यशेषगतेन जगत्कारणस्य विष्णुत्वनिर्णयाज्जगदाविष्टस्य शंभोस्तत्सिद्ध्यर्थं अथर्वशिरःस्थाद्युदाहरणरूपाध्वगमने प्रयोजनाभाव एव ॥ २९ ॥

नन्वत्र 'तदेव ब्रह्म परमं कवीनाम्' इत्यादौ साधारणतच्छब्दादिप्रयोगाद्विष्णुत्वनिर्णायकाभावात् शंभोरेव ग्रहणं किं न स्यादिति चेत्– मैवं, यतः (तमेव तदेवेति) [तदेव एतमेवेति] सावधारणस्यापि साधारणत्वं वदन्महानेव । न च विष्णुत्वानिर्णयः । महोपनिषदि तत्समार्थके, 'नारायणः परं ब्रह्म' इति वाक्ये स्पष्टं समन्वयात् । एवं तैत्तिरीयमन्त्रेऽपि 'नारायणपरं ब्रह्म तत्वं नारायणः परः' इत्यादिना नारायणस्यैव परब्रह्मत्वप्रतिपादनाच्च । न चात्र नारायणात्परं ब्रह्मेत्यर्थः किं न स्यादिति वाच्यम् । मोच्चैर्वोचः ।

अत्र समीपगं महोपनिषद्वाक्यं श्रोष्यति । किं च पूर्ववाक्ये 'नारायणं महाज्ञेयं' इत्यादिना नारायणस्य जिज्ञास्यतां विधाय स्थानान्तरे 'तद्विजिज्ञासस्व तद्ब्रह्म' इति ब्रह्मजिज्ञासाविधानात् तद्विरुद्धमिदमित्याशंकानिरासायेदं वाक्यं प्रवृत्तं नारायण एव परं ब्रह्मेति । तत्कथमित्याशंकायां ब्रह्मशब्दार्थ(न्यासित्वं)[व्यापित्वं] नारायणे दर्शयति-- 'यच्च किंचिज्जगत्सर्वं(त्यस्मिन्) दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥' इति । तथा च पूर्वोत्तरविरुद्धमिदं व्याख्यानं कथमात्मानं लभेत ॥ ३० ॥

तथा चोपांशुयाजन्यायविदां नैवंविधशंका भवति । तथा हि- पूर्वमीमांसायां 'जामि वा एतद्यज्ञस्य क्रियते यदन्वंचौ पुरोडाशावुपांशुयाजमन्तरा यजति विष्णुरुपांशु यष्टव्योऽजामित्वाय' इत्यादि श्रूयते । तत्र संशयः – किं विष्णुरुपांशु यष्टव्य इत्यादिवाक्यं विधायकं उपांशुयाजवाक्यं समुदायानुवादः, उतोपांशुयाजवाक्यं विधायकं विष्ण्वादिवाक्यमेवार्थवाद इति। तत्र तव्यप्रत्ययश्रवणाद्विष्ण्वादिवाक्यं विधायकम्, उपांशुयाजवाक्यं तु विध्यभावात्समुदायानुवादकमिति पूर्वपक्षे प्राप्ते, जामितोपक्रमात्प्रत्येकमजामित्वायेत्युपसंहारात्तन्मध्यपतितं वाक्यं पूर्वोत्तरानुगुणं नेयमिति, उपांशुयाजवाक्यं विधायकं, विष्ण्वादिवाक्यं तु अर्थवाद इत्येवमङ्गीकार एव श्रुतैकवाक्यता र(ल)क्ष्यते । अन्यथा विष्ण्वादिवाक्यानां त्रयाणां विधायकत्वे वाक्यभेदापत्त्या श्रुतैकवाक्यता न स्यात्

इति राद्धान्तितम् । तन्न्यायेनेहापि उक्तरीत्याऽविरोधेनैकवाक्यतालाभात् ॥ ३१ ॥

न च नारायण एव परं ब्रह्मेति व्याख्याने एवकारानुक्तिदोष इति वाच्यम् । यतः 'सर्वं वाक्यं सावधारणं प्रवर्तते' इति न्यायादेवकारः सम्बध्यते । अन्यथा घटोऽस्ति इति वाक्याद्धटोऽस्ति (अस्ति) नास्ति वेति संदेहापत्तेः । न च तथा सति 'तदेव ब्रह्म परमं कवीनाम्' इति वाक्ये अवधारणं वृथा स्यादिति वाच्यम् । यत्र यस्यातिस्पष्टं ज्ञापकं नास्ति तत्रान्यस्याप्यापाततः (उक्तौ) [प्राप्तौ] तद्व्यावृत्तये एवकारोच्चारणं इत्याशयेन तत्र तदुक्तेः । इह तु पूर्वोत्तरवाक्ययोः स्ववाक्ये च नारायणमहिम्नो वर्णनादन्यस्यापाततोऽपि प्रसक्त्यभावादनुक्तिः । अथवा 'सुपां सुलुक्' इति सूत्रात् प्रथमाविभक्तेः छांदसो लुगादेशो भवति । अथवा नारायणपरं ब्रह्मेति समस्तं पदं, कर्मधारयः समासः निषादस्थपत्यधिकरणन्यायेन । तथाहि '(अनया) एतया निषादस्थपतिं याजयेत्' इत्यत्र निषादानां स्थपतिरिति तत्पुरुषो वा, कर्मधारयो वेति विशये तत्पुरुषपक्षे निषादानां स्थपतिः (इति) ब्राह्मणादिर्भवति । तस्य च वेदविद्याधिकारसत्त्वात् न किंचन कल्पनीयम् । कर्मधारयपक्षे जातिविशेषस्य वेदाधिकाराभावात् कर्मोपयुक्तवेदमन्त्राधिकारः कल्पनीयः इति गौरवं स्यादिति पूर्वपक्षे प्राप्ते षष्ठीतत्पुरुषपक्षे संबन्धिनि लक्षणा स्यादिति कर्मधारय एव समासः— निषादश्चासौ स्थपतिश्चेति । एवं च वचनस्वारस्यानुरोधात् जातिविशेषस्याधिकारे सिद्धे

तदनुगुणविद्याधिकारोऽपि कल्प्यते, 'किमिव हि (किमिह) वचनं न कुर्यात्' इति न्यायादिति राद्धान्तितम्। एवं च तन्न्यायेन व्यधिकरणतत्पुरुषात्समानाधिकरणे तत्पुरुषे विभक्त्यर्थलक्षणागौरवाभावेन स एवांगीकर्तुमुचित इति। तस्मात् 'नारायणपरं ब्रह्म' इति तैत्तिरीयवाक्यात् नारायणस्यैव परब्रह्मत्वासिद्धिः ॥ ३२ ॥

अपि च 'तदेव ब्रह्म परमं कवीनाम्' इत्यत्र पूर्ववाक्ये 'यमन्तः समुद्रे कवयो वयन्ति यदक्षरे परमे प्रजाः' इत्यत्रान्तः समुद्रे स्थितं कवयः [ईषत्]जानंतीति समुद्रस्थितत्वलिंगात नारायण एव 'तदेव' इति परामृश्यते, स एव क्षीरसमुद्रशायीति प्रसिद्धेः। तच्छब्दस्यापि अविद्धरूढ्या सर्वनामत्वेऽपि विद्धरूढ्या नारायणैकवाचित्वात। 'तदिति वा एतस्य महतो भूतस्य नाम भवति योऽस्यैतदेवं नाम वेद' इति ऐतरेयोपनिषद्युक्तेः। 'एको विष्णुर्महद्भूतम्' इति महद्भूतशब्दस्य (श्रुतौ) [स्मृतौ] विष्णुवाचकत्वनिश्चयात्। उत्तरत्रापि 'तदेवाग्निस्तद्वायुः' इत्यादिना अविद्धरूढ्या प्रसिद्धाग्न्यादिदेवतावाचकानामपि अग्न्यादिशब्दानां परममुख्यया वृत्त्या तद्वाचकत्वं तदेव परमं ब्रह्म कवीनामित्युच्यते। अनेन परब्रह्मण एवात्राशेषशब्दवाच्यत्वम्, परब्रह्म च नारायणाविनाभूतं सिद्धम्॥ ३३ ॥

तथा 'एतमेव ब्रह्मेत्याचक्षते' इति ऐतरेयोपनिषद्यपि नारायण एवोच्यते। तथाहि— द्वितीयोपनिषदि 'एष पन्था

एतत्कर्मैतद्ब्रह्मैतत्सत्यं तस्मान्न प्रमाद्येत्तज्जातीयात्' इत्युपक्रम्य तस्य ब्रह्मणः देवतासर्जनादिरूपम् 'अथातो विभूतयोऽस्य पुरुषस्य' इत्यादिना अनेकमाहात्म्यं प्रतिपाद्य स्थानान्तरेऽन्यस्यापि प्रतिपादनात्तद्विरुद्धत्वशंकापरिहारार्थं 'एष इमं लोकमभ्यार्चत्' इत्यारभ्य 'तस्माच्छतर्चिनस्तस्माच्छतर्चिन इत्याचक्षते एतमेव सन्तम्' इति विद्वद्रूढ्या कतिपयशब्दानामखण्डरूपेण भगवदेकवाचित्वं प्रसाध्य किमु वक्तव्यमिति कैमुत्यन्यायेनोपसंहरति— 'ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषाः एकैव व्याहृतिः' इत्यादिना। अत्र घोषादिशब्दवाच्यत्वस्याप्युक्तेः तन्न्यायसिद्धिः ॥ ३४ ॥

अपि च समाख्याबलादप्ययमर्थो निर्णीयते। तथाहि— अम्भृणीसूक्ते अम्भृणीपदवाच्या श्रीः 'यं कामये तं तम्' इत्यादिना रुद्रादिकारणत्वं स्वस्याभिधाय, न केवलं कारणत्वमात्रम्, किं तर्हि? नियमनकर्तृत्वमप्यस्तीत्याह— 'अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हंतवाउ' इति। अनेन पंचममुखच्छेदात् ब्रह्मद्विषे शरवे हिंसकाय रुद्रायाहं धनुरातनोमि ददामीत्यभिधाय स्वस्य स्वातंत्र्यशंकापरिहारार्थं 'मम योनिरप्स्वंतः समुद्रे' इति जगाद। अनेन 'आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥' इति नारायणशब्दं निर्वक्ति। 'गुरोर्नाम न गृह्णीयाच्छिष्यो भार्या पतेरपि' इति वचनात्तन्नाम न जग्राह। अन्यथाऽप्सु इति व्यर्थं स्यात्। एवं च यदा च ब्रह्मरुद्रादिकारणभूतायाः श्रियः भगवदधीनता तदा किमुतैषामित्युक्तं

भवति । तस्मान्नारायणस्यैव परब्रह्मत्वेन जगत्कारणत्वं तदविनाभूतसर्वशब्दवाच्यत्वं चेति सिद्धम् ॥ ३५ ॥

एतेन मंत्रार्थवादेषु वैभवान्तरवर्णनं तु देवतांतराणामपि साधारणं, करितुरगभूषणादिकमिव सचिवानाम् । तथा हि— 'हिरण्यगर्भस्समवर्तताग्रे' 'नकिरिंद्र त्वदुत्तरः' 'विश्वस्मादिन्द्र उत्तरः' 'इंद्रो यातोऽवसितस्य राजा' 'अग्निर्मुखं प्रथमो देवतानाम्' 'अग्निरग्रे प्रथमो देवतानाम्' 'राजानौ वा एतौ देवतानां यदग्नीषोमौ' 'अग्निः सर्वा देवताः' 'सूर्य आत्मा जगतस्तस्थुषश्च' इत्यादीति एतदपहासितम् ॥ ३६ ॥

तथा हि— 'हिरण्यगर्भस्समवर्तताग्रे' इति वाक्यस्य 'ब्रह्म वा इदमग्र आसीत्' इति वाक्यसमानार्थकतया प्रलयकाले स्थितत्वस्य जगत्कारणत्वव्यापकत्वाभिधायकत्वात् । कार्य-भूतस्य हिरण्यगर्भस्य जगत्कारणत्वम् , तदविनाभूतपरब्रह्मत्वं चात्यन्तविरुद्धमिति । अथ हिरण्यगर्भः अग्रे प्रथममवर्तत उत्पन्नीभूत इत्यर्थाङ्गीकारात् न विरोध इति चेत्सत्यम् । तथा सति असाधारणत्वेन साधारणत्वव्याघात एव ॥ ३७ ॥

'नकिरिन्द्र त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन्' इत्यादौ समाभ्यधिकराहित्यार्थत्वे ब्रह्मशब्दार्थस्यैव तत्त्वेनासाधारण-त्वात् । तत्तद्देवतास्वरूपानुसारेण व्याख्याने तत्तदसाधारण्य-मेवेति न साधारण्यम् । वेदप्रमेयत्वेन साधारण्याभिप्राये च 'विश्वं सत्यम्' इत्यादिवेदप्रमेयघटादिसाधारण्येनेष्टापत्तेः ॥

किंच, काठकेऽपि 'तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते

(मश्नुते)' इत्यनेकशब्दवाच्यत्वमभिधाय 'तद्विष्णोः परमं पदम्' इति स्पष्टीक्रियते । तेन 'पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' इति पुरुषशब्दवाच्यस्य उक्तं सर्वोत्तमत्वं च श्रीविष्णोरेव स्पष्टीकृतम् ॥ ३९ ॥

किंच 'ब्रह्म वा इदमग्र आसीत्' 'आत्मा वा इदमेक एवाग्र आसीत्' 'सदेव सोम्येदमग्र आसीत्' 'एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नाग्नीषोमौ नेमे द्यावापृथिवी' 'एको नारायण आसीन्न ब्रह्मा न च शंकरः' 'वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शङ्करः' एवं सामान्यतोऽभिधाय विशेषतः बृहतीसहस्रप्रतिपाद्यत्वं चाभिधाय 'आत्मा वा इदमेक एवाग्र आसीत्' इत्यादिना प्रलयकालेऽवस्थानं च प्रतिपाद्य 'ता एता देवतास्सृष्टा अस्मिन्महत्यर्णवे प्रापतंस्तमशनापिपासाभ्यामन्ववार्जत्ता एनमब्रुवन् आयतनं नः प्रजानीहि यस्मिन्प्रतिष्ठिता अन्नमदामेति' इत्यादिना सर्वदेवताप्राथ्र्यस्य समुद्रस्थत्वेन विष्णुत्वं समर्थितम् । तत्र 'तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः' इत्यादिना अतिस्पष्टानुक्तिदोषं परिहृत्य तृतीयोपनिषदि सकलसंहितागतपूर्वोत्तरवर्णादिप्रतिपाद्यतामभिधाय 'विष्लृ व्याप्तौ' इति धातोरुत्पन्नस्य विष्णुशब्दस्य अर्थतो व्याख्यानार्थं 'एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते एतमग्नावध्वर्यवः एतं महाव्रते छन्दोगाः एतमस्यामेतं दिव्येतं वायावेतमाकाश एतमप्स्वेतमोषधीष्वेतं वनस्पतिष्वेतं चन्द्रमस्येतं नक्षत्रेष्वेतं सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते' इत्यन्तेन ब्रह्मशब्दस-

मानार्थकविष्णुशब्दार्थमभिधायातिस्पष्टोक्तौ बाधकं चाह— 'आत्मानं परस्मै शंसति दुग्धदोहा अस्य वेदा भवन्ति' इत्यादिना। तथा चायोग्यजनानामपि स्पष्टोक्तौ ज्ञानप्राप्त्या अनर्थप्राप्तिर्भवतीत्युक्तं भवति। एवं विष्णुशब्दं व्याख्याय तद्गतवर्णानपि व्याख्याति— 'णकारो बलं षकारः प्राण आत्मा' इत्यादिना। तथा च उपनिषदुक्ताशेषगुणाश्रयतया विष्णुरेव ब्रह्मशब्दार्थ इति सिद्धम्। ॥ ४० ॥

'अथ कस्मादुच्यते' इत्यादिश्रुतौ तु ब्रह्मशब्दस्यार्थः समस्तगुणपूर्णत्वमिति स्पष्टमवगम्यते। तच्च न साधारणमिति। तथा च ब्रह्मशब्दादेव जगत्कारणस्य विष्णुत्वं निश्चितम् ॥ ४१ ॥

यदा च जगत्कारणत्वं विष्णोर्निश्चितं, तदा तदविनाभूतं सर्वशब्दवाच्यत्वं स्थलान्तरेऽपि सिद्धम्। तथाहि— 'विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्। संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन्देव एकः ॥' इत्यादिना जगत्कारणमभिधाय स्थलान्तरेऽन्यस्यापि जगत्कारणत्वप्रतिपादनाल्लक्षणातिव्याप्तिशंकापरिहाराय तत्रापि तत्तद्देवतावाचकपदमपि विद्वद्रूढ्या भगवदेकवाचीत्यभिप्रायेण तस्य 'यो देवानां नामधा एक एव' इति सावधारणतया सर्वनामधेयत्वमुच्यते। तस्य च विष्णुत्वमेतत्प्रकरणगतवाक्यबलादपि गम्यते। 'अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुः' इति पद्मनाभत्वलिङ्गात् ॥ ४२ ॥

किं च 'परो दिवा पर एना पृथिव्या' इत्येतत्प्रकरणगतवाक्यसमानार्थकेन अंभृणीसूक्तगतेन परो दिवा पर एनेति वाक्येन एतत्सूक्तप्रतिपाद्यप्रत्यभिज्ञानादपि यो देवानामिति मन्त्रप्रतिपाद्यो नारायण एवेति गम्यते । तथाहि— 'यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ।' यं उग्रं रुद्रं कर्तुं कामये, तं उग्रं करोमि । यं ब्रह्माणं कर्तुं कामये तं ब्रह्माणं कृणोमि इत्यादिना ॥ ४३ ॥

एवञ्च 'अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति' 'नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते' 'नैवेह किंचनाग्र आसीत् अमूल्यमनाधारा इमाः प्रजा जायन्ते' 'दिव्यो देव एको नारायणः' इत्यादिकारणवाक्यानामेकार्थपरत्वेन ब्रह्मशिवादिनिषेधपुरस्सरं नारायणस्यैव सर्वोत्तमत्वाविनाभूतं जगत्कारणत्वं तदविनाभूतं परब्रह्मत्वं सिध्यति ॥ ४४ ॥

एतेन कारणवाक्यगतानां सद्ब्रह्मपरमात्मादिशब्दानां साधारणानां विशेषवाक्यबलात् विशेषपरत्वमिति व्याख्यानं निरस्तम् । यतः सदेवेत्यादिना सावधारणं सदादिशब्दवाच्यस्य महाप्रलयपूर्ववृत्तित्वमुच्यते । न च तत् कार्यसाधारणं भवितुमर्हति । परं तु तत्किंसंज्ञकमिति संज्ञाविशेषाकांक्षायां तत्समानार्थकवाक्यबलान्नारायणसंज्ञकमेवेति निर्णेतुं युक्तम् । किञ्च 'ब्रह्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यते ।' 'आततत्वाच्च मातृत्वादात्मेति परमो हरिः । आत्माभासास्तदन्ये ये न ह्येतेषां तता गुणाः ॥' इत्यादिप्रमाणाद्विवृद्ध्या आत्म-

ब्रह्मादिशब्दवाच्यत्वं नारायणस्यैवेति गम्यते । तदुक्तम्—
'विद्वद्रूढिर्वैदिका स्यात्सा योगादेव लभ्यते' इति ॥ ४९ ॥

नन्वत्र विद्वद्रूढ्यङ्गीकारे मानाभावः। न च वैदिकशब्दप्रयोग एव विद्वद्रूढिः । तथा सति वैदिकशब्दमात्रस्य भगवत्परत्वापत्त्या देवतान्तरासिद्धेः । किंच, लोके गृहीतसंगतिकानां शब्दानां वेदे व्यवहार इति पूर्वोत्तरमीमांसयोः संमतिः । अन्यथा वैदिकशब्दानां संगतिग्रहणाभावापत्तेः अव्युत्पन्नानां तत्र व्यवहाराद्यसंभवात् कर्मादिविलोपप्रसंगाच्चेति चेत्— सत्यम् । वेदेनैव हि विद्वद्रूढिर्ज्ञापिता । तथाहि—ऐतरेयोपनिषदि तावच्छतर्चिनादिशब्दानां महायोगेन 'एष इमं लोकम्' इत्यादिना 'एष वा अक्षरमेष ह्येभ्यः सर्वेभ्यो भूतेभ्यः क्षरति न चैनमतिक्षरन्ति स यदेभ्यः सर्वेभ्यो भूतेभ्यः क्षरति न चैनमतिक्षरन्ति तस्मादक्षरं तस्मादक्षरमित्याचक्षते एतमेव संतम्' इत्यन्तेन इतरनिषेधपुरस्सरं समुदायवृत्तिर्भगवति अभिधीयते। न च तत्रान्येषां तत्तच्छब्दवाच्यत्वाभावोऽभिप्रेतः। 'विश्वामित्रं ह्येतदहः शंसिष्यन्तम्' इत्यादिना प्रसिद्धविश्वामित्रकर्तृकस्तोत्रारम्भप्रशंसनात् । तथा च विश्वामित्रादिषु तत्तच्छब्दानां अभिधानाद्यवगतरूढिमात्रम् , भगवति तु महायोगाविद्वद्रूढिरित्युक्तं भवति । अन्यथा वेदस्यैव पूर्वोत्तरविरोधापत्तेः । 'यो देवानां नामधा एक एव' इति सर्वशब्दवाच्यत्वोक्तेश्च । तत्र हि एक एवेत्यवधारणेनान्यस्य सर्वथा नामाभावः प्रतीयते। स च सर्वथा बाधितः । अतस्तत्र शक्तिविशेषाभाव एवाभिमतः । सैव विद्वद्रूढिः । सा महायोगगम्या।

योगस्य महत्त्वं चावयवार्थानामसंकोचः । यथा अग्निशब्दस्य स्वतो न गच्छतीत्यगः तं नयतीति अग्निरिति भगवति संकोचाभावेन विद्वद्रूढिः । प्रसिद्धाग्नौ च सर्वानियामकत्वाभावादाभिधानिकरूढिमात्रम् । एवं सर्वशब्देष्वपि द्रष्टव्यम् । एवं च सर्वशब्दवाच्यत्वे सिद्धे असंकोचेन निरवधिकानन्तगुणपूर्णत्वमेव सिद्धयति । तथा च भगवति श्रुत्यैव शक्तिविशेषसिद्धिः । अन्यथा श्रुत्यप्रामाण्यं स्यात् ॥ ४६ ॥

तथा नारायणोपनिषदि 'तदेव ब्रह्म परमं कवीनाम्' इति नारायणस्य परब्रह्मत्वमुक्त्वा तस्याशेषदेवतावाचकशब्दवाच्यतामुखेन सर्वशब्दवाच्यतोच्यते— 'तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः' इत्यादिना । तत्राग्न्याद्यभेदो बोध्यते वा, तदभावो वा ? नाद्यः अग्न्यादीनां विशिष्टचैतन्यरूपाणामभेदस्यैक्यवादिमतेऽपि बाधितत्वात्, सूर्यादीनां नियम्यत्वोक्तेश्च । न द्वितीयः, अग्न्यादीनां बहुप्रमाणसिद्धत्वात् । एवं च तदेवाग्न्यादिशब्दवाच्यमिति वक्तव्यम् । तदपि न, तेषामपि तत्तच्छब्दवाच्यत्वात् । तस्माद्ब्रह्मशब्दार्थानन्तगुणपूर्णतोपपादनार्थं महायोगविद्वद्रूढिभ्यामुपलक्षणतयाऽशेषशब्दवाच्यत्वमुच्यते । तथा च श्रुत्यैव विद्वद्रूढिसिद्धिः । अन्यथाऽसंगतिरप्रामाण्यं च स्यादिति । तथा 'स ब्रह्म स शिवः (स हरिः) सेन्द्रः सोऽक्षरः परमः स्वराट्' इत्यत्राप्येष न्यायोऽनुसर्तव्यः ॥ ४७ ॥

अथवा प्रकारान्तरेण सर्वशब्दवाच्यतोच्यते । तथाहि— 'परमः स्वराट्' इति सर्वस्वातन्त्र्यमुच्यते । यदा राज्ञः

द्रव्यदानादिना भ्रात्रादिगतजये यत्किंचित्स्वातन्त्र्ये(ण)ऽपि राजा जयीत्यादिप्रयोगः, तदा किमु वाच्यम् सर्वशब्दप्रवृत्तिनिमित्तानां तच्छब्दानां तद्वाच्यानां च सर्वेषां भगवदधीनत्वात्तस्य मुख्यवाच्यत्वमित्यभिप्रायेण परमस्वातन्त्र्यमुक्तम्। अन्यथा वाच्यत्वप्रसङ्गे तद्व्यर्थं स्यात्। अत एव 'स्वातन्त्र्यं तद्गतत्वं च शब्दवृत्तेर्हि कारणम्। स्वातन्त्र्यं तत्र मुख्यं स्यात्' इत्यादौ स्वातन्त्र्यस्यैव मुख्यत्वमुक्तम्। अनेनावरादिशब्दवाच्यत्वमपि भगवतः सिध्यति, सर्वस्वातन्त्र्यात्। अत एव रुद्रादिगायत्रीणाम् 'कामोऽकार्षीत्' इत्यादीनां 'यो देवानां (अधिपतिः) प्रथमं पुरस्तात्' इत्यादीनाम् 'मृत्तिके हन मे पापम्' इत्यादीनां सर्वेषां च महायोगविद्वद्रूढिभ्यां स्वातन्त्र्येण च भगवदेकपरत्वमित्युक्तं भवति ॥ ४८ ॥

अपि च 'पुरुषावात्ममानवौ' इत्यभिधानश्रुतिरपि शक्तिविशेषं गमयति। तत्र तावदात्मशब्दस्यार्थविशेषे शक्तिविशेषोऽङ्गीकार्यः। मानवशब्दस्य मनुष्यमात्रे सामान्यशक्तिः। ततश्च तत्समानार्थकपुरुषशब्दोऽपि शक्तिद्वययुक्तो भवति। आत्मशब्दसमानार्थकः पुरुषशब्दः विद्वद्रूढियुक्तः। मानवशब्दसमानार्थकः अभिधानरूढियुक्तः। अन्यथा पुरुष आत्मेत्येव वा, पुरुषो मानव इत्येव वा स्यात्। अन्यतरपदे द्विवचनं च व्यर्थम्, जीवेश्वरयोरात्मत्वाविशेषात्। 'आत्मब्रह्मादयः शब्दास्तमृते विष्णुमव्ययम्। न संभवन्ति यस्मात्तैर्नैवाप्ता गुणपूर्णता॥' इत्यादिप्रमाणप्रतिपन्ने अर्थभेदे मानवात्मशब्दयोरपर्यायत्वात्सहप्रयोगोपपत्तिः। तस्मात्

'पुरुषावात्ममानवौ' इत्यभिधानमपि विद्वद्रूढिं गमयतीति सिद्धम्। अत एव लोके गृहीतसंगतिकानां वेदे अर्थावगमकत्वमपि युज्यते। अत एव च कर्मादिलोपोऽपि नास्ति [महायोगाविद्वद्रूढिभ्यां भगवदेकवाचित्वेऽपि अभिधानाद्यवगतरूढ्या कर्मादिवाचकत्वस्यापि स्वीकारात्] अभिधानाद्यवगतरूढ्या कर्मादिवाचकत्वेऽपि महायोगाविद्वद्रूढिभ्यां भगवदेकवाचित्वात्। अत एव सर्वपदानां वाच्याभेदो नास्ति, अवान्तरवाच्यभेदस्यावश्यकत्वात्प्रामाणिकत्वाच्चेति दिक्। तस्माद्ब्रह्ममीमांसायां परब्रह्मलक्षणस्य जगज्जन्मादिकारणत्वस्य रुद्रादिष्वतिव्याप्तिपरिहारो ब्रह्मशब्दादेवाभिप्रेत इति सिद्धम् ॥ ४९ ॥

तथा पूर्वमीमांसायां 'संदिग्धे तु वाक्यशेषात्' इत्यधिकरणे 'अक्ताः शर्करा उपदधाति तेजो वै घृतम्' इत्यत्र येन केनचिदञ्जनं कर्तव्यम्, घृतेनैव वेति संशये, विशेषाश्रवणाद्येन केनचिदिति प्राप्ते वाक्यशेषे घृतप्रशंसनात्तेनैवेति सिद्धान्तितम्। तन्न्यायेनेहापि जगत्कारणत्वं कस्येति संदेहे तद्ब्रह्मेति वाक्यशेषस्थब्रह्मशब्देनैवोक्तन्यायेन निर्णयो युक्तः ॥ ५० ॥

न त्वथर्वशिरउदाहरणेन, तस्यायुक्तत्वात्। तथाहि—यदुक्तं अथर्वशिरसीत्यादि, तदयुक्तम्। एवं हि तत्र श्रूयते—'देवा ह वै स्वर्गं लोक[मायन्] मगमन्। ते देवा रुद्रम[पृच्छन्]ब्रुवन् को भवानिति सोऽब्रवीत् अहमेकः' इत्यादि। अत्र शिवज्ञापकस्यासाधारणस्याभावात् शिवप्रश्ननिर्णयानुपपत्तिः। न च रुद्रशब्द एवेति वाच्यम्। तस्याग्न्यादिसाधारणत्वात्।

पूर्वतन्त्रे 'सोमारौद्रं चरुं निर्वपेत्' इत्यत्र रुद्रपदस्य शिवपरत्वम्, उताग्निपरत्वमिति संशये, प्रसिद्धत्वाच्छिवपरत्वमिति पूर्वपक्षे प्राप्ते 'सोमो वै रेतोधा अग्निः प्रजानां प्रजनयिता' इति वाक्यशेषे अग्निप्रशंसाऽवगमादग्निरेव विधिवाक्यस्थरुद्रपदवाच्य इति सिद्धांतितम्। तत्र रुद्रपदस्याग्नौ शक्त्यभावे संशयानुपपत्त्या तदधिकरणानुपपत्तेः। न च वाक्यशेषबलात्कथंचिद्रुद्रपदस्याग्निपरत्वसंभवेन संशयोपपत्तिरिति वाच्यम्। वाक्यशेषैकवाक्यतया रुद्रपदस्याग्निपरत्वज्ञाने चायमेवैतदधिकरणनिर्णय इति अस्य संशयात्प्रागेव सिद्धत्वेन (संशयानुपपत्तेरपरिहारात्) एतदधिकरणस्य वैयर्थ्यापत्तेः। तस्माद्रुद्रपदस्याग्नौ शक्तिरेवाश्रयणीया। किं चात्रत्यरुद्रशब्दस्य लक्षणादिना अग्निपरत्वे 'न विधौ परः शब्दार्थः' इति शाबरवचनविरोधः॥ ५१॥

सेयं विद्वद्रूढिर्मीमांसकैरप्यंगीकृता। तथाहि—प्रमाणलक्षणे नामधेयपादे 'यस्मिन्गुणोपदेशः प्रधानतोऽभिसंबन्धः' इत्याधिकरणे 'पंचदशान्याज्यानि' इत्याद्युदाहृत्य चिन्तितम्—तत्राज्यशब्दो गुणविधिः, कर्मनामधेयं वेति। तत्र पूर्वः पक्षः—'पंचदशान्याज्यानि' इत्यत्र संख्याविशिष्टान्याज्यानि स्तोत्राङ्गतया विधीयन्ते। तेन न वाक्यभेदः। तस्मादयं गुणविधिरेव। एवं च 'आज्यैः स्तुवते' इत्युक्ते अग्रिमवाक्ये आज्यपदं गुणानुवादकं न नामधेयमिति। सिद्धान्तस्तु—'पञ्चदशान्याज्यानि' इत्यत्र समासाभावान्न संख्याविशिष्टद्रव्यप्रतिपत्तिरस्ति। तथा चोक्तयोर्द्वयोर्द्रव्यसंख्ययोर्विधानाद्वाक्यभेदः।

तस्मादाज्यानुवादेन संख्यामात्रं विधेयम्। तच्च यद्युत्पत्ति-वाक्ये आज्यपदं नामधेयं ततो घटते, नान्यथेति गुणवाक्याद्देवोत्पत्तौ नामत्वं विज्ञायते। सामानाधिकरण्याच्च, 'आज्यैः स्तुवते' इति वाक्यशेषाच्च 'यदाजिमीयुस्तदाज्यानामाज्यत्वम्' इत्यादेर्नामत्वमेव युक्तमिति॥

तत्राज्यशब्दस्य स्तोत्रनामत्वं किं संकेतमात्रेण, उत योगेन, अथ रूढ्या वा। नाद्यः, वैदिकपदानां लौकिकसंकेतमात्रेण नामत्वानुपपत्तेः। वाक्यभेदादिना पूर्वपक्षनिराकरणासंभवाच्च। गुणविधानेऽपि संकेतसंभवात्। 'सोमेन यजेत' इत्यत्रापि सोमशब्दस्यान्यत्र रूढत्वेन न नामत्वमिति निराकरणानुपपत्तेश्च। न द्वितीयः, रूढ्यपेक्षया योगस्य दुर्बलत्वात्। न तृतीयः, आज्यशब्दस्य घृत एव रूढत्वात्। तस्मात् श्रुति-स्वारस्यान्यथानुपपत्तिबलात् काचन वृत्तिराभिधानिकरूढितो बलवत्तरैव सिध्यति। सैव विद्वद्रूढिः। अत एव सर्वज्ञाचार्यैः 'विद्वद्रूढिर्वैदिका स्यात्सा योगादेव लभ्यते' इत्यत्रेश्वर-प्रकरणत्वान्महायोगादेवेति वाच्ये मीमांसोक्ताज्यादिशब्द-संग्रहार्थं योगादेवेत्युक्तम्, ईश्वरातिरिक्तस्थले महायोगाभावात्। तस्मात्पूर्वमीमांसायां यत्र यत्रान्यवाचकशब्दानां वाक्यशेषादुवृत्तिः, तत्र सर्वत्र विद्वद्रूढिरेवेति सिद्धम्। तथा च वाक्यशेषोपदर्शितयोगादिगम्यत्वं विद्वद्रूढेर्लक्षणं सूचितम्॥ ५२

न चोपक्रमाधिकरणे 'उच्चैर्ऋचा क्रियते' इत्यत्र विधिवाक्येऽपि लक्षणाऽङ्गीक्रियत एवेति वाच्यम्। तत्र स्वार्थ-

त्यागाभावात् । न हि ऋक्शब्दस्य ऋग्वेदपरत्वे स्वार्थत्यागो भवति । अत्र तु स्वार्थशिवपरत्वत्याग एव वक्तव्यः । तथा चाग्नेरपि रुद्रपदाभिधेयत्वात्तद्विषय एव प्रश्नः किं न स्यात् ॥

यदि च 'एको नारायण आसीन्न ब्रह्मा नेशानो नाग्नीषोमौ नेमे द्यावापृथिवी' इति अग्नेः प्रलये सत्वनिषेधान्न तद्विषयत्वमिति उच्येत, तर्हि तत एव नेशान इति निषेधान्न रुद्रविषयत्वमपीति तुल्यम् । तन्न्यायेनेहापि 'अहमेकः प्रथममासम्' इति विष्णुप्रशंसावगमात्स एव रुद्रपदेन गृहीत इति युक्तम्, अस्य वाक्यस्य 'एको ह वै नारायण आसीन्न ब्रह्मा न च शंकरः' इति वाक्येन समानार्थकत्वात् । 'एके मुख्यान्यकेवलाः' इति वचनादेकशब्दस्य मुख्यविष्णुवाचकत्वाच्च, 'न च शंकरः' इति रुद्रस्य निषेधाच्च । अत्रत्यरुद्रपदस्य स्वाभिमतशिववाचकत्वे तस्य 'अहं रुद्राय धनुरातनोमि' इत्यादिना लक्ष्मी (नियम्येत्यतत्योक्त तद्वाक्यप्रतिपाद्यत्वासंभवाच्च) नियम्यत्वोक्त्यसंभवापाताच्च ॥ ५४ ॥

किं च काठके 'स्वर्गे लोके न भयं किंचनास्ति' इत्यादिना कथितस्य (लोकस्य) तद्विष्णोः परमं पदमिति विष्णुलोकत्वावगमात् (तथा च) ('देवा ह वै' इत्यादावपि) स्वर्गं लोकं विष्णुलोक(मगम)मायन्नित्यर्थो भवति । एवं च रुद्रं विष्णुं अब्रुवन्निति (अर्थः सिध्यति)। अन्यथा स्वर्गलोके रुद्रस्य संगत्यभावात्कैलास(मगम)मायन्निति प्रयोगः स्यात् । एतेन शिववचनं स्वस्य सर्वकारणत्वं व्यवस्थापयतीति निरस्तम् ॥ ५५ ॥

अस्तु वा रुद्रं प्रति प्रश्नः। पिशाचाविष्टं प्रति को भवानिति प्रश्नवत् तेजोविशेषात्पुरुषविशेषाधिष्ठितत्वानुमानेन प्रश्नसंभवात् । कुत इत्थं कल्प्यते? रुद्रस्वरूपविषय एव प्रश्नः किं न स्यादिति चेत्, तथा सति अहं रुद्र इत्येव ब्रूयात् । अधिकं वदन् आम्रान् पृष्टः कोविदारानाचक्षाण इवानवधेयवचनः स्यात् । किंतु प्रत्युत्तरानुरोधेन प्रश्नवाक्यस्य तात्पर्यकल्पनं कार्यम् । न च प्रश्नवाक्यस्योपक्रमाधिकरणन्यायेनानुपसंजातविरोधित्वात्प्राबल्यमिति युक्तम् । अहो न्यायविदामग्रेसरो भवान्! यतः संशयमूलकः प्रश्नः, तं विना तस्यानुत्पत्तेः । संशयस्त्वनेकाविरुद्धकोटिकः। (तथा च) संजातप्रतिपक्षरूपत्वात्तस्य (अनुदय एव)। तत्र च उपक्रमन्यायं ब्रूषे (इति)। किं तु 'संदिग्धे तु वाक्यशेषात्' इति न्याय एव प्रवर्तते । तेन 'अहमेकः प्रथममासम्' इत्यादिप्रत्युत्तरवाक्यपर्यालोचनया प्रश्नतात्पर्यं वाच्यम् ॥ ५६ ॥

महातेजोमयरूपस्त्वं कोऽसि, किंपदाभिधेयः, किंलक्षणकः, कुतोऽस्माभिर्न दृश्यसे इत्याद्यभिप्रायेण प्रश्नः । तत्रोत्तरम्— 'अहं नाम हरिर्नित्यमहेयत्वात्प्रकीर्तितः।' इत्यादिस्मृतिप्रतिपन्नाहंपदाभिधेयोऽन्तर्यामी, 'एको ह वै नारायणः' इत्यादिश्रुतिप्रतिपन्नैकपदाभिधेयश्च, मुख्यत्वात् । प्रथममास इत्यादिना जगज्जन्मादिकारणत्वलक्षणः । इतिशब्दः प्रकारार्थः । तुरीयस्योत्तरमाह-'सोऽन्तरात्' इति । 'परोक्षत्वात्स इत्यपि' इति वचनात् परोक्षस्वभावत्वात्स इति पदवाच्यः । शरीरांतर्गतजीवान्तर्गतत्वान्न(दृश्यते) दृश्ये । न केवल-

मन्तर्याम्यहं जीवमात्रं प्रविष्टः, किं तर्हि इत्यत आह— दिश- श्चेत्यादिना। अनेन 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इति श्रुतिमर्थत उपादत्ते। न चैवं व्याख्याने काचिदनुपपत्ति- रस्ति। न वा व्यवहितान्वयः ॥ ५७ ॥

किं च रुद्रविषये सर्वप्रश्नानुपपत्तिरेव। तथाहि— देवैः रुद्रः दृष्टपूर्वो वा न वा? नाद्यः, रुद्रदर्शने दिगंबरत्वत्रिशूल- धारणाद्यसाधारणधर्मदर्शनात्संशयानुपपत्तेः। न च रूपान्तरेण दर्शनमिति वाच्यम्, स्वरूपाच्छादनेन वंचनायां कारणादर्शनात् तथात्वे वा निजस्वरूपप्रकटनस्यैव कर्तव्यत्वात्, यथा अर्जुनं प्रति व्याधरूपस्य शिवस्य स्वरूपप्रदर्शनम्। न द्वितीयः, श्रवणमननिदिध्यासनाभावे देवतासाक्षात्कारस्यैवासंभवात्। अन्यथा श्रवणादिविधिवैयर्थ्यापत्तेः। तस्माद्रुद्रविषये प्रश्न एवानुपपन्नः। उत्तरं तु सुतरामसंगतम्। अस्मत्पक्षे तु शिवान्तर्गतं पुरुषमनुमाय प्रश्नस्य कृतत्वात् न दोषः। एतेनोत्तरस्यान्तर्यामिविषयत्वे प्रश्नोत्तरयोर्वैयधिकरण्यापत्ति- रिति दूषणं परास्तम्, द्वयोरप्यन्तर्यामिविषयत्वस्यैव युक्तत्वा- त्। एतेनांतर्यामिपरत्वे सर्वशब्दानामन्तर्यामिपरत्वस्य देवै- रवगतत्वेन तान्प्रत्युपपादकानपेक्षणात्सोंतरादित्यादेर्वैयर्थ्य- मिति निरस्तम्, अंतर्यामिणः अप्रत्यक्षत्वोपपादकत्वेन तत्सार्थक्योक्तेः ॥ ५८ ॥

प्रत्युत तत्पक्ष एव सोंतरादित्यादेर्व्यवहितान्वयः वैयर्थ्यं च स्यात्। कृत्स्नशिववाक्यसमाप्त्यनंतरम् 'ते देवा

रुद्रं नापश्यन्' इति श्रुतिवाक्येनैव रुद्रस्यान्तर्धानोक्तेः सोंतरादिति श्रुतिवाक्यस्यानपेक्षितत्वात् । प्रत्युत विरुद्धार्थत्वं च । तथा हि— सोंतरादित्यादेश्च देवदृश्यं स्थूलं रूपं विहाय ततः परं सर्वांतरं सर्वतो रहस्यं परिपूर्णं रूपं आविशदिति हि भवदीयं व्याख्यानम् । तत्र रुद्रस्यैव परब्रह्मत्वप्रतिपादनार्थं प्रवृत्तेन भवता स रुद्रो देवदृश्यं स्थूलरूपं हित्वा ततः स्वरूपात्परं भिन्नं उत्तमं वा सर्वान्तरं सर्वान्तर्यामिणं उत्तमं पूर्णं रूपं प्राविशदिति रुद्रस्य स्वोत्तमान्तर्यामिप्रवेशस्य पर्यवसानाज्ञानेन व्याख्यातत्वात् । तस्य चैतन्याभिप्रायत्वेन रुद्रादुत्तमत्वोक्तिविरोधाच्च । चैतन्यमात्राभेदेन प्रवेशोक्तिविरोधाच्च । अपि चैक्यपरत्वे सोंतरादंतरमभवदिति स्यात्, न तु प्राविशदिति, प्रवेशस्य भेदव्याप्तत्वात् । एतेनाहंशब्दस्यान्तर्यामिणि पर्यवसानात्तस्य शब्दसंनिधापितत्वमित्यपि न, देवैस्तत्पर्यवसानस्य प्रागनवगतत्वेन तान्प्रति तत्पदस्य तद्बोधकत्वानुपपत्तेरिति देवानांप्रियोक्तं निरस्तम् । पूर्वोत्तरवाक्यपर्यालोचनयांतर्यामिपरत्वस्यैव प्रतीतेरिति । एतेन 'यस्य येनार्थसंबन्धः' इत्यादिमीमांसावार्तिकाद्युदाहरणप्रलपनमनन्यगतिकं परास्तम् ॥

अथ विष्णोः सर्वान्तर्यामित्वेन सर्वकारणत्वे कथं कालाग्निरुद्रोपनिषदि तस्य शिवादुत्पत्तिः श्रूयते । तथाहि— 'प्रजापतेस्तिस्रस्तनवो ब्रह्मविष्णुमहेश्वरा इति परमात्मा ज्ञानशक्तिः (सदा)शिवो देवतेति' इति चेन्न— भ्रांतोऽसि । कथमत्र शिवादुत्पत्तिः श्रूयते । प्रजापतेस्तिस्र इति प्रजापतिशब्दश्रवणात् । न चोत्तरत्र सदाशिवो देवतेति श्रवणमस्तीति वाच्यम् ।

किं स सदाशिवः रुद्रभिन्नः उत अभिन्नः । आद्ये किं तावता? रुद्रशब्देन तस्यापि उत्पत्तिश्रवणात् । सदाशिवस्य नोत्पत्तिरिति चेत्, तस्यैव शशविषाणायमानत्वाच्च । किञ्च 'नमस्ते रुद्र मन्यवे' इत्यादीनि वेदवाक्यानि तथा अभिधानकोशादीनि सर्वाणि रुद्रपराणि सदाशिवपराणि वा । आद्ये रुद्रस्यैव रुद्रादिवेदप्रतिपाद्यत्वमिति सदाशिवस्य शशविषाणतुल्यता । द्वितीये रुद्रस्य शशविषाणतुल्यता । सदाशिवस्यैव 'नेशान' इति प्रलयकाले निषेधान्न कारणत्वम् । न चोभयोः प्रतिपाद्यत्वम् । तत्किं स्वाम्येन वा स्वामिसेवकभावेन वा? नाद्यः, अप्रामाणिकत्वात्, सदाशिवस्य रुद्रतास्वीकारवैयर्थ्याच्च । अत एवाभिन्नपक्षोऽपि निरस्तः । द्वितीये स विष्णुभिन्नः, उताभिन्नः । आद्ये तस्य प्रलये नेशान इति निषेधान्न कारणत्वम् । द्वितीये स एव सदाशिवादिसकलपदवाच्यो महाविष्णुः ॥६०॥

न च कथं तस्य प्रजापतिपुत्रत्वमिति वाच्यम् । देवकीपुत्रत्ववत् 'सोमः पवते जनिता' इति मंत्रे सोमलतापुत्रत्ववत् 'वाग्वै माता प्राणः पुत्रः' इत्यत्र वाक्पुत्रत्ववच्च विष्णोः प्रजापत्यौपचारिकपुत्रत्वसंभवात् । दक्षप्रजापतिप्रभृतयः बहवः प्रजापतयः। तेषु क्वचिदवतारसंभवात्, कश्यपाद्वामनावतारस्येन्द्रादिभिः सहजातत्वाच्च। अथवा, प्रजापतिशब्देन भगवानेवोच्यते । 'तस्य प्रजापतेस्तिस्रस्तनवः' इत्युक्त्वा अन्यप्रजापतिनिवृत्त्यर्थम् 'परमात्मा ज्ञानशक्तिः' इति परमात्मोच्यते । ज्ञानशक्तिरिति कर्तृत्वस्वभावः। (सदा)शिवो देवतेतिपदवाच्यः

संहारकः स एवोच्यते। तथा च प्रजापतेर्मूलरूपाद्विष्णोरवतार-संभवान्न कश्चिद्दोषः ॥ ६१ ॥

एतेन शिवतत्त्वविवेकेऽस्माभिः शिवस्यान्तर्यामित्वं साधितमित्यादिवर्णनमपास्तम्। 'यो लोकत्रयमाविश्य' इति त्वदुदाहृतगीतादिवाक्यस्थेश्वरपदस्य 'यस्मात्क्षरम्' इत्युत्त-रवाक्येन भगवत्परत्वस्यैव सिद्धत्वात्। आदित्यपुराणवचनं शिवपुराणगतिं लभते। माण्डूक्यादिवाक्येषु सर्वेश्वरादिपदानां विष्णुपरत्वमेव। अन्यथा 'कपीश्वरनरेश्वरौ' इत्यादावपि शिवग्रहणं स्यादिति संक्षेपः ॥ ६२ ॥

वस्तुतस्तु अस्य वाक्यस्योपबृंहणं भागवते चतुर्थस्क-न्धे कृतम्। अत्रिऋषेर्महासाधनसंपत्त्या प्रसन्ना ब्रह्मविष्णुमहे-श्वराः साक्षात्कृता वरं ददुः—वयमेव त्वत्पुत्रा भवामेतीत्युक्त्वा-ऽनंतरमुच्यते—'सोमोऽभूद्ब्रह्मणोंऽशेन दत्तो विष्णोः सुयोगवित्। दुर्वासाः शङ्करस्यांशो निबोधाङ्गिरसः प्रजाः ॥' इति। 'दत्तं दुर्वाससं सोममात्मेशब्रह्मसंभवान्।' इति च। अत एवोपनिषदि 'स दत्तो भूतानामधिपतिर्बभूव स आत्मेति विद्यात्' इत्युपसंहारो विष्णुपरतया व्याख्यातः, आत्मेशब्रह्मसंभवानित्यत्र विष्णावे-वात्मशब्दप्रयोगात्। एतेन 'अहमेव जगत्कर्ता मम कर्ता महे-श्वरः' इति व्याख्यातम्—महेश्वरस्योपदेशकत्वेनाभिव्यक्तिका-रणत्वात्पुत्रत्वोपचारो वाक्पुत्रत्ववदिति ॥ ६३ ॥

ननु विष्णोरन्तर्यामित्वे 'तस्मादात्मानमेवाग्रे रुद्रं संपूजयाम्यहम्' इत्यादिमोक्षधर्मे श्रीकृष्णवचनं कथं संगतमिति

चेत्--सत्यम्। देवानां शिक्षणार्थं विध्यनुग्रहार्थं च। तथाहि-मानुषं च स्वाध्यायप्रवचने च कर्तव्ये इति विधिः देवानाम्। भगवानपि स्वयं मानुषलोके अवतीर्णो विधिबन्धविधुरोऽपि देवान् शिक्षयितुं ब्राह्मणादिपूजनम्, तेभ्य आशिषो ग्रहणम्, स्वकुलाचारानुरोधेन रुद्रादिदेवतापूजनादि मानुषं प्रकटीचकार। न चैतावता ब्राह्मणादिभ्यो भगवतोऽपकृष्टता, येन शिवादिदेवताभ्योऽपकर्षः स्यात्। तन्मात्रेणासुरा मोहिताः भगवद्दूषणं चक्रुः। तेन न भगवतो मोहकत्वादिदोषा अपि भवन्ति। अत एव भगवच्छिक्षितो रुद्रोऽपि स्वावतारे द्रौण्याख्ये 'द्रोणं बृहस्पतेर्भागं द्रौणिं रुद्रांशसंभवम्' इत्यादिप्रमाणप्रतिपन्ने पिष्टयुक्तनीरपानेन क्षीरपानमिति स्वाज्ञानं प्रकटीचकार। न चैवंभूतस्य महानुभावस्य द्रौणेः स्वमातुः स्तनपानं कृतवतः क्षीरविषये अज्ञानसंभावनाप्यास्ति। अत एव प्राकृतशिशवोऽपि अल्पनीरयुक्तमपि क्षीरं नैव पिबंति। तस्माद्देवताचारित्र्यस्यातिगह(नार्थ)नत्वान्न तेन देवतास्वरूपनिर्णयः इति ॥ ६४ ॥

यदपि अथवा, 'नान्यः कश्चिन्मत्तो व्यतिरिक्तः' इत्युक्तिमुपपादयितुमित्यादिना श्लाघनीयप्रज्ञोऽवादीत्। तन्न, कथमुक्तस्योपपादनमिह प्रतीयते। नान्यः कश्चित् इति द्वितीयाद्यभाव एवोच्यते। न च तदभावे तेनैक्यं तदन्तर्यामित्वं वा भवति। अन्यथा शशविषाणैक्यं तदन्तर्यामित्वं वा कुतो न संभाव्यते। तदानीमसता ऐक्यं चेत्तस्याप्यसत्त्वमेव स्यात्। न हि शिष्याभावे देवदत्तस्य गुरुत्वं भवति। एवं द्वितीयवस्त्वभावे अंतर्यामित्वानुपपत्तेश्च। न च नान्यः कश्चिदित्यादौ द्वि-

वीयाभावो नोच्यते, किंतु तद्भेद एव निषिध्यत इति वाच्यम्, तथा सत्यपि कारणत्वांतर्यामित्वे कथं भवतः, तयोर्भेदसापेक्षत्वात्। तथात्वे नान्यः कश्चिदित्यनेनैव पूर्तेः व्यतिरिक्तपदवैयर्थ्यापरिहाराच्च ॥ ६५ ॥

किं च, जीवादीनां नित्यत्वेन प्रलयकाले सत्त्वेऽपि 'अहमेकः प्रथममास'मिति वाक्ये जगत्कारणत्वादिना प्राधान्येन प्रलयकाले आसम्। न केवलमेतावत्, किंतु, वर्त्तामि भविष्यामि चेति कालत्रयेऽप्येतादृश एवेति अभिप्रेत्य मत्समः कोऽपि नास्ति इत्युच्यते। 'नान्यः कश्चिन्मत्तः' इति मत्तः अन्यः जीवादिः व्यतिरिक्तः स्वतंत्रो नास्ति, किंतु मदधीन एवेत्यपि ॥ ६६ ॥

न चात्र जीवैक्यवर्णने संगतिरस्ति। न चात्यन्तविरुद्धधर्माधिकरणयोरैक्यं युक्तम्। भागत्यागलक्षणयैक्यप्रतिपादनं शिवाभावे पर्यवस्येत्, जगत्कारणत्वादिविशिष्टस्यैव शिवशब्दार्थत्वात्। किं चालंकृत्य छेद इति न्यायेन रुद्रं सर्वोत्तमत्वादिना अलंकृत्य,सर्वोत्तमत्वादिकमारोपितत्वान्नास्त्येव। किं बहुना,शिव एव मत्तोऽन्यो नास्ति, किं त्वहमेवेति ब्रूषे, तेन साधु समर्थितः शैववादः। न च शिवव्यतिरिक्तजीव एव नास्ति इत्युच्यते [इति वाच्यम्], जीवं प्रति [हि] उपदेशः कार्यः। जीव एव नास्तीत्युक्ते तदीयानुभवः कुपिष्यति। तस्माच्छिव एव नास्तीति वक्तव्यम्। आगमस्य च तदभावपरतया त्वया व्याख्यातत्वात्। किं च, रुद्रस्य सर्वजीवाभेदे सर्वांतर्यामित्वमत्यंतविरुद्धम्। तथा चानुष्ठानविकल्पवद्वस्तुविकल्पासंभवात्कथं विकल्पेन व्याख्या-

नम्? सर्वांतर्यामित्वस्य सर्वोत्तमत्वरूपत्वात्तस्य चात्यंतभेदगर्भत्वात्। तस्मान्मातावन्ध्येतिवत् स्वव्याहतत्वादत्यंतासंगतमिदं व्याख्यानम् ॥ ६७ ॥

नन्वन्तर्यामि(पर)तया रुद्रपदोदितनारायणपरतया व्याख्याने सोंतरादंतरमिति वाक्ये प्राविशमिति प्रयोगापत्तिः, पूर्वोत्तरवाक्ययोरहंशब्देन प्रकृतत्वादिति चेन्नैवम्। अस्मच्छब्दप्रयोगे हि उत्तमपुरुषः। न च सोंतरादिति वाक्ये तद्योगोऽस्ति (अवान्तरवाक्यभेदात्), येनोत्तमपुरुषप्रयोगः शंक्येत। न च यस्य यत्रानुपचरिताहंपदप्रयोगः, तस्य तत्र तत्पदेन परामर्शस्य लोकेऽदृष्टत्वात्कथं स इत्यन्तर्यामिणः परामर्श इति वाच्यम्; तर्ह्येतावदेव पृच्छ। अहं प्राविशमिति स्यादिति वाक्याध्याहारं किं करोषि। तच्चेदमुत्तरितम्। यथाऽन्तर्यामिणोऽहमादिशब्दवाच्यत्वम्, तथा परोक्षस्वरूपताख्यापनाय स इति पदवाच्यत्वमभिप्रेत्यैव स इति परामर्श उपपन्नतरः। अत एवैतरेयोपनिषदि—'तदिति वा एतस्य महतो भूतस्य नाम भवति योऽस्यैतदेवं नाम वेद ब्रह्म भवति ब्रह्म भवति' इत्यत्र वाशब्देन तत् तत्प्रकृतिकं स इति वा नाम भवति महतो भूतस्यान्तर्यामिणः तज्ज्ञानान्मुक्तो भवति इत्युच्यते। अत एव गीतायामपि 'मन्मना भव मद्भक्तः' इत्यादावस्मच्छब्दपरामृष्टस्य नारायणस्य स्वात्मनि 'तमेव शरणं गच्छ' इति तदीयवचनान्तर्गततच्छब्दस्य पर्यवसानम्। ॥ ६८ ॥

एतेन सोंतरादित्यादेरस्मदभिमत एवार्थे आञ्जस्यात्

'अहमेकः प्रथममासम्' इति शिवप्रतिपादकम्। एवं च कृत्स्नस्याथर्वशिरसः शिवपरत्वात्तत्राम्नातम् 'विश्वतश्चक्षु'रित्यादिकं शिवस्यैव जगत्कारणत्वं प्रतिपादयतीत्यादि वागाडम्बरं स्वशिष्यव्यामोहनमपहास्तितं भवति। अत्रैकस्यापि वाक्यस्य शिवपरत्वाभावात्, प्रत्युत तद्विरुद्धत्वाद्वैयर्थ्यादित्युपपादितत्वाच्च ॥६९॥

किं च, येषां स्वोक्तावेव पूर्वोत्तरानुसन्धानं नास्ति, कथं तेषां श्रुतिस्मृतिषु पूर्वोत्तरानुसंधानं स्यात्। लेशतस्तत्प्रदर्श्यते। तथाहि——शिव एव सर्वान्तर्यामीति शिवतत्त्वविवेके निपुणतरमस्माभिर्व्यवस्थापितत्वेन तदन्यस्यान्तर्यामिणोऽभावाच्चेति स्वयमेव पूर्वमुक्त्वा उत्तरत्र तस्मात्सोंतरादित्यादेः स्वस्थानेऽन्वयासंभवात् कृत्स्नाशिववचनसमाप्त्यनन्तरमन्वयः। तदनन्तरं 'ततो देवा रुद्रं नापश्य' न्निति श्रुतिवाक्यदर्शनेन शिववाक्यसमाप्त्यर्थस्य इतिकरणस्य शिवान्तर्धानप्रतिपादकवचनस्याकांक्षितत्वात्। सोंतरादित्यादेश्च देवदृश्यं स्थूलरूपं विहाय ततः परं सर्वान्तरं सर्वतो रहस्यं परिपूर्णरूपं प्राविशदिति तदंतर्धानप्रतिपादनसमर्थत्वादिति स्वयमेव शिवस्य स्वातिरिक्तांतर्यामिप्रवेशं श्रुत्यर्थत्वेन जगाद ॥ ७० ॥

अन्तर्यामिब्राह्मणे—'यो विज्ञाने तिष्ठन् विज्ञानादंतरो यं विज्ञानं न वेद यस्य विज्ञानं शरीरमेष त आत्माऽन्तर्याम्यमृतः।' इत्याद्युक्तलक्षणस्य विशिष्टप्रविष्टे ततः परं उत्कृष्टं सर्वान्तःस्थं सर्वैरवेद्यममृतं पूर्णमिति उपपादनात्। सर्वाभेदे तात्पर्यान्न दोष इति चेन्न; स्वमातृगमनं सुरापानं गोमांसपुरीष-

भक्षणं कुर्वन् भार्याऽभेदे गङ्गाजलगोमयान्नाभेदे तात्पर्यमिति ब्रुवन् पूज्य एव स्यात्। तस्मादेवं पूर्वोत्तरानुसंधानम् ॥ ७१ ॥

तथा सर्ववेदसारभूतगीतायां पूर्वोत्तराननुसन्धानं द्रष्टव्यम्।

'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ॥
यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः ॥' इत्यत्र

शिवस्य सर्वांतर्यामित्वं जगाद, ईश्व(रे) [र इ]ति श्रवणात्। एतस्य पूर्वं वाक्यम्– 'सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च। वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥' इति। अव्यवहितोत्तरवाक्यं तु – 'यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥' इति। तथा च पूर्ववाक्येन सर्वान्तःपतितशिवस्य हृदि सन्निविष्ट इति तदन्तर्यामित्वमुच्यते। मत्तस्स्मृतिरिति तल्लक्षणं चोक्तम्। उत्तरेण वाक्येन क्षरवर्गप्रविष्टरुद्रादुत्तमत्वं स्वस्योक्तम्। मध्ये ईश्वरपदश्रवणमात्रेण कथं शिवस्य सर्वांतर्यामित्वं सिध्यति इति ॥ ७२ ॥

तथा श्रुतावपि पूर्वोत्तराननुसंधानं (यस्य) यथा–प्रकृतवाक्येष्वेव को भवानिति रुद्र(रुद्रा)साधारणप्रश्नानुरोधेन 'अहमेकः प्रथममास' मिति रुद्रवाक्यमेव स्वस्य (शिवस्य) सर्वकारणत्वं प्रतिपादयतीत्युक्त्वा, अथवा नान्यः कश्चिन्मत्तो व्यतिरिक्त इति उक्तिमुपपादयितुं शिवस्य सर्वजीवभावेन सर्वांतर्यामिभावेन च सर्ववस्तुप्रवेशप्रतिपादकतया सोंतरादि-

त्यादि स्वस्थान एवान्वितमस्तु इति बभाण। अत्र शिवव्यतिरिक्तस्य वस्तुन एवाभावे कथं तस्य पूर्ववाक्योक्तसर्वकारणत्वम्। सर्वत्राभेदे वा शिवस्य कथं तत्र प्रवेशः। न हि घटो घटप्रविष्ट इति व्यवहारः। अभेदार्थमंतर्यामित्वं अत्यन्तविरुद्धम्। जलानलयोस्तु निवर्त्यनिवर्तकभावरूपं एकं विरुद्धत्वम्। जीवान्तर्यामिणोस्तु नियम्यनियामकत्व अन्यजनकत्वनिवर्त्यनिवर्तकत्वादि अनंतं विरुद्धत्वम्। सोंतरादिति वाक्यस्य वा कथमन्वयः? स इति परोक्षनिर्देशात्सः मत्तो व्यतिरिक्तः अंतरादंतरं प्राविशत् इत्येवं प्राप्तौ शिवस्य स्वोक्तौ किमुपपादितं भवेत् न किंचिदिति। अन्वयानुपपत्तिश्च तदवस्थेति दिक्॥ ७२॥

वस्तुतस्तु 'देवा ह वै स्वर्गं लोक(मगमन्) (मायन्)' इत्यस्य वाक्यसमूहस्यायमर्थः—सामान्यतो ज्ञातोऽपि विशेषज्ञानार्थं को भवान् महारौद्रपदे स्थितः इति प्रश्ने रुद्रोऽब्रवीदहमेकः मुख्यः प्रथमं आदिसृष्टौ श्रीमहाविष्णुप्रसादात् रौद्रपदे आसम्। कस्मादिदम्? 'अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः। विदे हि रुद्रो रुद्रियं महित्वम्॥' इति मन्त्रवर्णात्। मीळ्हुषो भक्ताभीष्टसेचकस्य विष्णोः इच्छारूपस्य हविर्भिः प्रभृथे पूजने कृते सति वया बंधकः महारुद्रः रुद्रियं महित्वं विदे हि प्रसिद्धमिति। किमादिसृष्टावेव त्वम्, अन्यकाले अन्योऽसि? नेत्याह—वर्तामि इत्यादि। अस्मिन्पदे अन्यो नास्ति, कल्पपर्यन्तमहमेव इत्यर्थः॥

ननु त्वत्तोऽन्यः विष्णुः त्वत्प्रेरकतया पदे स्थित एव कथमुच्यते नास्तीति, अत आह—'व्यतिरिक्तः' इति

परमात्मा तदतिरिक्तो नास्तीत्यर्थः। अन्यथा व्यतिरिक्तपदं व्यर्थं स्यात्। ननु विष्णुः किमर्थं त्वत्सृष्टिं कृत्वा तुभ्यं पदं च दत्तवानित्यत आह — सोंतरादिति। शरीरादन्तः अहं ममाप्यन्तः हृदयेऽन्तर्यामित्वेन प्राविशदित्यर्थः। 'सोऽकामयत बहु स्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा। इदं सर्वमसृजत।...तत्सृष्ट्वा। तदेवानुप्राविशत्।' इति वचनात्सर्वान्तर्यामित्वेन प्रवेशार्थं सर्वसृष्टिं चकारेत्यर्थः। तर्हि अस्मिन्देशे त्वमेव रौद्रपदे स्थितः, देशान्तरे अन्योऽप्यस्ति किम्? नेत्याह—'प्रांचोऽहं प्रत्यञ्चोऽहम्' इत्यादि। तथा चेदं शिववचनं विष्णुमाहात्म्यपरमेवेति स्पष्टम् ॥ ७४ ॥

भवद्व्याख्याने 'अहमेकः' इति प्रथमवाक्येनैव जगत्कारणत्वसिद्धौ तस्य कालत्रयवृत्तित्वावश्यंभावात् वर्तामि भविष्यामि इति व्यर्थम्। 'नान्यः कश्चित्' इति विरुद्धं च, प्रलयकाले जीवादीनां सत्त्वात्। सोंतरादित्यादि कृत्स्नशिववचनं व्यर्थमेवेति दिक् ॥

किं च, 'यो देवानां नामधा एक एव' इत्यस्य नारायणपरत्वस्य समर्थितत्वात्तत्रत्यः 'विश्वतश्चक्षुः' इति मन्त्रः अथर्वशिरसि पठ्यमानः कृत्स्नाथर्वशिरसः नारायणपरत्वमेव साधयतीत्यलमत्यपहसनीयनिराकरणेनेति। तस्मादथर्वशिरोवचनं नारायणस्यैव जगत्कारणत्वमन्तर्यामित्वं च साधयतीति सिद्धम् ॥ ७५ ॥

यदप्युक्तम्—'यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासन्छिव एव केवलः। तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च

तस्मात्प्रसृता पुराणी ॥' इत्यादिश्वेताश्वतरमन्त्रोऽपि शिवस्य तमोविशेषांकितसर्गाद्यसमयवर्तित्वेन कारणत्वं व्यवस्थापयतीत्यादि । तदपि मन्दम् । न हि शिवपदश्रवणमात्रेण त्वदभिमतशिवे वाक्यं योजयितुं शक्यते । तस्य पुरोवादे 'न ब्रह्मा न च शंकरः नेशानः' इत्यादिना सत्त्वस्यैव निषेधात् । न च सुबालोपनिषद्गतवाक्यमेव न पुरोवादः, किंतु अन्येषामप्यनुवाद्यार्थप्रापकाणाम् 'तमो वा इदमेक[मास]आसीत्' 'नासदासीत्' इत्यादीनां सत्त्वादिति वाच्यम् । किं तावता त्वदाभिमतशिवस्य सत्त्वानिषेधपरिहारः? । अत एव 'प्रजापतिर्वा' इति वाक्ये प्रजापतिशब्दस्य विद्वद्रूढ्या श्रीनारायणपरत्वम्, सर्वेषां पुरोवादानामेकवाक्यत्वात्, प्रसिद्धप्रजापतीनाम् 'न ब्रह्मा' इत्यादिना निषेधात् ॥ ७६ ॥

न च 'यदा तमः' इति वाक्ये शिवशब्देन रुद्रस्य ग्रहणम्, प्रसिद्धेः सत्त्वात् । अन्यथा प्रसिद्धिबाधापत्तेः । तथा च 'न शंकरः' इत्यादिनिषेधोऽन्यविषयो भविष्यतीति वाच्यम् । तथा सति यल्लंभट्टपुत्रशिवभट्टे शिवशब्दस्य एतद्ग्रामस्थपंचमहाजनातिप्रसिद्धेः सत्त्वात्तस्यैवात्र प्रतिपाद्यत्वप्रसंगात् । तस्य च 'नेशानः' इत्यादिवद्विशिष्य श्रौतनिषेधाभावात् । अत्यन्तासंभावितत्वादेतदिति [तु] तुल्यम्, 'न च शंकरः' इति निषेधस्यान्यविषयत्वाभावोक्तेः ॥ ७७ ॥

ननु 'यदा तमः' इति वाक्यं किंचिदनूद्य किंचिद्विधातुं प्रवृत्तम् । तत्र दिवारात्रिविभागाभावो वा सदसद्रूपाभावो वा न विधेयः, पुरोवादादेव प्राप्तत्वात् । किंतु 'शिव

एव केवलः' इति विधेयं प्रतीयते। तथा चात्र शिवशब्दस्य प्रजापतिशब्दवन्नारायणवृत्तित्वे नारायणस्य पुरोवादादेव प्राप्तत्वात् व्यर्थमिदं वाक्यं प्रसज्येतेति चेत्—मन्त्रस्य विधायकत्वांगीकारे पूर्वतन्त्रविरोधापातात्। तथाहि—'देवांश्च याभिर्यजते ददाति', 'यस्योभयं हविरार्तिमार्च्छेत्' इति मन्त्रनिमित्तवाक्यादिगतस्याख्यातस्याख्यातत्वात् विधायकत्वमस्तु, ततश्च मन्त्रविध्योर्विधायकत्वे विशेषाग्रहादुभयत्र विधौ अभ्यासात्कर्मभेदः स्यादिति पूर्वपक्षे प्राप्ते, नैषां विधायकत्वम्, यच्छब्देनानुवादत्वप्रतीतेः। कर्मोपयुक्तार्थस्मरणेन चरितार्थत्वाद्विधिकल्पकत्वायोगाच्च। तस्माद्दृष्टार्थत्वादभिधायकान्येवैतानीति सिद्धांतितम्। तथा च 'यदा तमः' इति मंत्रस्य विधायकत्वे तद्विरोधो दुर्वार एवेति ॥ ७८ ॥

अस्तु वा यथाकथंचिद्विधायकत्वम्; तथापि नारायणस्यैवोक्तं विधत्ते। तथाहि—'एको नारायण आसीन्न ब्रह्मा न च शंकरः' 'एको नारायण आसीन्न ब्रह्मा नेशानो नाग्नीषोमौ नेमे द्यावापृथिवी' 'पुरुषो ह वै नारायणोऽकामयत प्रजास्सृजेयेति' 'नारायणात् ब्रह्मा जायते नारायणाद्रुद्रो जायते,' 'नैवेह किंचनाग्र आसीदमूलमनाधारमिमाः प्रजाः प्रजायन्ते दिव्यो देव एको नारायणः' इत्यादौ महाप्रलये नारायणस्यैकस्यैवावस्थानम्, ब्रह्मरुद्रादीनां च स्वरूपत एव निषेधः प्रतीयते। तत्र यदि त्वदुक्तरीत्या त्वदभिमतशिवस्यावस्थानं विधीयेत, तदा उपजीव्यपुरोवादविरोधापत्तेः। तुरीयशिवस्य शशशृंगायमाणत्वस्य वक्ष्यमाणत्वात्। तस्मान्नारायणस्यैव शिवशब्दोदितस्यावस्थानं विधीयते ॥ ७९ ॥

अथ नारायणस्य पुरोवादादेव प्राप्तिरिति चेत् – सत्यं नारायणस्य पुरोवादादेव प्राप्तिः । [तथाऽपि] तत्र 'तम इव हि रात्रिर्मृत्युरिव' इति वचनादन्धकारयुक्तरात्रेर्मृत्युतुल्यत्वश्रवणान्महाप्रलयकाले तमोऽधिष्ठातुः नारायणस्यैकस्यैवावस्थानात् भयदुःखशंकायामिदं वाक्यं प्रवर्तते । अत्र हि 'यदा तमः' इति तमआद्यनुवादेन तदा नारायणः केवलसुखात्मक एव (इति विधीयते) 'शिवः सुखात्मकत्वेन शर्वः शत्रोधनाद्धरिः' इति वचनात् । अत एव एवकारसार्थक्यम् । न चोपजीव्यपुरोवादविरोधः, न चाप्रामाणिकलक्षणास्वीकारो वा अस्ति । तथा च भयलेशराहित्येन पूर्णसुखात्मत्वेनावस्थानमुच्यते । यस्य हि यत् अनधीनं तस्यैव तद्योगजं दुःखम् । न हि वन्ध्या[कण्टका]दिर्यस्य वश्यः, तस्य तद्योगजं दुःखं भवति । अशेषं च भगवदधीनमेव । अतः पूर्णस्वप्रकाशेन पूर्णानन्द एवास्ते इत्येवंपरत्वादस्य मन्त्रस्य न वैयर्थ्यम् । प्रत्युत रुद्रपरत्वे असंभावितार्थत्वमेव । अनेन पुरोवादस्थितनारायणशब्दस्यैव शिवे लक्षणा वक्तव्या । वरं हि वाक्यवैयर्थ्याल्लक्षणाश्रयणमित्यादि मनोरथानुरोधेन वागाडम्बरं निरस्तम् ॥ ॥ ८० ॥

किंच अत्रत्योत्तरार्धे 'तदक्षरम्' इत्यक्षरशब्दः श्रूयते । तस्य च शिवे असंभवः । ऐतरेयोपनिषदि 'तस्मादक्षरं तस्मादक्षरमित्याचक्षत एतमेव सन्तम्' इत्यन्यनिषेधेन एकस्यैवाक्षरादिपदाभिधेयतोक्तेः तस्य 'ता वा एताः' इत्यादिना सर्ववेदार्थत्वमभिधाय तस्य विष्णुत्वसमर्थनार्थं 'ता

एता देवताः सृष्टा अस्मिन्महत्यर्णवे प्रापतंस्तमशनापिपासाभ्यामन्ववार्जत्ता एनमब्रुवन्नायतनं नः प्रजानीहि यस्मिन्प्रतिष्ठिता अन्नमदामेति' इत्यादिना समुद्रशायिनः सर्वदेवतासर्जकत्वं सृष्टानां चावस्थानार्थं अधिष्ठानान्नादिप्रदत्वमुच्यते। समुद्रशायी भगवान्नारायण इति प्रसिद्धमेव। अधिकं चोक्तं पुरस्तात्। तथा चाक्षरपदस्य नारायणपरत्वादप्ययं मन्त्रः नारायणपर एव ॥

काठके च 'एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्' इत्यादिना अभ्यासेनान्यनिषेधपुरस्सरं नारायणस्यैवाक्षरादिपदवाच्यत्वमित्युक्तमित्युक्तम्, विवृतं च प्राक्। एतेन यदुक्तम् 'यदा तमः' इति पूर्वार्धेन 'तदक्षरम्' इति भागेन 'तत्सवितुर्वरेण्यम्' इत्यादिभागेन च तेषां तेषां कारणवाक्यानां शिवे पर्यवसानमिति मनोरथानुरोधेन वागाडम्बरम्, तत् अपहास्तितं भवति ॥ ८१ ॥

वस्तुतस्तु अस्यामुपनिषदि उपक्रमे 'किंकारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च संप्रतिष्ठा' इत्यादिना सकलजगज्जन्मादिकारणं स्वतन्त्रं ब्रह्मेति एतावन्निश्चित्य किंदेवतारूपं तदिति प्रश्नपूर्वकं ऋषयो निर्णयं कुर्वन्ति—प्रलये यत्सत्तदेव परब्रह्मेति। ननु संशय एवानुपपन्नः। अस्यामुपनिषदि हरमहेश्वरशिवादिशब्दानां श्रवणात्कार्त्स्न्येन शिवपरत्वे सिद्धे शिव एव ब्रह्मेति शैवोक्तत्वादिति चेत्—न, उपनिषदा शिवस्य परब्रह्मत्वनिराकरणात्। 'स्वयमक्षरं प्रधानममृताक्षरं हरः क्षरात्मना विशते देव एकः' इत्यत्र क्षराक्षरप्रपंचस्य भगवति

प्रवेशः कथ्यते । तथाहि— स्वयमक्षरं महालक्ष्मीः प्रधानं प्रकृत्यभिमानिनी अमृताक्षरं नारायणं विशते । एको हरः प्रधानरुद्रः मनोदेवः तदभिमानी क्षरात्मना विशते इति ।

'ब्रह्मा शिवः सुरेशाद्याः शरीरक्षरणात्क्षराः ।
लक्ष्मीरक्षरदेहत्वादक्षरा तत्परो हरिः ॥'

इति श्रुत्यन्तरोक्तेः ॥

'क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते' ॥

इति गीतोक्तेः ॥

तथा च लक्ष्म्यादयः स्वस्वव्यापारं तत्त्वे अभिमानं हित्वा प्रविशन्तीत्यर्थः । तर्हि नारायणस्यापि 'अक्षरात्संभवतीह विश्वम्' इत्यत्रत्याक्षरपदेन ग्रहणात् तस्यापि कुत्राचित्प्रवेशः किम् ? नेत्याह—अमृताक्षरमिति । एवं च हरादिशब्दश्रवणाच्छिवस्यैवात्र परब्रह्मत्वमिति भ्रांतिनिरासार्थं क्षरात्मना विशते, न तु अरत्वपरित्यागेन [इत्युक्तम्] । एतेनेमं मन्त्रमुदाहृत्यात्र-अपंचनेन शिवस्यैव सर्वकारणत्वसर्वाधिष्ठातृत्वयोः प्रतिपादितत्वात् यतोत्रेत्यादिवाक्यप्रतिपन्नकारणत्वं चोपसंहृतमिति विद्वद्वीरेणोक्तमपहस्तितम् , वैपरीत्यस्यैव सत्त्वात् ॥ ॥ ८२ ॥

तर्हि कदा प्रवेश इति जिज्ञासायां 'यदा तमः' इति मन्त्रप्रवृत्तिः । न च नारायण एवेत्युक्तिप्रसंगः, तथैव शब्दान्तरेणोक्तत्वात् । तथाहि—महाप्रलये सर्वप्रपंचस्य भगवत्प्रवेशरूप [शानङ्गीकारे] वेदवाक्यानामप्रामाण्यं प्राप्नोति । यथा 'प्राणानां ग्रंथिरसि रुद्रो मा विशान्तकः'

(इत्यनेन) ग्रंथिराश्रयोऽसि अन्तकोऽसि मा विशेत्युच्यते। न च तदा रुद्रः प्राणानामाश्रयादिः, स्वस्यैव लीनत्वात्। अतस्तत्र भगवानेव रुद्रादिसकलपदवाच्यतया तत्तत्पदघटितवेदवाक्य-विषयः इति ख्यापनाय प्रलयकालवर्त्तिनारायणे शिवपदप्रयोगः, 'परोक्षप्रिया इव हि देवाः' इति श्रुतेः। 'नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति' इति श्रुतेश्च। प्रलयकाले तमेकमेव विशन्ति नान्यमित्यर्थः ॥ ८३ ॥

एवं यत्र प्रश्नप्रतिवचने यथा 'देवा ह वै स्वर्गं लोक-मगम[माय]न्' इत्यादौ तत्रोभयान्तर्यामिणोश्वेतासि प्रश्नप्रति-वचनयोः [तत्रोभयत्र प्रश्नप्रतिवचनकर्त्रोश्वेतासि अन्तर्यामिणः] सत्त्वात्तत्प्रतिपादकत्वेन तद्विषयत्वम्। एतदुपपादकत्वेन 'प्रज्ञा च तस्मात्' इति भागस्य सार्थक्यम्। भवत्पक्षे उत्तरार्धं एव व्यर्थः। प्रलये सत्त्वमात्रेण कारणत्व-सिद्धौ सर्वकारणवाक्यानां तत्परत्वात् विरुद्धश्च। शिवस्य पूर्वमन्त्रे क्षरात्मनेति क्षरत्वोक्तेः तदिति नपुंसकत्वानुपपत्तेश्च। आभिधानिकरूढ्या सवितुस्सूर्यस्य वरेण्यं रूपमिति वक्तव्यम्। न हि शिवः सूर्यस्य रूपं भवति, तदा सूर्यादीनामभावात्। अतः सर्ववेदवाक्यानां तदा भगवद्विषयत्वेन प्रामाण्यं भवति। अत एवोत्तरार्धे शिव इत्युक्तिमात्रेण प्रसिद्ध इति न, किं तु तदक्षरं पूर्वोक्तममृताक्षरं, तदेव जगत्सवितुर्वरेण्यं वरिष्ठं रूपम्। तदुपपादनार्थं उत्तरवाक्यमिति। तस्मादस्यामुप-निषदि 'कारणं ब्रह्म' इति ब्रह्मशब्दश्रवणादेव नारायणः प्रतिपाद्य इत्युपक्रमे सिद्धम्, 'नारायणपरं ब्रह्म' इति उपनिष-

द्वचनात् । मध्ये चामृताक्षरमित्यनेन उक्तप्रकारेण स एवोच्यते। 'यदा तमः' इत्यत्र च शिवपदेन मुक्तात्मकः स एवोच्यत इति का प्रत्याशा शिवस्य परब्रह्मत्वमिति ॥ ८४ ॥

किंऽच, श्रुत्यादिविरोधवत्त्वन्मतविरोधोऽपि तव । शांकरमते हि आभिधानिकपदवाच्यस्य न परब्रह्मत्वम् , तस्य सर्वशब्दावाच्यत्वात् । त्वं तु आभिधानिकशिवादिपदवाच्यत्वमेव हेतुं कृत्वा तस्य परब्रह्मत्वं ब्रूषे । अतः सम्यगेव सिद्धान्तपरिज्ञानम् । नास्ति मम वैतंडिकस्य सिद्धान्त इति चेत्, तर्हि शिवस्य परब्रह्मत्वसाधनभ्रान्तिं त्यज। अभेद तात्पर्यान्न कश्चिद्विरोध इति चेत् — न, भार्याऽभेदतात्पर्यात्स्वमातृगमनमपि कर्तव्यं स्यादिति दिक् ॥ ८५ ॥

किं च 'वेदाहमेतं पुरुषं महान्तम्' इत्यादिपुरुषसूक्तोक्तमन्त्रप्रत्यभिज्ञानाच्छ्वेताश्वतरोपानिषत् नारायणपरा। ननु 'या ते रुद्र शिवा तनूः' 'मानस्तोके तनये मा न आयुषि' इति रुद्राम्नातानेकमन्त्रप्रत्यभिज्ञानस्यापि सत्त्वेन तत्र विशेषपक्षपातस्य निर्मूलत्वम् । न च 'नान्यः पन्थाः' इति पुरुषसूक्तप्रत्यभिज्ञानमनन्यथासिद्धमिति वाच्यम् । कैवल्यश्रुतावपि 'उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्' इति प्रस्तुत्य 'ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये' इति श्रवणेन मुक्त्युपायत्वावधारणस्य पुरुषसूक्तप्रतिपाद्ये नारायणे व्यवस्थितत्वासिद्धेरिति चेत्— मैवम् । उक्तरीत्या श्वेताश्वतरोपानिषदः नारायणैकपरत्वे सिद्धे

तत्राम्नातमन्त्रप्रत्यभिज्ञानाद्रुद्रोऽपि नारायणपर एवेति सिध्यति ॥ ८६ ॥

न च रुद्रस्य शिवपरत्वप्रसिद्धिविरोधः, शिवपरत्वस्यापि स्वीकारात् । अन्यथाऽतीन्द्रियाणां शिवादीनामसिद्धिरेव स्यात् । किं तु महायोगविद्वद्रूढिभ्यां सर्ववेदानां श्रीनारायणपरत्वम् । वेदैकदेशानां रुद्रादीनामविद्वद्रूढ्या शिवादिपरत्वम् । अन्यथा 'ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषाः' 'सर्वे वेदा यत्पदमामनन्ति' इत्याद्यनेकश्रुतिविरोधापत्तेः । रुद्रादीनामन्यमात्रपरत्वे सर्ववेदप्रतिपाद्यत्वासंभवात् । न च सर्वशब्दस्य संकोचः, कारणाभावात् । अन्यथा सर्वदेवानामपि स्वस्वसूक्तप्रतिपाद्यत्वेन साधारण्यापत्तेः । 'यो देवानां नामधा एक एव' इत्यादिसावधारणश्रुतेश्च । अत्रायं विशेषः—यत्र देवतान्तरसाधारणगुणप्रतिपादनम्, तत्र परममुख्यया वृत्त्या नारायणपरत्वं, मुख्यवृत्त्या देवतान्तरपरत्वम् । यत्र नारायणासाधारणगुणपरत्वं, तत्र नारायणस्यैव प्रतिपादनं नान्यस्येति । यथा 'यदा तमः' इति मन्त्रे, अन्यस्य प्रलयकाले अभावात् । एतेन कैवल्यश्रुतिरन्तर्यामिभगवत्परैवेति सूचितं भवति, 'प्रशान्तम्' इति साधुत्वश्रवणात् । रुद्रस्य तु 'प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः' इति अन्तकत्वेन क्रूरत्वश्रवणात् ॥ ८७ ॥

अथवा तं ज्ञात्वा मृत्युमपमृत्युमत्येति परित्यजति मृत्योः रोगाद्विमुक्तये नान्यः पन्था इति व्याख्याने

प्रसिद्धशिवपरत्वं च भवति । न च प्रसिद्धार्थशिवपरमेवेदं भवतु, बाधकाभावादिति वाच्यम् । 'तत एते व्यजायन्त विश्वो हिरण्यगर्भोऽग्निर्यमो वरुणरुद्रेन्द्राः' इत्यादिना नारायणकार्यत्वेनावगतस्य रुद्रस्य परममोक्षजनकत्वासंभवात्, 'नेशानः' इत्यादिना महाप्रलये सत्त्वानिषेधाच्च । तदानीमेवाशेषानिष्टनिवृत्तिलक्षणमोक्षस्य दातव्यत्वात् । एतेन मुक्त्युपायत्वावधारणस्य पुरुषसूक्तप्रतिपाद्ये नारायणे व्यवस्थितत्वासिद्धेरित्यपहस्तितं भवति ॥ ८८ ॥

ननु वस्तुतो विचार्यमाणे पुरुषसूक्तं न नारायणपरम् । किं तु शिवपरमेव प्रतीयते । 'उतामृतत्वस्येशानः' इत्यत्र ईशानः इत्यभिधानश्रुत्या शिवपरत्वात् । न चेशानपदस्यैश्वर्ययोगेन साधारण्यमिति वाच्यम् । योगेन साधारण्येऽपि रूढ्याऽसाधारण्यात्, 'ईश्वरः शर्व ईशानः' इत्यभिधानादिना तत्र रूढेः सिद्धेः । केवलयोगापेक्षया योगरूढेः प्रबलत्वादिति चेत्— मैवम् । ईशान इत्यभिधानश्रुत्या पुरुषसूक्तस्य शिवपरत्ववत्, त्रिलोचन इत्यभिधानश्रुत्या योगरूढिभ्यामन्यासाधारणरूपयाऽन्यसंबन्धज्ञान[सापेक्ष]श्रुत्यपेक्षया अतिप्रबलया सहस्राक्षत्वप्रतिपादकस्य पुरुषसूक्तस्य रुद्रपरत्वबाध एव । तथा च 'एको नारायण आसीन्न ब्रह्मा नेशानः' इत्यादिनिषेधार्थं योगरूढेरुपयोगः । न तु पुरुषसूक्तप्रतिपाद्यतासिद्ध्यर्थम्, अत्यन्तासंभवात् ॥८९॥

तथाहि— आदावेव 'सहस्रशीर्षा पुरुषः' इति पुरुषशब्दः श्रूयते । तस्य च देवदत्तादिसाधारण्यनिरासार्थं

सहस्रशीर्षत्वादिलक्षणान्युच्यन्ते । 'पुरुष एवेदम्' इति सर्वनियामकत्वमुक्त्वा 'अमृतत्वस्येशानः' इति मुक्तवर्गनियामकत्वं च लक्षणमुच्यते। अत्रेशानशब्दस्य महायोगविद्वद्रूढिभ्यां परमात्मवाचित्वात् । तथा स्वाङ्गादेवतालोकादिसृष्ट्यादीन्यनन्तलक्षणान्युच्यन्ते । न चैतन्मध्ये एकैकमपि कपालभृतः संभावयितुमपि शक्यते । अन्यथा 'पुरुषं पशुम्' 'पद्भ्यां शूद्रो अजायत' इति पशुशूद्रादिशब्दश्रवणात्तेषामपि पुरुषसूक्तप्रतिपाद्यता स्यात् । स कः पुरुष इत्यपेक्षायाम् 'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे' इत्यादिलक्ष्मीपतित्वलिङ्गात्, 'सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम्। विश्वं नारायणं देवम्' इत्यादिसमाख्यया च नारायण एवेति सिद्ध्यति ॥ ९० ॥

किं च काठके 'अव्यक्तात्पुरुषः परः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' इति पुरुषस्य सर्वोत्तमत्वं मोक्षप्रदत्वं चोच्यते । स च पुरुषः नारायण एव । यतः 'मध्ये वामनमासीनं विश्वेदेवा उपासते' इति सर्वदेवोपास्यत्वेन सर्वोत्तमत्वम्, 'ईशानो भूतभव्यस्य' इति सर्वनियामकत्वं च वामनशब्दात्, 'तद्विष्णोः परमं पदम्' इति श्रीविष्णुशब्दाच्च पुरुषनामकस्य नारायणस्यैवोच्यते ॥

अथ च सुबालोपनिषदि 'पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति' 'नारायणाद्रुद्रो जायते नारायणाद्ब्रह्मा जायते' इत्यादिना ब्रह्मादिदेवतासृष्टिरुच्यते । तत्र हवैशब्देन पुरुषसूक्तादिषु प्रसिद्धिं सूचयति, पुरुषनारायण-

शब्दयोः पर्यायताऽवगमात् । एवं च नारायणस्यैव पूर्वोत्तरैकवाक्यतया श्रुत्यन्तरैकवाक्यतया च पुरुषसूक्त-प्रतिपाद्यता नान्यस्येति । एतेन ब्रह्मात्मशब्दादिवत्पुरुष-शब्दस्य नारायणे विद्वद्रूढिरुक्ता भवति ॥ ९१॥

न च न पुरुषशब्दस्य नारायणवाचकत्वमसाधारण्येन, किंतु 'पुरुषावात्ममानवौ' इत्याद्यभिधानकोशस्मृतेः, लौकिक-वैदिकप्रयोगप्राचुर्याच्च साधारणशक्तेरावश्यकत्वाच्च पुरुष-शब्दः साधारण एवेति वाच्यम् । विद्वन् ! त्वदुदाहृताभि-धानकोशस्मृत्यैव शक्त्यन्तरावगमात् । तथाहि— 'पुरुषा-वात्ममानवौ' इत्यत्र आत्मशब्देन साधारणशक्तेन सर्वात्मनां ग्रहणे मानवानामपि आत्मत्वात्पृथङ्मानवग्रहणं व्यर्थम् । पुरुषो मानवः इत्येव वा स्यात् । न च स्त्रीव्यावृत्त्यर्थं तत्, तासामप्यात्मत्वान्मानवत्वाच्च । तस्मादात्मशब्द [शब्देन] विशेषशक्त्या परमात्मग्रहणे इतरेषां ग्रहणार्थं मानवपदमपेक्षि-तमेव । मानवपदेन पुंव्यक्तिग्रहणेन स्त्रीव्यावृत्तिलाभात्, देवा-नामपि देवतापदप्राप्तेः पूर्वं मानवत्वात्पुरुषपदवाच्यतालाभः । तथा च तादृशात्मपदवाच्ये नारायणे इतरव्यावृत्त्या पुरुष-पदवाच्यताविधाने तादृशशक्तिविशेष एव सिद्ध्यति । अन्यथा विशेषग्रहणं व्यर्थं स्यादित्युक्तम् ॥

अत एव ऐतरेयोपनिषदि—'सर्वेषां भूतानामन्तरः पुरुषः सम आत्मेति विद्यात्' इति पुरुषात्मशब्दयोरन्तर्यामिणि विद्वद्रूढिरुच्यते । अतः अन्तर्यामी पुरुषः (इति) सम इति विद्यात् । उत्तमान्तर्यामी उत्तमः, अधमान्तर्यामी अधमः

इति न , किंतु एकरूप एवेत्यर्थः । अत एव 'यो देवानां नामधा एक एव' इति सर्वनामधेयत्वं विद्वद्रूढिं गमयतीति प्रागुक्तम्। तथा च पुरुषशब्दादपि पुरुषसूक्तं नारायणपरम् । एतेन विशेषशक्तिसाधकप्रमाणसद्भावाद्बर्हिराज्याधिकरणन्यायो निरस्तः ॥ ९२ ॥

किंच शिवस्य पुरुषसूक्तप्रतिपाद्यत्वे ईशानश्रुतिरेव प्रमाणं नान्यत् । तत्र 'अमृतत्वस्येशानः इति' मुक्तवर्गेशानत्वरूपयोगश्रवणात्केवलेशानपदरूढेर्बाधः । न च रूढिर्योगमप[हरति]-हन्ति' इति न्यायाद्रूढ्या-योगबाधः, किमुत योगरूढिभ्यां केवलयोगबाध इति वाच्यम् । तथा सति दुर्गेशानः , गजेशानः अश्वेशानः, नरेशानः, तथा नरेश्वरः, मुनीश्वरः, कपीश्वरः इत्यादावपि योगरूढिभ्यां शिवग्रहणापत्तेः। तस्मात्केवलेशानादिशब्दानां योगरूढिभ्यां शिवपरत्वेऽपि ससंबन्धिकानां चान्यपरत्वं तत्प्रकरणानुरोधात्कल्प्यते । अन्यथोक्तातिप्रसङ्गात् । तथा च पुरुषसूक्तस्य शिवपरत्वे का प्रत्याशा? ॥ ९३ ॥

एतेन ब्रह्ममीमांसायाम्–'शब्दादेव प्रमितः' इत्यधिकरणे 'अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः । ईशानो भूतभव्यस्य स एवाद्य स उ श्वः ॥' इत्यत्राङ्गुष्ठमात्र इति परिमितपरिमाणत्वलिङ्गाज्जीव इति प्राप्ते, 'ईशानः' इत्यभिधानरूपाच्छब्दात्परमात्मत्वनिर्णयेन तदसाधारण्यस्य स्फुटीकरणात् , तस्य च यौगिकत्वे परमात्मासाधारणशब्दान्तराभावात्, (अन्यथा) भूतभव्येशितृत्वलिङ्गादेव निर्णयमिति

'शब्दादेव' इति सूत्रमसंगतं स्यादिति 'अबद्धं पठित्वा कुचोद्यं करोति' इति न्यायेनोक्तमपहसिततं भवति। इहापि भूतभव्येशितृत्वश्रवणात् आभिधानिकशब्दग्रहणमसंगतमेव। अत एवास्मदाचार्यैः—'मध्ये वामनमासीनं विश्वे देवा उपासते' इत्युदाहृत्य 'वामनशब्दादेव विष्णुरिति प्रमितः' इति व्याख्यातम् ॥ ९४ ॥

किं च 'यो देवानां नामधा एक एव' इति श्रुतिव्याख्यानभूतसहस्रनामादिषु 'ईशानः प्राणदः प्राणः' इत्यादावीशानादिशब्दानां भगवद्वाचित्वस्य पूर्वोक्तविद्वद्रूढ्या अवगतत्वात्, तथा चेशानादिशब्दा अपि नारायणस्यैव वाचकाः। अभिधानाद्यपेक्षया भारतस्य वेदव्याख्यानरूपत्वेन प्रबलत्वात् ॥ ९५ ॥

ननु भारते 'स्तुवन्नामसहस्रेण' इत्युपक्रमेण सर्वात्मतया स्तोतुं प्रवृत्ते 'विश्वं विष्णुर्वषट्कारः' इत्यादौ सार्वात्म्याभिप्रायेण देवतान्तरनाम्नामपि बहूनां परिगणनदर्शनेन ततस्तेषां शक्तिसिद्ध्ययोगः। अन्यथा भारतलैङ्गादित्यपुराणादिषु पठितशिवसहस्रनामसु सर्वविष्णुनाम्नां सत्त्वात्सर्वेषां शिवनामत्वमेव स्यात् ॥

किं च, हरिवंशे कैलासयात्रायाम्—

नामानि तव गोविन्द यानि लोके महान्ति च।
तान्येव मम नामानि नात्र कार्या विचारणा ॥'

इति श्रीविष्णुं प्रति शिववचनेन विष्णुनाम्नामन्येषां च सार-

भूतानां नाम्नां शिवनामत्वसिद्धेः, अभिधानश्रुत्या क्वचिदपि विष्णुपरत्वनिर्णयो न स्यात् ॥

तस्मात् स्तुत्यर्थत्वगन्धरहितलोकवेदसाधारणनामगणनैदंपर्येण प्रवृत्ता अभिधानकोशस्मृतिरेव नामत्वे प्रमाणमिति ईशानशब्दस्य शिवनामत्वे व्यवस्थिते, ततः पुरुषसूक्तस्य शिवपरत्वनिर्णय एव युक्त इति चेत्-मैवम् ॥ ९६ ॥

'पुरुषावात्ममानवौ' इत्यभिधानकोशस्मृतेः, लौकिकवैदिकप्रयोगप्राचुर्याच्च देवदत्तादिरेव पुरुषसूक्तप्रतिपाद्यः किं न स्यात्? समुदायाभिप्रायेण सहस्रशीर्षत्वाद्युपपत्तेश्च। न चासंभवान्नैवमिति वाच्यम्, अभिधानकोशस्मृतिषु भास्वतामसंभवाभावात्। अन्यथा शिवेऽपि साम्यात् ॥

किं चाभिधानश्रुत्या सहस्राक्षशब्दस्य देवेन्द्रवाचकत्वात्, स एव पुरुषसूक्ताभिधेयोऽस्तु। किमीशानशब्दव्यसनेन? प्रत्युत 'अमृतत्वस्येशानः' इति ससंबन्धित्वेन रूढिबाधावगमात्। न च 'मुखादिन्द्रश्चाग्निश्च' इति पुरुषमुखादिन्द्रस्योत्पन्नत्वेन न तस्य पुरुषत्वमिति वाच्यम्। तथा सति 'दिशः श्रोत्रात्' इति पुरुषश्रोत्रादीशानदिगभिमानिनः ईशानस्योत्पत्तिश्रवणात् न पुरुषत्वमिति तुल्यम् ॥ ९७ ॥

न च 'दिशः' इति जडानामुत्पत्तिः, न देवतानामिति वाच्यम्। 'चन्द्रमा मनसो जातः' इति देवतोत्पत्तिप्रकरणात्। किं चैतत्समानार्थके ऐतरेयोपनिषदि 'अथातो विभूतयोऽस्य पुरुषस्य' इत्यारभ्य भगवदिन्द्रियेभ्यः देवतासृष्टिप्रकरणे

'श्रोत्रेण सृष्टा दिशश्च चन्द्रमाश्च' इत्यभिधाय 'एवमेते श्रोत्रं पितरं परिचरन्ति दिशश्च चन्द्रमाश्च' इति परिचारकत्वश्रवणाच्चन्द्रसहपाठाच्च देवतात्वं गम्यते। त्वदभिमतेशानस्तु दिग्विशेषः। स कथं पुरुषो भूयात्? तत्र कः पुरुष इत्यपेक्षायामन्ते 'ता एता देवताः सृष्टा अस्मिन्महत्यर्णवे प्रापतन्' इत्यादिना समुद्रशायी नारायण एव सर्वदेवताश्रय इत्युच्यते। एवं च कार्यभूतस्य रुद्रस्य न पुरुषसूक्तप्रतिपाद्यता। त्वदीयाभिधानस्मृत्युदाहरणं दिग्विशेषप्रयुक्तेशानशब्दवाच्यो रुद्र एवेति सिद्ध्या कार्यत्वसिद्धावुपयुक्तं भवति ॥ ९८ ॥

यदप्युक्तम्— 'स्तुवन्नामसहस्रेण' इत्युपक्रमेण स्तोत्रार्थं प्रवृत्तात् शक्तिसिद्धिर्न भवतीति— तन्न, तत्र नामसाहस्रस्य स्तोत्रसाधनत्वमुच्यते। सिद्धस्य हि साधनत्वम्। गुणिनिष्ठगुणाभिधानं स्तोत्रम्। तथा च महायोगविद्रूढिभ्यां विशिष्टगुणवद्वाचकानां स्तोत्रसाधनत्वेन परिगणनात्। तथा च कथं नामत्वासिद्धिः? 'यो देवानां नामधा एक एव' इति श्रुत्यैव सर्वनामत्वोक्तेश्च। अन्यथाऽस्य सर्वथाऽप्रामाण्यापत्तेः। न च स्तोत्रसाधनत्वमात्रेण वाच्यत्वाभावो वक्तव्यः। तथा सत्युपक्रमाधिकरणविरोधापत्तेः ॥

'अग्नेः ऋग्वेदः वायोः यजुर्वेदः आदित्यात्सामवेदः' इत्युपक्रम्य 'तस्मादुच्चैर्ऋचा क्रियते उपांशु यजुषा उच्चैः साम्ना' इति उपसंह्रियते। तत्र संशयः— उच्चैस्त्वादयः ऋगादिधर्मा उत वेदधर्मा इति। तत्र विधिवाक्यगतत्वा-

ऋगादीनां धर्मा इति प्राप्ते, असंजातप्रतिपक्षत्वाद्वेदधर्मा इति राद्धान्तितम् । तथा चोपक्रमस्य स्तुत्यर्थं प्रवृत्तत्वेन तत्रत्यवेदशब्दस्य मन्त्रब्राह्मणादिरूपसमुदायवाचकत्वं न स्यात् । किं तु ऋगादिपरत्वमेव स्यात् । तथा चोपक्रमोपसंहारयोर्विरोधाभावादेतदधिकरणं उच्छिन्नं भवेत् । एतेन सर्वात्मकत्वेन स्तोतुं इत्यादि मिथ्याज्ञानविजृम्भितं परास्तम्, अत्यन्तविरुद्धत्वात् । अस्यापवाद्यात्मकत्वोक्तौ स्तुतित्वाभावाच्च ॥ ९९ ॥

यदपि 'नामानि तव गोविन्द' इत्यादि, तदपि न । हे गोविन्द, यानि तव नामानि महान्ति लोके पौरुषेयागमे महादेवः, ईशानः इत्यादीनि, तान्येव मम नामानि त्वद्दत्तानि, देवदत्त तव यदन्नं तदेव ममेति प्रयोगवत् त्वद्दत्तं मदीयं भवति [इति हि तदर्थः] । अन्यथा तानि ममैव नामानि इति स्यात् ॥ १०० ॥

एतेन शिवसहस्रनाम्नामपि रूढ्या शिवपरत्वेऽपि महायोगविद्वद्रूढिभ्यां विष्णुपरत्वमित्युक्तं भवति । यथा इन्द्रशब्दस्य प्रवृत्तिनिमित्तमैश्वर्यं निरवधिकं भगवति अस्ति इति मुख्यस्तत्र इन्द्रशब्दः, अन्यत्र न तादृशः, तथा इतरशब्दा अपि इत्युक्तं भवति । तद्गतविष्ण्वादिनाम्नां च अन्तर्यामिपरत्वम् । रुद्रपुरुषयोः 'पुरुषो ह वा' इत्यादिवाक्येभ्यः कार्यकारणभावे सिद्धे 'अयं पितैते पुत्रा यत्र ह क्वचन पुत्रस्य तत्पितुर्यत्पितुस्तद्वा पुत्रस्य' इत्यैतरेयवाक्यानुसारेण पितृनाम्ना पुत्रस्तुत्युपपत्तेः । अन्यथा वेदविरुद्धानां

लैङ्गादिपुराणानामप्रामाण्यमेवेति वक्ष्यत इति ॥ १०१ ॥

किं च शिवस्येशानादिशब्दवाच्यत्वमुच्यते। तस्य च परब्रह्मत्वेनाभिमतत्वात्, परब्रह्मणि तव लक्षणाया एवेष्टत्वेन वाच्यत्वविधुरत्वात्। तथा च स्वव्याहतिर्दुर्वारैव। शिवस्य सर्वोत्तमत्वादिकं मिथ्येत्यादिकं तु इष्टापत्त्या निरस्तमेव। एतेन सामान्यशक्तस्यापि पुरुषशब्दस्य क्वचित्प्रकरणवशात् ब्रह्मणि पर्यवसानं 'पुरुषो ह वै नारायणः' इत्यादाविति निरस्तम्। 'यो देवानां नामधा एक एव' इत्यादिश्रुतयः सामान्यशक्तिं न सहन्त इत्युक्तत्वात्। अत एव—

'स एव वासुदेवोऽयं पुरुषः प्रोच्यते बुधैः।
प्रकृतिस्पर्शराहित्यात्स्वातन्त्र्याद्वैभवादपि॥

स एव वासुदेवोऽयं साक्षात्पुरुष उच्यते।
स्त्रीप्रायामितरत्सर्वं जगद्ब्रह्मपुरस्सरम्॥'

इत्यादिनृसिंहपुराणवचनं व्याख्यानरूपं संगच्छते ॥ १०२ ॥

एतेन लक्ष्मीपतित्वलिङ्गमपि ईशानश्रुत्यनुगुणप्रथमोपदिष्टह्रीशब्दार्थगौरीपतित्वलिङ्गानुगुण्यमेवावलम्बत इति निरस्तम्। ईशानश्रुतेर्दूषणभारेण पातालं प्राप्तत्वात्। 'यं कामये तं तमुग्रं कृणोमि' इत्यादिना लक्ष्मीपुत्रस्य गौरीपतेः कथं लक्ष्मीपतित्वम्?। 'महालक्ष्मीरिति ख्याता' इति शिवपुराणे गौर्यां लक्ष्मीशब्दप्रयोगात् रुद्रस्य लक्ष्मीपतित्वं युक्तमिति चेत्— तर्हि देवदत्तवल्लक्ष्मीपतित्वस्य रुद्रे सांकेतिकत्वेन मुख्यार्थायोगात्। शैवागमस्य वेदविरुद्धत्वेनाप्रामाण्यस्य वक्ष्यमाणत्वाच्च ॥ १०३ ॥

अथवा ह्रीशब्दस्य गौरीवाचित्वे मानाभावः, येन लक्ष्मीरित्येतत् ह्रीरित्येतदनुगुणं स्यात् । किं तु 'श्रीश्च ते लक्ष्मीश्च पत्न्यौ' इति वाजसनेयके पाठात् तदनुगुणं ह्रीशब्दस्य श्री (शब्द) परत्वम् । 'लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ।' इत्यमरोक्तेः । तथा च तैत्तरीयश्रुतौ श्रीशब्दस्थाने पठितस्य ह्रीशब्दस्य श्रीशब्दपर्यायत्वादेव लक्ष्मीवाचकत्वासिद्धिः ॥ १०४ ॥

न चाभिधानिक एवार्थो ग्राह्य इत्यस्माकं कुलधर्म इति वाच्यम् । तर्हि त्यज अम्बिकाम् , स्वीकुरु च लज्जाम् । आभिधानिकरूढेः सत्त्वात् । अनुपयोगान्नैवमिति तु प्रकृतेऽपि तुल्यम् ॥

किं च आभिधानिक एव सर्वत्रार्थो ग्राह्य इति वदन् पूर्वोत्तरमीमांसापरिज्ञानशून्य एव । अन्यथा 'आज्यैः स्तुवते' 'आकाशादेव समुत्पद्यन्ते' इत्यादावाभिधानिक-घृतगगनार्थत्वं पूर्वपक्षाभिप्रेयं परित्यज्य वाक्यशेषबला-देवाज्यशब्दस्य स्तोत्रार्थत्वं आकाशशब्दस्य परमात्मार्थत्वं च मीमांसाभिप्रेतं जानन्, तद्रीत्या कैमुत्यन्यायेन चाभि-धानिकलक्ष्मीपतित्वरूपवाक्यशेषबलात्, श्रुत्यन्तरगतश्रीपति-त्वसहपठितलक्ष्मीपतित्वरूपवाक्यशेषबलाद्वा ह्रीपदस्य लक्ष्मी-परत्वमजानन् कथमिमां शंकापिशाचीं कुर्यात् । गौर्यां श्रीशब्दस्य लक्ष्मीशब्दस्य ह्रीशब्दस्य वा सर्वथाऽऽभिधानिक-प्रयोगो नास्त्येव । वाक्यशेषानुगुण्यं च गगनकुसुमायमानम् ॥ १०५ ॥

एवं सति लक्ष्मीपतित्वलिङ्गमपि ईशानश्रुत्यनुगुणप्रथमोपदिष्टह्रीशब्दार्थगौरीपतित्वलिङ्गानुगुण्यमेवावलम्बत इति वाक्यमुन्मत्ताशिखामणेरेव शोभते नान्यस्य। अन्यथा आभिधानिकेशानश्रुतिबलादेव कृत्स्नपुरुषसूक्तस्य शिवपरत्ववदाभिधानिकलक्ष्मीश्रुतिबलादेव कृत्स्नं शिवपुराणं लक्ष्मीनारायणपरं कथं न ब्रूयात्? अन्यथा देवदत्तस्यापि ह्रीलक्ष्मीसंकेतितभार्याद्वयसत्त्वेनात्र प्रतिपाद्यतापत्तेः। रुद्रस्य तु कार्यभूतस्य पुरुषसूक्तोक्तगुणलेशाभावस्योक्तत्वाच्च ॥

किं चाभिधानिकश्रुतिरेव वाच्यत्वे प्रमाणं नान्यत्, स्तुत्यर्थे प्रवृत्तत्वादिति स्वयमेवोक्तत्वेन गौर्यां लक्ष्मीपदवाच्यत्वे अन्यदुदाहरन् कथं व्याहतभाषी न भवेत्? न ह्याभिधानादिषु लक्ष्मीपदस्य गौर्यां प्रयोगोऽस्ति। सत्त्वे वा 'मुख्यामुख्ययोर्मुख्ये [कार्य]संप्रत्ययः' इति न्यायेन मुख्यलक्ष्मीपतित्वस्यैव ग्राह्यत्वाच्च। अन्यथा देवदत्तस्यापि ग्रहणं स्यादित्युक्तत्वात् ॥ १०६ ॥

न च श्रीशब्दस्य 'श्रियं लक्ष्मीमौपलामम्बिकां गां षष्ठीं जयामिन्द्रसेनेत्युदाहुः' इत्यायु[ष्य]ष्मत्सूक्ते गौर्यां दृष्टप्रयोगत्वादिति वाच्यम्। आभिधानिकश्रुतिबलादेव आयु[ष्य]ष्मत्सूक्तस्य त्वदुक्तन्यायेनैव श्रीलक्ष्मीपरत्वात्। न च 'ह्रीश्च ते' इति मन्त्रस्य ग्रहयागे सोमाधि(मप्रत्यधि)देवताया गौर्याः पूजायां विनियोगस्य स्मृत्यर्णवादिषूक्तत्वेन ह्रीपदस्य गौरीपरत्वावश्यंभाव इति वाच्यम्। किमेतावता? 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यत्र इन्द्रपदस्य गार्हपत्ये गौणत्ववत्

ह्रीपदस्यापि गौर्यां गौणत्वोपपत्तेः । लक्ष्मीपदसमभिव्याहृत-श्रीपदस्थानपठितस्य ह्रीपदस्य [तु] लक्ष्मीवाचकत्वमेव, अन्य-वाचकत्वे प्रमाणाभावात्, प्रमाणविरोधात्, प्रकृतानुपयोगाच्च ॥ १०७ ॥

एतेन तस्मात्प्रथमश्रुतानुगुण्येन 'लक्ष्मीश्च पत्न्यौ' इति,

'तस्याङ्कमण्डलारूढा शक्तिर्माहेश्वरी प[व]रा ।
महालक्ष्मीरिति ख्याता श्यामा सर्वमनोहरा ॥'

इति शिवपुराणोक्तशिवाङ्कस्थिताम्बिकांशविशेष [रूपत्वलिङ्ग-मीश्वरपर] पुरुषलक्ष्मीपतिपरमेवेति पूर्वोत्तरविरुद्धमुन्मत्तवचन-मपहास्तितम् । अम्बिकांशविशेषपुरुष(पुरुषविशेष)लक्ष्मीपतिमिति पाठे अम्बिकांश[शो यः]पुरुषविशेषः तस्य लक्ष्मीत्वमित्यर्थाङ्गी-कारे कथं पुरुषसूक्तं रुद्रपरं स्यात्? तस्य लक्ष्मीत्वाभावात् । भग-वत एव लक्ष्मीपतेर्देवकीवसुदेवपुत्रत्वोपचारवत् अम्बिकांशत्वो-पपत्तेः । अन्यस्याम्बिकांशपुरुषविशेषस्य अम्बिकानामकलक्ष्मी-पुत्रत्वेन तत्पतित्वानुपपत्तेश्च । उदाहृतशिवपुराणश्लोके अम्बि-कांशपुरुषविशेषाप्रतीतेश्च ॥

अथ अम्बिकांशविशेषरूपलक्ष्मीपतित्वमिति पाठे तदा अम्बिकांशविशेषरूपा या लक्ष्मीस्तत्पतित्वं रुद्रस्येति अर्थो भवति । तदा वक्तव्यं महालक्ष्मीशब्दस्याम्बिकायां शक्तिः गौणी वृत्तिर्वा इति । नाद्यः, अभिधानश्रुतेरभावात् । अभि-धानश्रुतेरेवासाधारण्येन वाच्यत्वे प्रमाणत्वेन, अन्यस्य स्तोतुं प्रवृत्तत्वेन वाच्यत्वेऽप्रमाणत्वादिति स्वयमेवोक्तत्वात् । अन्य-

था सिंहो देवदत्त इत्यादावपि सिंहादिपदानां देवदत्तादौ शक्तिकल्पनापत्तेः। तस्माद्गौणी वृत्तिरिति द्वितीयपक्षो ज्यायान्। अत एव लोके अल्पैश्वर्ययोगेऽपि राजपत्न्यादौ महालक्ष्मीपदप्रयोगो दृश्यते। शिवपुराणाप्रामाण्यस्य वक्ष्यमाणत्वात्। तस्माल्लक्ष्मीपतित्वलिङ्गादपि पुरुषसूक्तं नारायणपरम्॥ १०८॥

लक्ष्मीपतित्वं कादाचित्कं भवतीत्यत आह– 'अहोरात्रे पार्श्वे' इति। श्रीलक्ष्मीरूपपत्न्यौ सर्वदा पार्श्वभागे भगवत्सेवां कुरुतः। अनेन सर्वैश्वर्याभिमानिनी महालक्ष्मीः स्वस्वरूपैरवियोगेन नित्यं भगवत्सेवां करोतीत्युक्त्या नित्यं निरवधिकमैश्वर्यं पुरुषसूक्तप्रतिपाद्यस्य लभ्यते। न चैतत् भिक्षुकस्य कपालभृतः संभावनार्हम्। अतः 'अहोरात्रे' इति शिवस्यार्धनारीश्वरात्मकं रूपमुपदिश्यत इत्यपहास्तितं भवति, अत्यन्तासंगतत्वात्, शिवप्रसक्तेरेवाभावात्, ह्रीश्रीभ्यां भागद्वयस्यापहृतत्वाच्छिवस्य शून्यतापत्तेश्च। ईशानश्रुतेश्च दूषणभारेण पातालमेव प्राप्तत्वात्॥ १०९॥

किं च विष्णुपुराणादिषु पुरुषसूक्तार्थप्रक्रियया नारायणस्तुतिदर्शनेन, 'पुरुषेण नारायणेन यजमान उपतिष्ठते' 'अथ नारायणाभ्यामुपस्थानम्' इत्यादिकल्पसूत्रेषु नारायणसमाख्ययाऽपि पुरुषसूक्तं नारायणपरम्। न च सा तदृषित्वनिबन्धनेति वाच्यम्। तद्देवताकोद्देशदर्शनात्। अधमऋषीणामपि तत्र तत्र बहुलमुपलम्भेन तत्समाख्याया अदर्शनात्। अन्यथा 'अग्नेः ऋग्वेदः वायोर्यजुर्वेदः' इत्यादिना वेदानाम-

पौरुषेयत्वेन जन्यत्वासंभवात् तत्तद्दृष्टत्वेन तत्तदृषिकत्वस्या-वश्यंभावात् कृत्स्नऋग्वेदस्य अग्निऋषिकत्वेन तदन्तःपाति-पुरुषसूक्तस्यापि अग्निऋषिकत्वादग्निसमाख्या स्यात् ॥

अपि च भागवते दशमस्कन्धे—

ब्रह्मा तदुपधार्याथ सह देवैस्तया सह ।
जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः ॥
तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिम् ।
पुरुषं पुरुषसूक्तेन [ह्य] उपतस्थे समाहितः ॥'

इत्यादिना पुरुषनामकस्य नारायणस्य पुरुषसूक्तेनैव रुद्रादि-देवसहितेन ब्रह्मणा उपस्थानस्य कृतत्वात् पुरुषसूक्तं नारायण-परमेव ॥ ११० ॥

न चैवं बाधूलसूत्रे पुरुषसूक्तस्य नारायण ऋषिः पुरुषो देवतेति भेदेनोपादानं कथमिति वाच्यम्, रूपद्वयेन तदुपपत्तेः, मूलमन्त्रादौ तथैव दर्शनाच्च । अत एवास्य सूक्तस्य मूलमन्त्रे परिगणनं युज्यते । अन्यथा सूक्तान्तरसाम्यापत्तेः । असाधारण्यं त्वनुपदमेव वक्ष्यते । न च नारायणस्य ऋषित्वेन स्तावकत्वं, देवतात्वेन तद्विरुद्धं स्तुत्यत्वं [च] कथमेकस्यैव स्यादिति वाच्यम् । 'न ऋते त्वत्क्रियते किं चनारे महामर्कं मघवन् चित्रमर्च' इति श्रुतिप्रतिपन्नस्वातन्त्र्यादेकस्यैव पूज्यत्वं पूजकत्वमितिवत् तदुपपत्तेः । न ह्यनन्तगुणपूर्णस्य नारायणस्य साकल्येन स्तवने अन्येषां अधिकारोऽस्ति । अत एव स ब्रह्मादिदेवैः स्तुतिं कारयति इति प्रयोजककर्तृत्वादृषित्व-मुपपन्नम् ॥ १११ ॥

अपि चाशेषवेदप्रतिपाद्यनारायणसमाराधने विनियोगात्पुरुषसूक्तं विशेषतो नारायणपरम्। यदत्र प्रलपितं— 'नारायणसमाराधने विनियोगेऽपि ईशानश्रुतिप्राप्तं पुरुषसूक्तस्य शिवपरत्वं न बाध्यते। अग्निर्मूर्धेति मन्त्रस्याग्निरिति अभिधानश्रुत्या अग्निपरस्यापि अंगारकपूजादौ विनियोगेऽपि न तत्परत्वं [यथा], तद्वत्पुरुषसूक्तस्यापि इति। तदपि मन्दम्, ईशानश्रुतेः ससंबन्धित्वेन शिवपरयोगरूढिबाधात्। अन्यथा अश्वेशानः गजेशानः भार्ये[दुर्गे]शानः इत्यादावपि रुद्रप्रतीतिः स्यादिति उक्तत्वात्। तथा चेशानश्रुत्यापि शिवपरत्वमेव शशशृङ्गायमानम्। तथा 'अग्निर्मूर्धा' इति मन्त्रस्याङ्गारकपरत्वाभावे त्वमेव पूर्वं 'ह्रीश्च ते' इति मन्त्रस्य गौरीपूजायां विनियोगात् तत्परत्वमेवेति कथमवादीः? तथा चात्रापि अङ्गारकपरत्वं त्वया कथंचिद्वक्तव्यमेव। अन्यथा स्वव्याहतिः स्यात् ॥११२॥

वस्तुतस्तु 'ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषाः' इत्यादिना सर्ववेदप्रतिपाद्यतायाः [नारायणे] उक्तत्वेन सर्वे मन्त्राः नारायणपूजायां स्वत एव प्राप्ताः। तत्परित्यागेन पुरुषसूक्तस्यैव विनियोगेऽतिशयो लब्धः। अतिशयश्चान्तरङ्गासाधारणबहुसारगुणप्रतिपादकत्वेन। तथा च स्कान्दे—

'तस्मिन्काले महाराज राम एवाभिधीयते।
यथा हि पौरुषे सूक्ते विष्णुरेवाभिधीयते॥'

ब्राह्मे च—

'यथैव पौरुषं सूक्तं नित्यं विष्णुपरायणम्।
तथैव मे मनो नित्यं भूयाद्विष्णुपरायणम्॥'

चतुर्वेदशिखायां च— 'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् इत्येष ह्येवाचिन्त्यः परः परमो हरिरादिरनादिरनन्तोऽनन्तशीर्षोऽनन्ताक्षोऽनन्तबाहुरनन्तगुणोऽनन्तरूपः' इति ॥

ब्रह्मसंहितायां च—

'यथा हि पौरुषं सूक्तं विष्णोरेवाभिधायकम् ।
न तथा सर्ववेदाश्च (सर्व)वेदाङ्गानि[च]नारद ॥' इति ॥

एतेन 'यजेत्पुरुषसूक्तेन धनदं विश्वरूपिणम् । अनन्तरूपिणं...' इत्यादि भगवत्परतया व्याख्यातं भवति ॥११३॥

ननु बोधायनसूत्रे श्रीरुद्राङ्गन्यासेषु शिवसंकल्पादिभिः सह पुरुषसूक्तस्य विनियोगोऽस्ति । तथा लिङ्गपुराणे शिवपूजाविधौ —

ज्येष्ठसाम्नां त्रयेणैव तथा देवव्रतैरपि ।
रथन्तरेण पुण्येन सूक्तेन पुरुषेण च ॥'

इति शिवाभिषेके देवव्रतादिभिः सह विनियोगः प्रतीयत इति चेत्—भ्रान्तोऽसि । त्वदुक्तन्यायेनैव ईशानश्रुतिबलादेव पुरुषसूक्तस्य शिवपरत्ववत् लक्ष्मीश्रुतिबलादेव शिवपदस्य लिंगपुराणे नारायणपरत्वादित्युक्तत्वात् ॥

किं च आश्वलायनादिसूत्रादिषु श्राद्धादिकर्मणि धर्मशास्त्रादौ (च) संन्यासिबृन्दावनपूजादौ च शुभाशुभकर्मणि विनियोगेन च पुरुषसूक्तस्य तत्तत्परत्वसंभावनाऽऽपत्तेः । अत्यन्ता-

संभावितत्वान्नैवमिति यदि, तदा शिवेऽपि तुल्यम् । ईशानाभिधानश्रुतेस्तु दूषणभारेण पातालमेव प्राप्तत्वादित्युक्तत्वात् ॥

अत एव लिङ्गपुराणे 'पुण्येन' इति पुरुषसूक्तं प्रशस्य शिवपूजादौ विनियुक्तम् । पुण्यत्वं च तस्यासाधारण्येन सर्वोत्तमपुरुषप्रतिपादकत्वादेव । सर्वोत्तमत्वं च पुरुषस्य काठके 'पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' इत्युक्तम् । तस्य च विष्णुत्वं 'तद्विष्णोः परमं पदं' इति उपसंहारान्निर्णीयत इति समर्थितं प्राक् । अत एवान्तर्यामिस्मरणेन कर्मसाफल्यसिद्ध्यर्थमेव शिवार्चनविधौ श्राद्धादौ च पुरुषसूक्तस्य विनियोगः ॥ ११४ ॥

अपि च उपबर्हण[बृंहण]मपि विष्णुपुराणादिदृष्टं पुरुषसूक्तं विष्णुपरं ज्ञापयति । ननु तदन्यथासिद्धम् । अन्यदेवत्यमन्त्राणामन्यत्र विनियोगे यजनीयदेवताप्रकाशकत्वमन्तरा निर्वाहासंभवात्तत्र लक्षणादिना तत्सम[वेतविशेषणादि]भिव्याहृतपदानां तु तद्विशेषणगुणादिप्रकाशकत्वद्वारा तत्र पर्यवसानं वाच्यम् । तत उपबृंहणं पुरुषसूक्तस्य विष्णुपूजादौ विनियोजकप्रकारसाधकमात्रं, न तु तत्परत्वप्रतिपादकम्, अन्यथासिद्धत्वात इति चेत्— भ्रान्तोऽसि । अन्यदेवत्यमन्त्रस्य अन्यदेवतायां [देवत्ययजनादौ] श्रुत्यादिभिर्विनियोगे सिद्धे विनियोजकप्रमाणमेव तत्र निर्वाहं कल्पयिष्यति, न तु प्रमाणान्तरमपेक्षते ॥

न हि 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यत्र ऐन्द्रमन्त्रे गार्हपत्ये श्रुत्या विनियुक्ते इन्द्रपदस्य गार्हपत्ये गौणत्व-

सिद्ध्यर्थं प्रमाणान्तरापेक्षा भवति। अन्यथा निर्वाहकप्रमाणबलादेव तत्र विनियोगसिद्धौ 'ऐन्द्र्या गार्हपत्यम्' इति श्रुतिद्वयं व्यर्थं स्यात्। तथा श्राद्धादिष्वपि पुरुषसूक्तस्य विनियोगसिद्ध्यर्थं उपबर्ह[बृंह]णादिकमपेक्षितं स्यात्। तस्मादनन्यथासिद्धमुपबर्ह[बृंह]णं पुरुषसूक्तस्य नारायणपरत्वं साधयतीति ॥११५॥

ननु दृश्यन्तेऽन्यत्रापि असमवेतार्थविशेषणस्यापि मन्त्रस्य [तथैव]तद्दैवत्यपुराणेषु उपबर्ह[बृंह]णानि। वायुसंहितायां—

'सोमं ससर्ज यज्ञार्थं सोमाद्द्यौः समजायत।
धरा च वह्निः सूर्यश्च वज्रपाणिः शचीपतिः॥

विष्णुर्नारायणः श्रीमान्सर्वं सोममयं जगत्।' इति॥

मैवम्। 'वाग्वै माता प्राणः पुत्रः' इत्यादौ वाचा अभिव्यक्तत्वात्प्राणस्य पुत्रव्यपदेशवत् सोमयागेनाभिव्यक्तास्ता [जाता] जानिता इत्युच्यन्त इत्यदोषः। अथवा तत्तद्देवतापदप्राप्तिः सोमयागेनोच्यते, काम्याकाम्यभेदात्। लिंगपुराणे पुरुषसूक्तस्य शिवपरत्वप्रतिपादकानि उपबर्हणानि सन्तीति तु लिङ्गपुराणस्याप्रामाण्यव्युत्पादनेन तोष[दूष]यिष्यामः। तस्मादनेकप्रकारैः पुरुषसूक्तस्य नारायणैकपरत्वात्तन्मन्त्रप्रत्यभिज्ञानेन सर्ववेदप्रतिपाद्यत्वेन च श्वेताश्वतरमन्त्रसन्दर्भस्य नारायणैकपरत्वान्न शिवपरत्वप्रत्याशा ॥११६॥

न च हररुद्रमहेश्वराद्यनेकाभिधानश्रुत्या प्रापितमस्य शिवपरत्वं कथं विरुद्धमन्त्रप्रत्यभिज्ञानमात्रेण बाध्यत इति

वाच्यम् । 'यो देवानां नामधा एक एव' इति श्रुतेः सर्वाभिधानश्रुतीनां भगवदेकवाचित्वस्य व्यवस्थापितत्वात् । किं तु न्यायानभिज्ञत्वं परस्य दर्शयितुं पुनः पुनः प्रयत्नः ॥

एतेन हररुद्रमहेश्वरादिशब्दानां चासाधारण्येन शिवाभिधानश्रुतित्वं ईशानशब्दवदेवावगन्तव्यमित्यपहस्तितं भवति । 'अमृतत्वस्येशानः' इति ससंबन्धिकेशानशब्दग्रहणात्तस्य च अश्वेशानः [दुर्गे]भार्येशानः इत्यादाविव रुद्रवाचकत्वासंभवस्योक्तत्वात्तद्दृष्टान्तोक्तौ हररुद्रमहेश्वरशब्दानामपि रुद्रपरत्वं नास्तीति फलितं भवति ॥ ११७ ॥

एतेन एवं चास्यामुपनिषदि कार्त्स्न्येन शिवपरायां 'भूयः सृष्ट्वा पतयस्तथेशः सर्वाधिपत्यं कुरुते महात्मा ।' 'स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः' 'छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति । अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः' इत्यादिमन्त्रान्तराणि शिवस्य जगत्कारणत्वप्रतिपादकानीत्यनुसन्धेयमित्यपहस्तितं भवति, कार्त्स्न्येन शिवपरत्वस्य मनोरथमात्ररूपत्वात् । सर्वाधिपत्यादिगुणानां च शिवेऽत्यन्तासंभावितत्वात् ॥ ११८ ॥

एतेन कारणे ब्रह्मणि निश्चिते किं तद्ब्रह्मेति जिज्ञासायां शिव इति निर्णयो युज्यते । तस्यैवानन्तरं कृत्स्नयाऽप्युपनिषदा सर्वकारणत्वसर्वाधिष्ठातृत्वयोः प्रपंच्यमानत्वादिति निरस्तम् । प्रलयकाले 'नेशानः न शंकरः' इत्यादिना सत्त्वस्यैव निषेध्य-

त्वेन पूर्वकालवृत्तित्वाभावाच्छिवस्य सर्वकारणत्वसर्वाधिष्ठातृत्वयोः गगनकुसुमायमानत्वात् ॥ ११९ ॥

यदप्युक्तं 'यदा तमः' इति मन्त्रे सर्वकारणवाक्यानां शिवविषयत्वस्य कण्ठतः प्रतिपादनाद्व्यर्थः परेषां विषयान्तरोपसंहाराय छागपशुन्यायसंभ्रम इति । तत्तुच्छम् । 'यदा तमः' इत्यत्र त्वया भ्रान्त्या सर्वकारणवाक्यानां शिवपरत्वमिति(कृतः)उक्तत्वेऽपि मन्त्रे तद्वाचकपदादर्शनात् । तथा च यत्र कारणवाक्ये निर्णायकं ब्रह्मादिपदं न दृश्यते (यथा) 'भूयः सृष्ट्वा पतयस्तथेशः सर्वाधिपत्यं कुरुते महात्मा' इत्यादौ, तत्र छागपशुन्यायेन, यतो वेत्यादिना 'नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते' इत्यादिनिरवकाशवाक्यानुरोधेन [च] नारायणपरत्वम् ॥

तथा हि— 'छागो वा मन्त्रवर्णात्' इत्यत्राधिकरणे 'पशुना यजेत' इत्यत्र यः कश्चित्पशुर्ग्राह्यः उत छागो वेति संशये अविशेषेण यः कश्चिदिति प्राप्ते 'छागस्य वपाया मेदसोऽनुब्रूहि' इति मन्त्रे छागस्य प्रकाशनात् छाग एव ग्राह्यः इति सिद्धान्तितम् । तन्न्यायेनेहापि सर्वकारणवाक्येषु नारायण एव सर्वकारणमिति निर्णीयते । तस्माच्छिवस्य सर्वकारणत्वमित्याशामात्रमिति दिक् ॥ १२० ॥

यच्चोक्तं— तथा यो देवानामिति मन्त्रोऽपि सर्वदेवप्रथमहिरण्यगर्भजनयितृत्वेन शिवस्य सर्वकारणत्वमाविष्करोतीति, तन्न । एवं हि मन्त्रः— 'यो देवानां प्रथमं पुरस्तात् विश्वा-

धिको रुद्रो महर्षिः । हिरण्यगर्भं पश्यत जायमानं स नो देवः स तया स स्मृत्या संयुनक्ति ॥' इति । तत्र हिरण्यगर्भजनयितृत्वस्याश्रवणात । 'जायमानं पश्यत' इति श्रवणादिति चेत्— किं तावता तत्कर्तृत्वम्? तथात्वे स्वकन्यामङ्गलसूत्रबन्धनं पश्यतः पितुः तत्कर्तृत्वं स्यात् । किं तु नारायणाज्जायमानं ब्रह्माणं अपश्यत । तथा च 'नारायणाद्ब्रह्मा जायते' इत्यस्यानुवादः, यच्छब्दश्रवणात् । न च भवन्मते रुद्रस्य ब्रह्मोत्पत्त्यनन्तरमुत्पन्नत्वेन कथं तदुत्पत्तिदर्शनमिति वाच्यम् । अत एव 'विश्वाधिको रुद्रो महर्षिः' इति विशेषणम् । कालत्रयवृत्तिवृत्तान्तदर्शित्वं भगवत्प्रसादादृषीणामस्त्येवेति प्रसिद्धम् । तथा च अतीतमपि ब्रह्मजन्म रुद्रोऽपश्यत् इति युज्यते ॥

अथवा भागवतादौ सर्गादिसृष्टिर्द्विविधोक्ता— सूक्ष्मसृष्टिः स्थूलसृष्टिश्चेति । तत्र सूक्ष्मसृष्टौ रुद्रस्यापि सूक्ष्मरूपेणोत्पन्नत्वान्महर्षिरुद्रः स्थूलसृष्टौ जायमानं हिरण्यगर्भं पश्यतेति युक्तमेव । एतेन 'नारायणाद्ब्रह्मा जायते' इत्यस्य नायमनुवादः । एतदर्थस्य पशुपतेर्हिरण्यगर्भजनयितृत्वस्य ततः प्राप्त्यभावात् । न हि प्राप्त्यसंभवे यदुपबन्धसहस्रेणापि शक्यते कल्पयितुमनुवादत्वमित्यपहस्तितं भवति । पशुपतेर्हिरण्यगर्भजनयितृत्वस्य एतदर्थत्वस्यासंभावितत्वात् ॥
॥ १२१ ॥

किं च लोके यद्येन कृतं न तत्तेन दृष्टमिति व्यवहारः । इदं पद्यं न मया कृतं किं तु प्राक्तनमेव मया दृष्टं

घटोऽयं मया दृष्टः न कृत इति व्यवह्रियते, असाधारण्येन व्यपदेशा भवन्तीति न्यायात् । तथा च हिरण्यगर्भं जायमानं अपश्यत इत्युक्त्यैव हिरण्यगर्भकारणत्वं रुद्रस्य नास्तीति ध्वनितम् । तथा चेदं वाक्यं रुद्रस्य सर्वकारणत्वे भ्रान्त्योदाहृतम् ॥ १२२ ॥

किं च रुद्रस्य हिरण्यगर्भकारणत्वे पश्यतेति महर्षिरिति च व्यर्थम् । न हि कुलालः स्वजन्यं घटं पश्यत महर्षिरित्युच्यते । अस्मत्पक्षे तु अस्मास्वदृष्टमतीतदर्शनं रुद्रस्य कथं स्यादिति प्रश्ने इन्द्राद्यपेक्षयाऽधिकत्वान्महर्षित्वादिति उक्तं भवति ॥ १२३ ॥

अपि चास्य वाक्यस्य लक्षणादिना रुद्रस्य ब्रह्मकारणत्वपरत्वे च 'नारायणाद्ब्रह्मा जायते' 'नारायणाद्रुद्रो जायते' इत्यादिनिरवकाशवाक्यविरोधो वज्रलेपायत एव । नारायणपदस्य शिवे लक्षणाङ्गीकारान्न विरोध इति चेत्— न, तथात्वे शून्येऽपि लक्षणासंभवेन शून्यस्यैव जगत्कारणतापत्तेः । न चोभयोः कारणत्वं, अत्यन्ताप्रामाणिकत्वात् । न च श्वेताश्वतरमन्त्रे 'हिरण्यगर्भं जनयामास पूर्वं' इत्यस्य पाठादिति वाच्यम् । किमेतावता शिवस्य तत्कारणत्वं प्राप्तम्? तज्ज्ञापकाभावात् । 'नारायणाद्ब्रह्मा जायते' इति निरवकाशवाक्यबलान्न..यणपरत्वस्यैव संभवात् । श्वेताश्वतरोपनिषदः नारायणैकपरत्वस्य समर्थितत्वाच्च ॥ १२४ ॥

किं चास्यामुपनिषदि 'किंकारणं ब्रह्म' इति परब्रह्म-

कारणत्वश्रवणात्तस्य च ब्रह्मशब्दस्य भगवदेकनिष्ठत्वस्य व्यवस्थापितत्वात् हिरण्यगर्भकारणत्वं नारायणस्यैव निश्ची-यते । अत एव,

अव्यक्तादभवत्स्थाणुः शिवः परमकारणः ।
सत्कार्यकारणोपेतः ऋषिर्विश्वाधिकः प्रभुः ॥

देवानां प्रथमं देवं जायमानं मुखाम्बुजात् ।
ददर्श चाग्रे ब्रह्माणं चाज्ञया तमवैक्षत ।
दृष्टो रुद्रेण देवेशः ससर्ज सकलं जगत् ॥'

इति लैङ्गे तथैवोपबर्हणाच्चेति स्वप्रतिकूलमेव अनुकूलमिति भ्रान्त्या उदाजहार । अव्यक्तान्मूलकारणत्वाभिमतस्य शिवस्य [हि] जन्मोक्तिर्महाप्रतिकूला । तामसेऽपि पुराणे हिरण्यगर्भकारणत्वानुक्तेश्च, ददर्श चाग्रे ब्रह्माणमिति, रुद्रेण दृष्ट इति [च] दर्शनमात्रोक्तेश्च, सत्कार्यकारणोपेत इति कारणोपेतत्वस्य कण्ठतः श्रवणाच्च कथमस्य सर्वकारणत्वं संभाव्यते ? ॥ १२५ ॥

यदपि यो[यद्]वेदादाविति मन्त्रस्योपक्रमोपसंहारबलाच्छिवपरत्वमिति । तदपि मन्दम् । एवं हि मन्त्रः 'यो[यद्]वेदादौ स्वरः प्रोक्तो वेदान्ते यः [च] प्रतिष्ठितः । तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥' इति । तत्र पूर्ववाक्ये 'अणोरणीयान्महतो महीयानात्माऽस्य जन्तोर्निहितो गुहायाम्' इति नारायण एवोच्यते, आत्मशब्दात् । एतदर्थमेव 'आत्मा नारायणः परः' इत्युक्तेः । तस्य प्रसादाद्धि रुद्रस्य स्वपदप्राप्तिः, 'अस्य देवस्य मीढुषो वया विष्णोः' इति मन्त्रस्योदाहृतत्वात् । 'धातुः प्रसादान्महिमानमीशम्'

इत्युपक्रमस्तवाभिप्रेतः । तत्र हि धारकत्वाद्धाता भगवान् तस्य प्रसादादेव महिमा यस्य तं ईशं रुद्रं जानीहीति वा, रुद्रः ईशत्वं प्राप्नोतीति वा, पश्यतीति वा भगवत्प्रसादलब्धं ईशत्वं रुद्रस्योच्यते । तदेवोपपादयति—'विश्वाधिको रुद्रो महर्षिः' इत्यादिना । अन्यथा धातुः प्रसादादित्यनन्वितं स्यात् । तथा च कथमिदं प्रकरणं शिवपरमाशास्यते ॥ १२६॥

ननु योगरूढ्या अन्य[इ]तरासाधारण्येन शिवस्य सर्वोत्तमत्वप्रतिपादनात्कथमस्य धातुः प्रसादादीशत्वमिति शंकानिरासार्थं यो वेदादाविति मन्त्रः प्रवर्तते । अस्यार्थः—'स्रवत्यनोंकृतं ब्रह्म परस्ताच्च विशीर्यते' इत्यादिप्रमाणबलात् यः वेदादौ स्वरः ओंकारः उच्चारितः अन्ते[वेदान्ते]चोच्चारितः तस्यानुच्चार्यमाणस्य प्रणवावयवेषु लीनत्वोपचारः, नित्यत्वेन मुख्यासंभवात् । तस्य चाष्टावयवाः अकारोकारमकारनादघोषबिन्दुशान्तातिशान्तसंज्ञकाः, 'प्रणवोऽष्टार्णवः स्मृतः' इत्युक्तेः । तथा च प्रणवतदवयवार्थः नारायणः 'तदेव ब्रह्म परमं कवीनाम्' इत्युक्तमेव । (ओमिति ब्रह्मेति) 'ओमिति ब्रह्म' 'ओमित्येतदक्षरमुद्गीथमुपासीत' इत्यादौ च ओंकारादिवाच्यं यच्च 'अः इति ब्रह्मेति' तदवयवभूताकारवाच्यं नादघोषादिवाच्यं च 'सर्वे वेदाः सर्वे घोषाः' इति श्रुतेः, तत्परं ब्रह्म यः परः सावयवोङ्कारविषयः इत्यनूद्य स महेश्वर इति तस्यैव महेश्वरत्वं सर्वोत्तमत्वं विधीयते, न शिवस्येत्यर्थः । तथा चाभिधानाद्यविद्वद्रूढ्या महेश्वरपदस्य शिववाचित्वेऽपि विद्वद्रूढ्या भगवदेकवाचित्वम् ॥ १२७ ॥

स क इत्यपेक्षायां 'नारायणं महाज्ञेयं विश्वात्मानं परायणं' इति प्रवृत्तम् । तत्पूर्वं च 'सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम् । विश्वं नारायणं देवमक्षरं परमं पदम् ॥' इत्यादिना पुरुषसूक्तोक्तप्रकारेण पूर्णसुखत्वादिना नारायणस्य सर्वोत्तमत्वमहिमा प्रपंच्यते । अन्यथा शिवरूपताविधौ तात्पर्यांगीकारे 'धातुः प्रसादात्' 'नारायणं महाज्ञेयम्' इत्यादिपूर्वोत्तरवाक्यजातं विरुद्धमत्यन्तासंगतं च स्यात् । अत एव दहरोपासना भगवद्विषयैवेति निश्चितं नारायणं महाज्ञेयमिति मुख्यज्ञेयत्वोक्तेः ॥

एतेन यस्त्वनन्तरं नारायणस्य प्रस्तावः स तस्योपासककोटिनिवेशनतात्पर्येणेति समर्थितं तात्पर्यसंग्रहे सुदर्शनाचार्यैरित्यादि मूर्खप्रलपनमपहस्तितं भवति, 'नारायणं महाज्ञेयं 'विश्वं नारायणं देवमक्षरं परमं पदम्' इत्यादिश्रवणात् । न ह्युपासकस्य जिज्ञास्यत्वं परब्रह्मत्वं जगत्कारणत्वादिकं संभावयितुमपि शक्यते ॥ १२८ ॥

किं च 'अंभस्यपारे' इत्युपक्रमः । 'सहस्रशीर्षं देवं' इत्युपसंहारः । नारायणपदाभ्यासः । अपूर्वता स्पष्टैव । फलं मोक्षादि । 'विष्णुमुखा वै देवाः' इत्याद्यर्थवादः । सर्वपदवर्णनादघोषादिवाच्यत्वप्रतिपादनात्सर्वमाहात्म्यमुपपन्नमित्युपपत्तिरपि । तथा च समस्ततात्पर्यलिंगादपि एतत्प्रकरणं नारायणपरम् । अन्यथेशानादिशब्दश्रवणमात्रेण तत्तद्वाचकानां रुद्रपरत्वे 'कामोऽकार्षीत्' इत्यादीनां, 'मृत्तिके हन मे पापं'

'त्वया हतेन पापेन गच्छामि परमां गतिं' इत्यादिमोक्षप्रतिपादकानामपि कामादिपरत्वानिवार्यत्वादिति संक्षेपः ॥ १२९ ॥

एतेन यद्वेदादाविति मन्त्रस्य नारायणपरत्वं न प्रकरणानुरोधेन, नाप्यनुवादानुरोधेन, न विधेयानुरोधेनेति अपहस्तितम् । यतः कृत्स्नोपनिषत् नारायणस्यैव प्रकरणम् । तथाहि— 'यमन्तः समुद्रे इति' नारायणशब्दनिर्वचनम् ,

'आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥'

इति वचनात् । 'तदेव ब्रह्म परमं कवीनाम्' इति स एव परामृश्यते । 'नारायणपरं ब्रह्म' इति स्पष्टोक्तेश्च । तस्यैव च तदेवाग्निस्तद्वायुरित्यादिना विद्वद्रूढ्या समस्तशब्दवाच्यत्वमुच्यते । पूर्वोक्तरीत्या 'स ब्रह्म स हरिः' इत्यादौ स्वातन्त्र्यनिमित्तं सर्वशब्दवाच्यत्वम् ॥ १३० ॥

यद्वेदादाविति मन्त्रे च सर्ववाङ्मूलाकारस्य वाच्यतया सर्वशब्दाभिधेयत्वमुच्यते । तथा हि– 'अकारो वै सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति' इति । अस्यार्थः— अकारो मकारेण स्पर्शेन ऊष्मभिरित्यत्र उकारप्रश्लेषः तेन युक्तस्तावदों भवति । 'त्रयो वर्णा अजायन्त अकार उकारो, मकार इति तानेकधा समभरत्तदेतदोमिति' [इति] ब्राह्मणोक्तेः । तेनाकारः प्रणवप्रकृतिर्न भवतीति निरस्तम् । इतरवाचां अकारप्रकृतिकत्वं स्पष्टम्, 'नानारूपा भवति' इत्युक्तेः । तथा चाकारार्थं नारायणमनूद्य तस्य महेश्वरत्वं

महतामीश्वरत्वं, न तु संकेतमात्रम् । महदपेक्षयाधिकगुणवत्त्वेन महेश्वरत्वं [विधीयते । ततश्च] अनन्तशब्दानां महायोगवृत्त्या भगवद्वाचित्वे तत्तत्प्रवृत्तिनिमित्ताधिकरणत्वेन अनन्तगुणपूर्णत्वमेव सिध्यति । भवत्पक्षे अयं मन्त्रोऽत्यन्तमनुपपन्नः । यः परः इति न शिवानुवादः, तस्याप्राप्तत्वात् । प्राप्तत्वादेव महेश्वरशब्दवाच्यत्वविधानाभावः । अन्यथा यः महेश्वरः सः परः इति श्रुतिनिर्देशः कल्प्यः स्यात् । महापदवैयर्थ्याच्च । तस्मादयं मन्त्रः नारायणपर एव ॥ १३१ ॥

स्पष्टं च नारायणसर्वोत्तमत्वमुक्तम्— 'विष्णुमुखा वै देवाः' इत्यादिना । विष्णुः मुखः मुख्यः स्वामी येषां ते विष्णुमुखाः । तथा सति तत्र तत्र अन्यदेवतामहिमवर्णनं नारायणोत्कर्षसिद्ध्यै पर्यवस्यति । तथा वैष्णवमाहात्म्यवर्णनं च । 'ये त्रिसुपर्णं पठन्ति ते ब्राह्मणाः सोमं पिबन्ति ब्रह्महत्यां वा एते घ्नन्ति आसहस्रात्पङ्क्तिं पुनन्ति' ['ब्रह्महत्यां वा एते घ्नन्ति । ये ब्राह्मणास्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति । आसहस्रात्पङ्क्तिं पुनन्ति'] इत्यादित्रिसुपर्णश्च श्रीनारायणविषय एव, ब्रह्मशब्दश्रवणात् । तथा मृत्तिकारूपगोपीचन्दनमाहात्म्यं 'मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमन्त्रिता' इत्युच्यते । [ब्रह्मणे] ब्राह्मणाय दत्ता ब्रह्मदत्ता ब्रह्मभोजनमितिवत् । न च ब्रह्मणा दत्तेत्यर्थः किं न स्यादिति वाच्यम् । 'उद्धृतासि वराहेण' इति पुनरुक्तत्वात् । कस्मै दत्तेत्यस्यापरिहाराच्च । ब्राह्मणव्यतिरिक्तैर्गोपीचन्दनधारणस्याक्रियमाणत्वाच्च । तस्यैहिकामुष्मिकफलमाह— 'मृत्तिके देहि मे पुष्टिम्' इत्यादिना ।

एतदभिप्रेत्यैव गीतायामुक्तं— 'किं पुनर्ब्राह्मणाः पुण्याः' इति । [तथा च] ब्राह्मणानां गोपीचन्दनधारणमिति सिद्धम् । एवं तत्तन्माहात्म्यं प्रतिपाद्यान्ते उपसंह्रियते—'एतद्वै महोपनिषदं देवानां गुह्यम् । य एवं वेद ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानमित्युपनिषत्' इति । परब्रह्मणो नारायणस्य महिमवर्णने तात्पर्यमिति रहस्यमित्यर्थः । एवं चोपनिषदा कृत्स्नस्य नारायणपरत्वं साधितम् । एतेन 'मात्रा मात्राः प्रतिमात्राः' इत्यादि सुखमस्तीति वक्तव्यमिति न्यायेन अपहस्तितं भवति । अप्रामाणिकमात्रालयवर्णनस्य प्रकृतानुपयुक्तत्वात् । वेदापौरुषेयत्वेनायुक्तत्वाच्चेति दिक् ॥१३२॥

एतेन हिरण्यगर्भशिवयोः कालभेदेन परस्परं कार्यकारणभाव इति वर्णनं शशविषाणनरविषाणयोः परस्परकार्यकारणभावतुल्ययोगक्षेममित्युक्तं भवति । द्वयोरपि प्रलयकाले 'न ब्रह्मा न च शंकरः' इति अभावनिश्चयात् कथं कारणत्वम् ? 'हिरण्यगर्भं जनयामास पूर्वं' इति सर्वसृष्ट्यादौ हिरण्यगर्भस्यैव प्रथमोत्पत्तिश्रवणाच्च । तस्मान्महेश्वरो नारायण एवेति सिद्धम् ॥ १३३ ॥

यदप्युक्तम्— अथर्वशिखापि शिवस्य सर्वकारणत्वं प्रख्यापयति । तथाहि— 'भगवन्किमादौ प्रयुक्तं ध्यानं ध्यायितव्यं किं तद्ध्यानं, को वा ध्याता, कश्च ध्येयः' इति उपक्रान्तप्रश्नचतुष्टयक्रमेण 'ओमित्येतदक्षरमादौ प्रयुक्तम् ध्यानं ध्यायितव्यम्' इत्यादिना 'ध्याता रुद्रः' इत्यन्तेन प्रश्नत्रयोत्तरानन्तरं ध्येयनिर्णयार्थमिदमाम्नायते— 'प्राणं

मनसि सह करणैर्नादान्ते परमात्मनि संप्रतिष्ठाप्य ध्यायीतेशानं प्रध्यायितव्यं सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैर्न कारणं कारणानां [धाता] ध्याता कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुराकाशमध्ये' इत्यादि । तत्र च 'ध्यायीतेशानम्' इति शिवस्य ध्येयत्वं निर्धार्य तदुपपादनार्थं प्रमुखानां ब्रह्मविष्ण्वादीनां कार्यत्वमुक्त्वा कारणं तु ध्येय इत्यादिना शिवस्य ध्येयत्वमुपसंहृतमिति, तन्मन्दम् । ॥ १३४ ॥

यदुक्तं शिवस्य सर्वकारणत्वं प्रख्यापयतीति । अत्र शिवज्ञापकं किं तद्वद । न चेशानपदं ज्ञापकम् । ध्यायते[ध्यायीते]शानमिति समस्तं पदं दुर्गेशान इतिवत् रूढिबाधकमेव । अन्यथोत्तरवाक्ये प्रध्यायितव्यमिति व्यर्थं स्यात् । प्रत्युत शिवबाधकान्येव सन्ति । तस्य शिवापरनामको रुद्रो ध्यातेति ध्यातृकोटिनिविष्टत्वात् । 'ब्रह्मविष्णुरुद्रेन्द्राः संप्रसूयन्ते' इति जनिश्रवणात् । रौद्रभूमिवासिनो रुद्रस्य दिगम्बरस्य नागभूषणस्य च सर्वैश्वर्यसंपत्तिरत्यन्तविरुद्धा । 'प्राणं मनसि सह करणैः नादान्ते परमात्मनि संप्रतिष्ठाप्य' इति इन्द्रियवृत्तिः परमात्मनि कर्तव्येत्युक्त्वा रुद्रं ध्यायीतेति वचनं अत्यन्तासंगतं च । 'नारायणाद्रुद्रो जायते' इति श्रुतेस्तस्य प्रमुखकारणत्वासंभवाच्च । तस्माद्रुद्रापरनामकस्य शिवस्यात्र प्रसक्तिरेव नास्ति, किं तु परब्रह्मण एव ॥ १३५ ॥

तथा हि—किमादौ प्रयुक्तमिति प्रश्नाभिप्रायः (कः)प्रल-

यकाले किं विद्यमानमिति कारणध्यानविधानार्थं कारणप्रश्नः । तत्रोत्तरं 'ओमित्येतदक्षरम्' इति । तस्यार्थः— ओमिति ब्रह्मेति श्रुतेः ओमितिपदाभिधेयं परब्रह्मैव कारणम् । (तत्त्वतः) एतदक्षरं प्रलये नाशरहितं इति । तथा च ओंकारार्थः कारणं प्रलयवर्तीति स्थिते 'एको नारायण आसीन्न ब्रह्मा न च शंकरः' इत्यादिवाक्यैरन्यनिषेधेन श्रीनारायणस्यैव प्रलयेऽवस्थानं प्रतीयते । तथा च स एव कारणमिति वैदिकैर्निर्णीयत एव ॥ १३६ ॥

ननु 'एको रुद्रो न द्वितीयाय तस्थे' इत्यादौ रुद्रस्यापि प्रलयेऽवस्थानं प्रतीयत इति चेत्—भ्रान्तोऽसि । रुद्रो ध्याता ब्रह्मविष्णुरुद्रेन्द्राः संप्रसूयन्ते इति रुद्रस्य ध्यातृत्वस्योत्पत्तेश्च त्वयैव स्वीकारात् । तथा चैको मुख्यः रुद्रः [इत्यर्थः] ध्यातेत्यर्थः पर्यवस्यति, 'एके मुख्यान्यकेवलाः' इत्यमरोक्तेः ॥

अथवा 'एकमेवाद्वितीयम्' इत्यादौ द्वितीयशब्दस्य समद्वितीयपरत्वम्, 'समे द्वितीयशब्दः स्यात्' इत्युक्तेः । तथा 'अस्य गोर्द्वितीयोऽन्वेष्टव्य इत्युक्ते तत्सदृशो गौरेवोपादीयते नाश्वो न पुरुषः' इति शांकरभाष्योक्तेश्च । तथा चाद्वितीयमिति समद्वितीयराहित्यमेवार्थ इति स्थिते कथं समद्वितीयं नास्ति? रुद्रस्यैव समद्वितीयत्वसंभवात्, कैश्चित् ब्रह्मविष्णुरुद्राणां समत्वांगीकाराच्चेति शंकापरिहाराय इदमुच्यते । एको रुद्रः इन्द्राद्यपेक्षया मुख्योऽपि रुद्रः द्वितीयाय परब्रह्मसमद्वित्वसंख्यापूरणाय न तस्थे न तिष्ठति तदपेक्षया

अत्यल्पत्वादित्यर्थः । अन्यथा चतुर्थीश्रवणं न स्यात् । तस्मान्नेशानस्य शिवस्य देवताकारणत्वसंभावनापि ॥ १३७ ॥

किं च पूर्ववर्त्तिनः खलु कारणत्वम् । न च त्वदभिमतस्य शिवस्य प्रलयकाले पूर्ववृत्तित्वमस्ति । 'एको नारायण आसीन्न ब्रह्मा नेशानो नापो नाग्नीषोमौ नेमे द्यावापृथिवी' इत्यादिना ईशानस्य सत्त्वस्यैव निषेधात् । न चायं 'नेशानः' इति निषिद्धो न भवति, किंत्वन्य एवेति वाच्यम् । स किं विष्णुः तदतिरिक्तो वा । नाद्यः [आद्ये] ओमिति ब्रूमः । अत्रोपपत्तिं वक्ष्यामः । नान्त्यः । विष्णुव्यतिरिक्तस्य तस्य शशविषाणतुल्यत्वात् ॥ १३८ ॥

परमशिवः अस्माकं ईश[ईशान]शब्देन अनभिप्रेत इति चेत् । स एव श्रुतीनां शशविषाणतुल्यत्वेनाभिमतः क्वाप्यनुक्तः । किं च तस्य शब्द[वाच्य]रूपताङ्गीकारे तु 'असद्वा इदमग्र आसीत् ततो वै सदजायत' इत्यापाततः श्रुतेः सत्त्वात् कारणत्वभ्रमः संभाव्येत । [न चैवम्] तथात्वे वा शून्यवादापत्तिः । किं च ईश्वरः शर्व ईशानः इत्यभिधानश्रुत्या रुद्रवाचकस्येशानपदस्य कथं परमशिववाचकत्वम् ? प्रमाणाभावात् अभिधानश्रुतिबाधाच्च । न चाभिधानश्रुतिवाच्य एवास्माकं परमशिव इति वाच्यम् । तथात्वे तस्योमापतेर्नेशान इति प्रलयकाले अभावश्रवणेन 'नारायणाद्ब्रह्मा जायते' 'नारायणाद्रुद्रो जायते' इत्युत्पत्तिश्रवणेन च जगत्कारणत्वसंभावनाया अप्यभावात् । न च प्रलयकाले-

ऽविद्यमानः कार्यरुद्रः परमादन्य एवेति वाच्यम् । तर्हि 'नारायणाद्रुद्रो जायते' इति श्रुतिप्रतिपाद्यः 'ईश्वरः शर्व ईशानः' इत्याद्यभिधानश्रुति[प्रतिपाद्य]प्रसिद्धवाच्य उमापतिः प्रसिद्धः, न तु तदतिरिक्तः कश्चन परमः शशविषाणतुल्यो-ऽङ्गीकार्यः ॥ १३९ ॥

किं च, यः कार्यरुद्रोऽङ्गीक्रियते तस्य 'ईश्वरः शर्व ईशानः' इत्याद्यभिधान[श्रुत]पदवाच्यत्वमङ्गीक्रियते न वा? आद्ये तस्यैव ध्यायीतेशानमित्यादौ प्रतीत्यापत्तिः, प्रसिद्ध-त्वात् । न त्वप्रसिद्धस्य परमस्य, तस्याशेषरुद्रवाचक-शब्दवाच्यत्वे प्रमाणाभावाच्च । द्वितीये त्वप्रामाणिकस्य परमस्यैव ईशानाद्यशेषशब्दवाच्यत्वं वाच्यम् । तथा च नेशान इति प्रलये निषेधः, 'यं कामये तं तमुग्रं कृणोमि' इत्यादौ लक्ष्मीजन्यत्वं च परमस्यैव स्यात्, न तु कार्य-रुद्रस्य, तस्येशानपदवाच्यत्वानङ्गीकारात् । अथ द्वयोरप्य-शेषशब्दवाच्यत्वं, किं तु नेशान इत्यादौ ईशानपदस्य कार्य-रुद्रपरत्वं, ध्यायीतेशानमित्यादौ तु ईशानादिपदस्य परम-परत्वमिति चेत्—मैवम् । ध्यायीतेशानं, नेशानः इत्यादि-विधिनिषेधानां त्वदिच्छाधीनत्वाभावात् ॥

किं च, विधिनिषेधयोरुभयोरपि ईशानश्रुतिबलादेवो-भयत्र प्राप्तौ (अन्यतरस्य) कुतो निराकरणम्? नित्यत्वानित्यत्वा-भ्यामिति चेत्, न । (यतः) आभिधानिकश्रुतिबलादेव नित्यत्व-प्रतिपादकश्रुतौ उभयोः प्राप्तौ विनिगमनाविरहेण उभयोरपि नित्यत्वम्, तथाऽनित्यत्वमपीति विरुद्धद्वयं बलादापतति ।

तस्मात्परमस्यैवाप्रामाणिकस्य शशविषाणायमानत्वान्न कारणत्वशंकाऽपि । आभिधानिकेश्वरादिपदानामनेकार्थत्वापत्तेश्च । त्वयाऽपि दूष्यग्रन्थेऽस्मिन् शिवकर्णामृते परमसद्भावे श्रुत्यादिप्रमाणानुक्तेश्च । उमायाः तच्छब्दानां च द्वैविध्यापत्तेश्च । शैवागमानां दूषयिष्यमाणत्वाच्च ॥ १४० ॥

ननु श्रुतिषु कथं परमस्यानुक्तिः? यतोऽत्रैव श्रुतौ 'ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते' इति ब्रह्मादीनां कार्यत्वमुक्त्वा 'कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुराकाशमध्ये' इति श्रूयते । तत्र सर्वेश्वरः शंभुः साम्ब एवेति कथं तत्र साम्बे प्रमाणाभाव इति चेत् । भ्रान्तोऽसि । अत्र परमपदस्याश्रवणात् । तस्य च शशशृङ्गायमाणस्य प्रलयकाल(पूर्व) वृत्तित्वासंभवेन कारणत्वासंभवस्योक्तत्वात् । विष्ण्वादीनां कार्यत्वेन गत्यन्तराभावात्परम एव कारणतया स्वीकार्य इति चेत्— न, प्रणवार्थनारायणस्यैव कारणत्वव्यवस्थापनात् । तस्य पूर्ववृत्तित्वश्रवणाच्च ॥ १४१ ॥

किं च, सर्वेश्वरः शम्भुरिति पदद्वयस्य केवलयौगिकत्वेन आभिधानिकश्रुत्या कार्यरुद्रवाचकत्वस्याप्यभावः । अमृतत्वेशानशब्दवत् सर्वसंबन्धीश्वरत्वश्रवणात् । तस्य च रूढिबाधकत्वोक्तेश्च । अन्यथा नरेश्वरः कपीश्वर इत्यादावपि रुद्रप्रतीत्यापत्तेः । शंभुशब्दस्य 'विप्रसंभ्यो ड्वसंज्ञायाम्' इति सूत्रेणासंज्ञायामेव प्रत्ययविधानात् । तस्य संज्ञात्वे शंभुशब्दनिष्पत्तिरेवानुपपन्नेति । अत एव शिवकर्णामृतेऽपि 'ध्यायीतेशानं' इत्यनेनैव शिवस्य प्राभिरुक्ता, शंभुपदवार्ताऽग्रहणात् ॥ १४२ ॥

किं च सर्वमिदमित्यनन्वितं 'ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते' इत्यनेनैव पूर्णत्वात् । न च सर्वमिदं प्रत्यक्षादिसिद्धं जगत् (ते) ब्रह्मादयश्च ते सर्वे संप्रसूयन्त इति व्यवहितान्वयस्वीकारात् [न दोषः] इति वाच्यम् । इदंशब्दनिर्दिष्टस्य जगतः उत्पत्तेः प्रत्यक्षादिप्रमाणसिद्धत्वेनावक्तव्यत्वात् । प्रधानोत्पत्तिकथनेन चरितार्थत्वाच्च । इदं सर्वं परमादुत्पद्यत इति व्याख्यानस्य च परमस्याप्रामाणिकत्वेनायुक्तत्वाच्च ॥१४३॥

अथ श्रुत्यन्तरात्परमशिवसिद्धिः । 'तुरीयं सर्वदृक्सदा' इति तुरीये परमशिवे सार्वज्ञ्यश्रवणादिति चेत्—सत्यम् । तुरीयं त्वदभिमतपरमशिवः कुतः? न हि तुरीयशब्दस्य परमे रूढिर्योगो वा आस्ति । तथात्वे तुरीयपुत्रमानय, तुरीयाश्रमः तुरीयवर्ण इत्यादावपि परमप्रतीत्यापत्तेः । किं तु तत्प्रकरणे विश्वतैजसप्राज्ञतुरीया इति भगवद्रूपचतुष्टयस्य प्रतिपाद्यत्वेनाप्रामाणिकपरमप्रसक्तेरभावात् ॥

अपि च 'अस्य गोर्द्वितीयोऽन्वेष्टव्य इत्युक्ते तत्सदृशो गौरेवोपादीयते नाश्वो न गर्दभः' इति महाभाष्योक्तेः, विष्ण्वादीनां कार्यत्वे असर्वज्ञत्वे वा तुरीयस्यापि तत्सदृशत्वेन तथात्वापातः । तथा च सर्वज्ञत्वानुपपत्तिस्तुरीयस्येत्यतः संकोचे मानाभावाच्चतुर्णामेकरूपत्वमंगीकार्यम् । तथा च ब्रह्मविष्णुमहेश्वरतुरीयाणां कार्यत्वेन कारणीभूतस्यापाततोऽप्यसिद्धिरेव । तस्मात्परमस्येह प्रसक्तिरेव नास्तीत्यन्यदेतत् ॥

अपि च 'ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते' इत्यत्र इन्द्रस्यैव तुरीयत्वेन कल्पनायामस्य पंचमत्वापत्तिः । अन्यथा

कार्येन्द्रादन्यः पंचमेन्द्रः कस्मान्न शंक्यते? तस्मात्परमाशिवः शशविषाणतुल्य एवेति संक्षेपः ॥ १४४ ॥

वस्तुतस्तु परमशिवः नारायण एव। तथाहि– 'आत्मा नारायणः परः' इत्युक्त्वा 'तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः। स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट्' इत्युच्यते। तत्र परम इति व्यर्थं परमात्मेत्यनेनैव परमत्वलाभात्। किं तु परमपदानुषङ्गेण परमब्रह्म परमशिवः परमहरिः परमेन्द्रः परमाक्षरः परमस्वराट् इति प्रसिद्धब्रह्मादिव्यावृत्त्यर्थमुच्यते। तथा च स एव परमशिव इति सिद्धम् ॥ १४५ ॥

ननु ब्रह्मविष्णुरुद्रेन्द्रा इति वाक्यस्य कोऽर्थ इति चेत्— अत्र स्वामिनः—

उपक्रमे 'किमादौ प्रयुक्तं (किं) ध्यानं (किं) ध्यायितव्यं किं ध्यानं को ध्याता कश्च ध्येयः' इति प्रश्नचतुष्टयमुपक्रान्तम्। तत्राद्यप्रश्नार्थः सर्गादौ ग्रन्थादौ वा प्रयुक्तं किमिति। द्वितीयप्रश्नार्थः केन प्रकारेणेति। तृतीयप्रश्नार्थः किं कृत्वेति। चतुर्थस्यार्थः सर्वदा को ध्येय इति। किमादौ प्रयुक्तमित्यस्योत्तरं ॐ इत्येतदक्षरं (स) प्रलयादावपि परमात्मनोच्चार्यते ॐ इति ॥

'सिसृक्षोः परमाद्विष्णोः प्रथमं द्वौ विनिस्सृतौ।
ॐकारश्चाथशब्दश्च तस्मात्प्राथमिकौ क्रमात् ॥'

इति वचनात्। किं ध्यानमित्यत्र केन प्रकारेण [ध्यानं] कर्तव्यमिति द्वितीयस्यार्थः उक्तः। तत्रोत्तरं जगत्कारणत्वा-

दिनेति वक्ष्यते । किं कृत्वेत्यस्योत्तरं परमात्मनि संप्रतिष्ठाप्येति (तृतीये) स्पष्टम् । किं सदा ध्येयमिति चतुर्थप्रश्नस्य उत्तरमाह — ध्यायीतेशानमिति । तथा च यदादौ प्रयुक्तं ओमित्यक्षरं तदेव च परं ब्रह्म 'ओमिति ब्रह्म' इति श्रुतेः । एवं च तस्मिन् ब्रह्मणि परमात्मनि इन्द्रियैः सह मनोवृत्तिं कृत्वा समस्तैश्वर्योपेतं समस्तगुणपरिपूर्णं ब्रह्म ध्यायीत इत्यर्थः ॥ १४६ ॥

पुनः तच्च ब्रह्म किंदेवतारूपं, क्वास्ति, कुत्र च तद्ध्यानं अनन्तगुणानां बुद्ध्यनारोहात्केनावश्यकगुणेन तद्ध्यानमित्याकांक्षायामिदमाम्नायते— 'सर्वमिदं ब्रह्मविष्णु' इति । ब्रह्म देशतः कालतः गुणतः पूर्णं विष्णु व्याप्तं परब्रह्मनामकं यस्मिन् तज्जगत्सर्वं अधीनमास्ते इदं ब्रह्म विभु व्याप्त[विष्ण्वात्मकं] विष्णुकं । विष्णुपदं विशेष्यलिङ्गत्वान्नपुंसकम् । अनेन ब्रह्म किंदेवतारूपं क्वास्तीति शंकाद्वयं परिहृतम् । कथं विष्णोर्ब्रह्मत्वमिति शंकानिरासाय 'रुद्रेन्द्राः संप्रसूयन्ते' इति जगत्कारणत्वमुपपादितम् । अत्र रुद्रादित्वकथनं तु शैवप्रकरणमिदमिति भ्रांतिनिरासार्थम् । तथा च जगत्कारणत्वेन पूर्णत्वेन सर्वेश्वरत्वेन ईशानशब्दोदितस्वामित्वेन च हृदयाकाशमध्यगः शंभुः शं सुखं भवत्यस्मादिति मोक्षसाधनं विष्णुः ध्येय इत्यर्थः । अनेनान्त्यशंकाद्वयं परिहृतं भवति । अत एव स्वस्वामित्वेन ध्यानस्यात्यावश्यकत्वात्सर्वाधिकारिसाधारण्येन ध्यायीतेशानमिति विशेष्योक्तिः । न चैवमर्थाङ्गीकारे किमपि बाधकमस्ति ॥ १४७ ॥

यद्वा सर्वं पूर्णं । इदं श्रुत्युक्तं कारणं ब्रह्मविष्णु । विभक्तिलोपः छान्दसः । यतो 'रुद्रेन्द्रास्ते संप्रसूयन्ते' इत्यादिना कारणत्वोपपादनम् । अथवा ब्रह्म चतुर्मुखः विष्णुः वायुः 'आपः इत्यापः इति तदिदमाप एवेदं वै मूलमदस्तूलमयं पितैते पुत्रा यत्र ह क्व च पुत्रस्य तत्पितुः (यत्पितुः) [यत्र वा पितुः] तद्वा पुत्रस्येत्येतत्तदुक्तं भवति' इति ऐतरेयोपनिषदि क्वचित्पितुर्नाम पुत्रस्येत्युक्तत्वात् । लोकेऽपि हि अतिप्रीतिपात्रस्य तथैव व्यवहारः । तथा च सति 'एको नारायण आसीन्न ब्रह्मा न च शंकरः । स मुनिर्भूत्वा समचिन्तयत् तत एते व्यजायन्त विश्वो हिरण्यगर्भोऽग्निर्यमो वरुणरुद्रेन्द्राः' इति वाक्येनैकार्थता भवति, विश्वो वायुरिति व्याख्यानात् ॥ १४८ ॥

अथवा ब्रह्म वेदः बृह जातिजीवकमलासनशब्दराशिष्विति वचनात् । विष्णुर्यज्ञः 'यज्ञो वै विष्णुः' इति श्रुतेः । रुद्रादिदेवाश्च नारायणात्संप्रसूयन्ते । अथवा यथा द्वादशादित्यानां कश्यपादुत्पत्तौ एकादशानामुत्पत्तिः उरुक्रमस्य विष्णोस्तु प्रादुर्भावमात्रं नोत्पत्तिस्तथा मूलरूपाद्ब्रह्मादीनामुत्पत्तिः, विष्णोरेकस्यैव प्रादुर्भावमात्रं नोत्पत्तिः भगवत्स्वरूपत्वात् 'प्रादुर्भावो हरेर्जनिः' इति वचनात् । इदं च भागवतादौ स्पष्टम् । अथवा मूलरूपाद्ब्रह्मविष्णुरुद्रेन्द्रसंज्ञकाः भगवद्रूपविशेषा एव प्रादुर्भूता इति ॥ १४९ ॥

वस्तुतस्तु विष्णुरहस्ये वायोस्त्रीणि ब्रह्मविष्णुमहेश्वरसंज्ञानि रूपाणि सन्तीत्युक्तत्वात्तद्विषयमिदं वाक्यं भवति । अत

एव पूर्वोदाहृतकालाग्निरुद्रवाक्यमप्युक्तार्थं भवति । एतेन 'सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः' । 'विष्णुरित्था परममस्य विद्वाञ्जातो बृहन्नभिपाति तृतीयम्' इत्यादिवाक्यं व्याख्यातं भवति । 'वाग्वै माता प्राणः पुत्रः' इत्यादौ वाचोभिव्यञ्जकत्वात्प्राणमातृत्ववत्सोमस्याप्यभिव्यञ्जकत्वात [विष्णु]ज्ञानपितृत्वोपपत्तेश्च। दशरथवसुदेवप्रभृतीनां उपचारेण रामकृष्णजनकत्ववत् सोमस्यापि तथात्वसंभवात् । देवदत्तो यज्ञदत्तस्य गुरुर्जात इतिवदुपचारेण विष्णुर्विद्वाञ्जात इति प्रयोगोपपत्तेश्च । किं बहुना? विष्णुजननवाक्यानामत्यन्तासंभावितार्थत्वं भवत्संमतं सोमः पवत इति वाक्यमेवोदाहृत्यात्यन्तासंभावितार्थं वायुसंहितावाक्येनोपबृंहितमिति युक्तम् ॥ १५० ॥

स्यादेतत् । यथा 'न ब्रह्मा न च शंकरः' इत्यादौ ब्रह्मादीनां प्रलयकाले सत्त्वनिषेधः, तथा विष्णोरपि निषेधोऽस्त्येव । तथा हि— यद्यपि न विष्णुरिति नास्ति निषेधः, तथापि सामान्यतोऽस्त्येव सः । 'इदं वा अग्रे नैव किंचनासीत्' 'असदेवेदमग्र आसीत्' 'असद्वा इदमग्र आसीत्' 'नासदासीन्नो सदासीत्तदानीम्' इति निषेधादिति चेत्— मैवम् । इदं वा अग्र इत्यादीनां कार्याभावपरत्वात् । 'तद्धैक आहुरसदेवेदमग्र आसीत्' इत्यनूद्य 'कुतस्तु खलु सोम्यैवं स्यात्कथमसतः सज्जायेत' इति श्रुत्यैव तन्निषेधाच्च । असद्वेति वाक्ये अव्यक्तत्वादसन्नामकं ब्रह्मैवासी-

दित्यर्थाङ्गीकारात् । अन्यथा असदासीदिति पदयोर्व्याघातापत्तेः । नासदासीदित्यस्य,

मूर्तं सदिति संप्रोक्तममूर्तमसदुच्यते ।
मूर्तामूर्त्तेतरद्ब्रह्म न सत्तन्नासदुच्यते ॥'

इति वचनेनैवान्यथा व्याख्यातत्वादिति दिक् ॥ १५१ ॥

एतेन यद्यपि प्रसूयन्ते इति ब्रह्मादीनां भूतेन्द्रियाणां च प्रसूतिमात्रमुपन्यस्तम्, न तु शिवात्प्रसूतिः । तथापि प्रतियोगिसव्यपेक्षार्थे शब्दनिर्दिष्टे सन्निहितस्य प्रतियोगितया अन्वयो युक्तः । 'एका देया द्वादश देयाश्चतुर्विंशतिर्देयाः सहस्रं देयं अपरिमितं देयं' इति आधानदक्षिणाकल्पभेदश्रुतौ अपरिमितशब्दस्य प्रतियोगिसापेक्षबहुत्वसामान्यवाचिनः सन्निहितसहस्राधिकबहुत्वे पर्यवसानस्य पूर्वतन्त्रे निर्णीतत्वात् इहापि सन्निधानादीशानस्यैव कारणत्वेनान्वयः इति निरस्तम् ॥

किमादौ प्रयुक्तमिति प्रश्नस्य आदौ प्रलयकाले किं विद्यमानं कारणमित्यभिप्रायः । उत्तरमपि तदभिप्रायकमेव । अन्यथा प्रश्नप्रतिवचनयोः प्रकृतासांगत्यमेव स्यात् । तथा च ओंकारार्थस्येशानस्य नारायणस्य कारणतया ध्येयत्वस्य कण्ठतं एवोक्तत्वादपरिमिताधिकरणोपन्यासस्यायुक्तत्वात् । तस्मादथर्वशिखावचनमपि नारायणस्यैव सर्वकारणत्वेन सर्वेश्वरत्वेन मोक्षप्रदत्वेन च ध्येयत्वं व्यवस्थापयतीति सिद्धम् ॥ १५२ ॥

एतेन 'एकः पुरस्ताद्य इदं बभूव यतो बभूव भुवनस्य गोपाः । यमप्येति भुवनं साम्पराये... ॥', इत्याद्यायु-

[ष्य]ष्मत्सूक्तमन्त्रादिकमपि भगवतः शिवस्य जगज्जन्मादिकारणत्वे प्रमाणमनुसन्धेयमिति अपहस्तितं भवति, चोरेण तुरीयपादस्य लिखितत्वात् । तत्रैव 'स नो हरिर्घृतमिहायुषेऽत्तु देवः' इति हरिशब्दश्रवणात् । न च तत्र हविःशब्दश्रवणमिति वाच्यम् । बहुकोशेषु हरिशब्दश्रवणात् । अन्यथा हविःशब्दस्य वैयर्थ्यम्, दीयमानस्य घृतस्यैव हविष्ट्वात् । तथात्वे वा तल्लक्षणश्रवणादेकशब्दस्य भगवन्नामत्वसमर्थनाच्च स एवात्र प्रतिपाद्य इति । तस्मादेवमादिमन्त्रा अपि नारायणपरा एवेति संक्षेपः ॥ १५३ ॥

यत्तु 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं' इति मन्त्रस्य विरूपाक्षमित्यभिधानश्रुत्या शिवपरत्वमिति, सत्यं उत्तरार्धस्य शिवपरत्वं, तत्रैव विरूपाक्षश्रुतेः सत्त्वात् । न पूर्वार्धस्य । किं तु तस्य वाक्यशेषश्रुत्या नारायणैकपरत्वम् ॥

तथाहि—'तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनां' इत्युक्तम् । सावधारणं पदत्रयं विवृतम् । नारायणपरो ज्योतिः पूर्णज्ञानरूपः 'सत्यस्य सत्यम्' इति व(चना)त् तत्वं सत्यं नारायणः (ना)परः 'नारायणपरं ब्रह्म' इति 'पुरुषो ह वै नारायणः' इत्यादिभिः पदचतुष्टयस्यान्यपरत्वासंभवात् । अभिधानश्रुतितो वाक्यशेषश्रुतेरतिबलत्वात् । अन्यथा 'आज्यैः स्तुवते' इत्यत्र अन्यत्र प्रसिद्धस्याज्यशब्दस्य वाक्यशेषात्स्तोत्रार्थता न स्यात् । तथा च 'एकैकमप्यनर्थाय किमु तत्र[यत्र]चतुष्टयम्' इति न्या-

येन पूर्वार्धस्य विष्णुपरता । तथा च पूर्वार्धोक्तं परं ब्रह्म विष्णुं ध्यायन्तं विरूपाक्षं शिवं नमामि (रुद्रो ध्यातेति श्रुतिः) इति श्रुत्यर्थः ॥ १५४ ॥

ऊर्ध्वरेतमित्यधिकारिलक्षणम् । तेन 'ईशानः सर्वविद्यानाम्' इति पूर्वेण उत्तरेण रुद्रः सर्वः इत्यादिना आपाततः स्वातन्त्र्यप्रतीतिं निवारयति । न च ध्यायन्तं इति पदाध्याहारो दोषः । (यतः) ऊर्ध्वरेतमिति पदस्वारस्यादध्याहारो गुणः । अन्यथा पूर्वोत्तरयोरन्वयासंभवात् । न च सामानाधिकरण्येनान्वयः, वस्तुतो भिन्नार्थत्वेनासंभवात् । पूर्वोक्तरीत्या भिन्नार्थत्वस्यातिस्पष्टत्वात् । अत एव पूर्वमीमांसायामपि एकस्मिन् मन्त्रे लिङ्गभेदेन वाक्यभेदोऽङ्गीकृतः । यथा 'स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि ते' इत्यस्य सदनकरणाङ्गत्वम् । 'तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेधसुमनस्यमान' इत्यस्य पुरोडाशस्थापनाङ्गत्वमिति ॥ १५५ ॥

किं च तापनीयश्रुतौ 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं शंकरं नीललोहितम्' इति पठ्यते । तत्रैकवाक्यत्वे नीललोहितमित्यस्य पौनरुक्त्यापत्तिः । कृष्णपिङ्गलमिति पूर्वार्धे उक्तत्वात् ॥

वस्तुतस्तु पूर्वोक्तश्रुतिद्वयमपि नीलग्रीवश्रुत्या व्याख्यातम् ॥

'ऋतं सत्यं परं ब्रह्म प्रति विष्णुं सदाशिवः ।
ऊर्ध्वरेता ध्यायतीह शंकरो नीललोहितः ॥'

इत्यादिना । नारायणपरं ब्रह्मेति वाक्यजातं प्रसिद्धमेव । न चैवं शिवस्य परब्रह्मत्वे एकमपि निरवकाशमस्ति । तस्माद्विष्णोरेव परब्रह्मत्वमिति सिद्धम् ।। १५६ ।।

वस्तुतस्तु 'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति । यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् । एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्' इत्याद्युक्तं किंदेवतारूपमित्यपेक्षायां 'तद्विष्णोः परमं पदं' इति काठके, 'वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहं' इत्यादिगीतायां विष्णोरेवान्यनिषेधपुरस्सरं सर्ववेदप्रतिपाद्यत्वमुक्तम् । न ह्येवं देवतान्तरे वर्णितमस्ति । यत्र क्वचिदापाततः रुद्रादिपदघटितवाक्यमस्ति चेत् – तद्विष्णुपरम् । 'यो देवानां नामधा एक एव' इति श्रुतेः । रुद्रादीनां प्रलयकाले सत्त्वाभावे च (देवदेव) कारणत्वसम्भावनाऽभावाच्च ।। १५७ ।।

किं च 'परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति । न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप' इति विष्णुमहिम्नः कालत्रयेऽपि अन्याप्राप्यत्वश्रवणाद्विष्णुरेव सर्वदा सर्वदेवोत्तमः । स्पष्टं चैतद्ब्राह्मणे श्रूयते— 'अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवताः' इति अग्नेरवमत्वं विष्णोः परमत्वं ब्रह्मरुद्रादीनां मध्यमत्वमिति । अत एव दीक्षणीयायाः सोमे यक्ष्यमाणदेवतापरिग्रहार्थत्वं सिद्धं भवति । इतरथा तद्दुर्घटं स्यात् ।।

तथाहि— पूर्वतन्त्रे 'ग्रहणार्थं च पूर्वमिष्टेस्तदर्थत्वात्' इत्यत्र दीक्षणीयाया अपि वाक्यशेषे देवानां परिग्रहार्थता श्रूयते— 'आग्नावैष्णवमेकादशकपालं निर्वपेत् दीक्षिष्यमाणोऽग्निरवमो देवतानां विष्णुः परमो देवता एव तदुभयतः परिगृह्य दीक्षते' इति । यद्यपि 'दीक्षाः सोमस्य' इति वचनात्प्रधानार्था दीक्षणीया प्रधानदेवता एव परिगृह्णाति । तथापि वैश्वदेवग्रहे सर्वदेवतासमवायात् तत्परिग्रहं कुर्वन्ती दीक्षणीया प्रसंगादङ्गकर्मदेवता अपि गृह्णाति । न हि वैश्वदेवशब्दः अतस्थः कस्यचिद्देवतागुणस्य वाचकः । प्रसिद्धावयवार्थस्य समुदायस्य शक्त्यन्तरकल्पने प्रमाणाभावात् । तस्मात्सर्वदेवतावचनत्वात् तत्परिग्रहे च सर्वान्तर्गतानामंगदेवतानामपि प्रसंगतः परिग्रहादकर्तव्यमन्वाधानं इति सिद्धान्तितम् । तस्माद्विष्णोः सर्वोत्तमत्वं पूर्वमीमांसकानामपि संमतमेव ॥ १५८ ॥

यदत्रोक्तं श्लाघनीयप्रज्ञैः—'अग्निरवमो देवतानां विष्णुः परमः' इत्यंशे प्रबलानेकश्रुतिविरोधादुपचरितार्थत्वेऽपि दीक्षणीयायाः देवतापरिग्रहार्थत्वप्रतिपादनांशे विरोधाभावेन स्वार्थे प्रामाण्य[प्रामाण्याङ्गीकार]संभवादिति । तत्त्वोक्तविस्मरणाविजृंभितम् । महाराजैर्युष्माभिरेव 'नान्यः कश्चिन्मत्तो व्यतिरिक्तः' इत्यस्य व्याख्यानावसरे अन्यत्रापि तत्र तत्र शिवाभेदप्रतिपादनेन सर्वविरोधानां परिहृतत्वात् ॥

तथाहि— किमभेदः विशिष्टाकारस्य उत चिन्मात्रस्य अथवा 'सर्वं खल्विदं ब्रह्म' इतिवदेकसद्भावेन अन्याभावः ।

पक्षत्रयेऽपि सर्वे विरोधाः परिहृता एव । आद्ये विष्णुवैशिष्ट्यस्यैव शिववैशिष्ट्यपर [रूप] त्वेन वैष्णवागमानां शैवागमानां चैकविषयत्वात् । द्वितीये च शिववैशिष्ट्यस्य आरोपितत्वेन भवदभिमतत्वाच्छैवागमानां च तद्विषयत्वेऽप्रामाण्यापत्तेः । चिन्मात्रपरत्वे त्वविरोध एव । न हि 'दध्ना जुहोति' इति विशिष्टविधायकं वाक्यं विशेष्यमात्रविषयेण 'अग्निहोत्रं जुहोति' इति वाक्येन विरुद्धम् ॥

तृतीयपक्षे तु शिवस्यैव सत्त्वे शैवानां सर्वेषामभावे कथं तस्य सर्वोत्तमत्वम्? तस्य सर्वसत्त्वसापेक्षत्वात् । तदभावे च तत्प्रतिपादकानां शैवाद्यागमानामप्रामाण्यमेव स्यात् । एतद्वाक्यदूषणावसरे अस्मदुक्तन्यायेन शिवाभावपर्यवसाने वा तदागमानामप्रामाण्यमेव। तस्मात् त्वदीयव्याख्यानबलादप्रमाणभूताकिंचित्करशैवाद्यागमविरोधोऽपि विष्णोः सर्वोत्तमत्वं न स्पृशति । तथा च स्ववाक्यार्थपर्यवसानाज्ञानविजृम्भितमेतदिति दिक् ॥ १५९ ॥

एवं चाग्नेरवमत्वं विष्णोः परमत्वं चोपचरितशंकास्पदं च न भवति । कथं चैतदुभयाभावे दीक्षणीयायाः देवतापरिग्रहार्थत्वप्रतिपादनम्? न च वचनबलादाग्नावैष्णवयजनेन सर्वदेवतापरिग्रहासिद्धिरित्येवास्तु । तत्र च यथा 'शूर्पेण जुहोति तेन ह्यन्नं क्रियते' इत्यत्र शूर्पान्नकरणत्वस्य कीर्तनं स्तावकतयैव, न तस्य होमसाध्य [साधन] त्वोपयोगितया, तथा अग्नाविष्णवोरवमपरमत्वकीर्तनमपि इह स्तावकतयैव, न देवतान्तरपरिग्रहौपयिकतयेत्युपपद्यत इति वाच्यम् । यतो भ्रान्ति-

प्रलपनमेतत् । न ह्याग्नावैष्णवयजनेन देवतापरिग्रह इत्येवंरूपं वचनमस्ति। किं तु ‘तदन्तरेण सर्वा अन्या देवताः’ इति। तत्रोक्तोपाधिनैव तदन्तरत्वं सर्वदेवानां वक्तव्यम्, अन्यथाऽनुपपत्तेः। तत्र च शूर्पाधिकरणकथनमसङ्गतम् । कथञ्चित्स्तावकत्वमात्रे दृष्टान्ताभिप्राये च वचनबलादाग्नावैष्णवयजनेन देवतापरिग्रहसिद्धिरिति वचनं भवतैवाभासीकृतम् । वचनस्य स्तावकत्वाङ्गीकारात् ॥ १६० ॥

अपि च स्तावकत्वे वा किमवमपरमत्वे न सिध्यतः। गुणिनिष्ठगुणाभिधायकत्वं स्तावकत्वम् । एवं च तेनैव तयोः सिद्धिः । तत्र तात्पर्यानङ्गीकारे उपक्रमाधिकरणादीनां उच्छेद एव स्यात् । उपक्रमस्य अर्थवाद[त्वेन]चेतनतद्गतवेदादिशब्दानां स्वार्थे तात्पर्याभावेन विरोधगन्धाभावात कथमुपक्रमप्राबल्यम्? किं तु स्वार्थे पर्यवसानाभाव एवाभिप्रेतः । एवं चार्थवादेनापि अवमत्वोत्तमत्वे भवत एवेति ॥ १६१ ॥

न चाग्नाविष्णवोः प्राथम्यान्तिमत्वाभ्यां सर्वदेवानामन्तरत्वं संपादनीयम्। ‘अग्निरग्रे प्रथमो देवतानां संयातानामुत्तमो विष्णुरासीत्’ इति मन्त्रे दीक्षणीयायाः देवतापरिग्रहार्थत्वप्रतिपादक एव प्रथमोत्तमशब्दाभ्यां तथा स्फुटीकरणात् । तत्र चोत्तमशब्दस्य ‘त्रिः प्रथमामन्वाह त्रिरुत्तमामन्वाह’ इत्यादिवत् अन्तिमपरत्वात्। तथा चात्रावमोत्तमशब्दावपि तत्पराविति वाच्यम्। तदपि दुर्घटम् । तथाहि— किमग्नेः प्राथम्यं प्रथमोत्पन्नत्वाद्वा प्रथमं दृष्टत्वाद्वा। नाद्यः। ‘आत्मन आकाशः संभूतः’ इत्याकाशस्यैव प्रथमोत्पत्तेः ।

'स प्राणमसृजत' इत्यादौ प्राणस्यैव प्रथमोत्पत्तेः। न द्वितीयः, अप्रत्यक्षत्वात् । एवं विष्णावप्यन्तिमत्वं निरसनीयम्। तस्मादध्वगमने प्रथमप्राप्यस्य प्राथम्यवदग्नेः प्राथम्यं संपादनीयम्। अत एव मोक्षमार्गे अग्नेः प्राथम्यं समर्थितम् —'अर्चिरादिना तत्प्रथितेः' इत्यधिकरणे ॥ १६२ ॥

तथा च प्रथमप्राप्यस्य [अग्नेः] अधमत्वात् इति प्रामाण्यस्य [अन्तिमप्राप्यस्य] विष्णोरुत्तमत्वादवमत्वपरमत्वे एव सिध्यतः। राजादाववमप्राप्त्योत्तमप्राप्तिदर्शनाच्च। प्रथमादिशब्दवृत्तौ लोके अनेकनिमित्तदर्शनेन मन्त्रगतस्याग्नौ प्रथमशब्दस्यावमत्वमेव ब्राह्मणगतं विस्पष्टं [निमित्तं] इति वाच्यम्। अन्यथा निर्णयानुपपत्तेः । यद्यपि 'त्रिरुत्तमामन्वाह' इति उत्तमशब्दप्रवृत्तिरन्तिमे, तथापि सा गौण्यैव वृत्त्या, मुख्यासंभवात्। अन्यथा निर्णयानुपपत्तेः शिवस्यैव सर्वोत्तमत्वं भवतो विद्वदुत्तमत्वमित्यत्राप्यन्तिमत्वमेव स्यात् ॥ १६३ ॥

किं च मन्त्राधिकरणे मन्त्राणामनुष्ठेयार्थस्मारकत्वेन प्रामाण्यं समर्थितम्। अनुष्ठेयार्थप्राप्तिर्विधायकब्राह्मणवाक्यात्। ततश्च मन्त्रेण ब्राह्मणोक्तरीत्यैव प्रकाशः कर्तव्यः, अनुवादकत्वात् । अन्यथा प्रामाण्यमेव दुर्घटं स्यात् । ब्राह्मणवाक्यद्वयेऽवमत्वोत्तमत्वे [प्रतिपाद्ये] भवतः। अस्तु वा 'तुष्यतु दुर्जनः' इति न्यायेनोत्तमपदस्यान्तिमपरत्वम्। तत्रान्तिमत्वं त्रेधा भवति देशतः, कालतः, गुणतश्चेति । तत्राद्यौ विष्णौ न भवतः । तस्माद्गुणत एवान्तिमत्वं समस्तगुणपूर्णत्वं

सिध्यति । तस्मात् दीक्षणीयायाः 'देवतापरिग्रहार्थत्वेनापि विष्णोः सर्वोत्तमत्वं सिद्धम् ॥ १६४ ॥

वस्तुतः सर्ववेदानां 'सर्वे वेदा यत्पदमामनन्ति' 'यो देवानां नामधा एक एव' इत्यादिप्रमाणैर्भगवदेकपरत्वस्यैव समर्थितत्वेन विरोधगंधाभावात् विष्णोः सर्वोत्तमत्वमेव सिद्धमिति किं पिष्टपेषणेनेति संक्षेपः ॥ १६५ ॥

एतेन 'अग्निर्वै देवानामवमः' इति ब्राह्मणवाक्यस्य शाखान्तरगतमन्त्रब्राह्मणसंवादोऽपि सूचितः । अत्र केचित्— यथा भवन्मते रुद्रादिपदैः [विष्णुग्रहणं] तथा विष्णुपदेनापि योगवृत्त्या रुद्रग्रहणं किं न स्यात् । विष्लृ व्याप्ताविति धातोरुत्पन्नस्य विष्णुपदस्य व्याप्त्यभिधायकत्वात्, तस्याश्च रुद्रेऽपि संभवादिति, तन्न । आदौ तावत्तत्तच्छब्दानां आभिधानिकरूढ्या तत्तद्देवतावाचकत्वम् । पामराणां ज्ञानार्थमेवाभिधानसृष्टिः । एवं च सति श्रुत्यादौ पूर्वोक्तादिशा तत्तत्प्रकरणानां उपक्रमादिभिः श्रुतिलिंगादिभिर्वा विष्णुपरत्वे सिद्धे तद्गततत्तद्देवतावाचकपदानां तत्र तत्राभिधानिकरूढ्यविरोधेनैव वाक्यान्तरबलान्महायोगाविद्धरूढिभ्यां विष्णुपरत्वं प्रलयपर्यन्तम्, प्रलये तु विष्ण्वेकपरत्वं इति संक्षेपेण प्रागुक्तत्वात् । तथा च प्रलयकालेऽविद्यमानस्य रुद्रस्य सर्वकाले कथं व्याप्तिः ? कथं वा...... तस्य विष्णुपदाभिधेयत्वम् ? कथमन्यथा देवदत्तस्यापि विष्णुपदवाच्यत्वं न शक्येत । तस्यापि हस्तपरिमितभूप्रदेशव्याप्तत्वस्य सत्त्वात् । मुखस्य स्वाधीनत्वात् । किं तु,

'देशतः कालतश्चैव गुणतश्च त्रिधा ततिः ।
सा समस्ता हरेरेव न ह्यन्ये पूर्णसद्गुणाः ॥'

इति प्रमाणोक्ता व्याप्तिरेव विष्णुपदप्रवृत्तिनिमित्तम् । न हि कार्यभूतानां रुद्रादीनां स्वल्पाप्येतादृशी व्याप्तिः संभाविता । अयमेव महायोग इत्युच्यते, असंकोचेन प्रवृत्तत्वात् । तत्पूर्विका रूढिरेव विद्वद्रूढिः । तथा च महायोगविद्वद्रूढिभ्यां सर्वपदानां भगवदेकवाचित्वम् । न च रूद्रादिपदानां कार्यभूते रुद्रादौ महायोगविद्वद्रूढी स्तः, तस्याभिधानिकरूढ्यैव रुद्रादिपदवाच्यत्वात् । यदा चैवं तदा का वार्ता विष्ण्वादिपदानां रुद्रादिषु । महायोगस्तु नास्त्येव । नहि 'तस्मादक्षरं तस्मादक्षरमित्याचक्षत एतमेव सन्तं' इतिवत् रुद्रं सन्तं नारायण इत्याचक्षते विष्णुरित्याचक्षत इति क्वचिदप्यस्ति, येन नारायणादिपदै रुद्रस्य ग्रहणं संभाव्येत ॥ १६६ ॥

यद्यपि विष्ण्वादिपदानां रुद्रादिषु देवदत्ततुल्यतयाऽल्पयोगोऽस्ति । तथापि महायोगविद्वद्रूढिभ्यां आभिधानिकरूढ्या च बाधात् तस्याकिंचित्करत्वम् । 'यो देवानां नामधा एक एव, 'नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति' इति विष्णोः सर्वनामधेयत्ववत् रुद्रादीनां सर्वनामत्वानुक्तेश्च । 'नामानि तव गोविन्द' इति शिववचनस्य पूर्वमेव खण्डितत्वात् । तस्माद्विष्णुपदेन शिवग्रहणमेव किं न स्यादिति शंकापिशाची आभिधानिकरूढिमात्रेण स्वात्मानं न धत्ते, किमु महायोगविद्वद्रूढिभ्याम् । शिवादिपदानां च यत्राविरोधः तत्राभिधानिकरूढ्या शिवादिपरत्वम्, महा-

योगविद्रूढिभ्यां विष्णुपरत्वम् । यत्र पूर्वोत्तरेण मानान्तरेण च विरोधस्तत्र महायोगविद्रूढिभ्यां आभिधानिकश्रुतेः बाध एव । यथा यदा तम इति मन्त्रे शिवपदस्याभिधानिकश्रुतिबाधेन महायोगविद्रूढिभ्यां विष्णुपरत्वम् । व्याख्यातमेतत् ॥ १६७ ॥

एतेन 'एको नारायण आसीत्' इत्यादौ नारायणपदेन शिवस्य ग्रहणं किं न स्यादिति निरस्तम्, 'विष्णुर्नारायणः कृष्णः' इत्याभिधानिकश्रुतिबाधात् । न चात्र 'यो देवानां नामधाः,' 'नामानि सर्वाणि यमाविशन्ति' 'ता वा एताः,' 'सर्वे वेदा यत्पदमामनन्ति' इत्यादिश्रुतिसाहित्येन 'रुजं द्रावयते यस्माद्रुद्रस्तस्माज्जनार्दनः' इत्यादिरूपस्य रुद्रादिपदानां आभिधानिकश्रुतिबाधकस्य सद्भाववत् नारायणपदस्य रूढिबाधकं किमपि स्वप्नेऽपि दृश्यते । श्रुत्यादीनां नारायणैकपरत्वस्य साधितत्वात् । तस्माज्जगज्जन्मादिकारणत्वेन अनन्तगुणपूर्णत्वेन सर्वोत्तमत्वेन च श्रुत्यादिप्रतिपादितो भगवान्नारायण एवेति सिद्धम् ॥ १६८ ॥

इति श्रीमत्पदवाक्यप्रमाणविदामग्रेसराणां श्रीमत्सत्य
विजयतीर्थगुरुराजानां निजशिष्येण वर्खेडितिंमणेन
विरचितायां विष्णुतत्वमीमांसायां (दीपिकायां)
श्रुतिपरिच्छेदः समाप्तः ॥

सत्यविजयगुर्वन्तर्गतश्रीरामचन्द्रार्पणमस्तु ॥

॥ ॐ ॥

श्रीरामचन्द्र प्रसन्न ॥

इदानीं स्मृतिविचारः प्रक्रम्यते ।

ननु व्यर्थोऽयं विचारः काकदन्तपरीक्षाग्रन्थवत् । तथाहि— वेदेन हि विष्णोस्सर्वोत्तमत्वे निश्चिते तदनुसारिणां,

'ऋगाद्या भारतं चैव पंचरात्रमथाखिलम् ।
मूलरामायणं चैव पुराणं चैतदात्मकम् ॥
ये चानुयायिनस्त्वेषां सर्वे ते च सदागमाः ।
दुरागमास्तदन्ये ये तैर्न ज्ञेयो जनार्दनः ॥

इत्यादिब्रह्माण्डपुराणवाक्यानुरोधेन सर्वेषां सदागमानामुक्तार्थपरत्वात् । पाशुपताद्यागमानां च दुरागमत्वेन प्रत्यक्षवेदविरुद्धत्वेन चाप्रामाण्यस्य निश्चितत्वात् ॥

पूर्वमीमांसायामपि प्रत्यक्षश्रुतिविरुद्धानां स्मृतीनामप्रामाण्यस्यैव स्वीकाराच्च । 'विरोधे त्वनपेक्षं स्यादसति ह्यनुमानं' इत्यत्र 'औदुम्बरीं स्पृष्ट्वोद्गायेत्' इति श्रुत्या 'औदुम्बरी (वाव) सर्वा वेष्टयितव्या' इति स्मृतेर्विरोधात्प्रामाण्यं अप्रामाण्यं वेति संशये (एतत्स्मृते)स्मृतेरप्यनुमितश्रुतिमूलत्वसंभवात्प्रामाण्यमष्टकादिस्मृतिवदिति पूर्वपक्षे प्राप्ते प्रत्यक्षश्रुतिविरोधे

श्रुत्यनुमानाप्रवृत्तेः वह्निशैत्यानुमानवत् स्मृतिरूपानुमानस्याप्रामाण्यमेव । तस्मादौदुम्बरीस्पर्श एवानुष्ठातव्यः, न तु सर्ववेष्टनमिति सिद्धान्तितम् । तन्न्यायेनेहापि पाशुपतादिस्मृतीनां 'अग्निर्वै देवानामवमो विष्णुः परमः' इत्यादिप्रत्यक्षश्रुतिविरुद्धत्वादप्रामाण्यमेव । आपाततः श्रुत्यन्तरसंस्पर्शोऽपि निरस्त एव । तत्र यद्यपि सर्ववेष्टनस्पर्शयोरनुष्ठानविकल्पसंभवेनात्यन्ताप्रामाण्याभावः संभवति । तथापि प्रकृते वस्तुनि विकल्पासंभवादत्यन्ताप्रामाण्यमेव । तथा च सिद्धविषयत्वात्किमनेन विचारेणेति चेत्— सत्यम् । तथापि भारतादिवाक्यान्युदाहृत्य आपाततः प्रतीतार्थे शब्दाडम्बरं कुर्वतोऽकुशलत्वज्ञापनाय विचारस्य कर्तव्यत्वात् ॥ १६९ ॥

अत्र यदुक्तं परैः– शैवागमैः शिवस्य सर्वोत्तमत्वादिसिद्धिः । न चागमान्तरविरोधः । मात्स्यपुराणे कल्पविशेषे विष्णोः सर्वोत्तमत्वेन ब्रह्मादिसर्जकत्वं, कल्पान्तरे पुनः ब्रह्मणः विष्णुरुद्रादिसर्जकत्वं । एवं कल्पान्तरे रुद्रस्य विष्ण्वादिसर्जकत्वम् । एवं च तत्तद्देवतोत्कर्षप्रतिपादकागमानां तत्तत्कल्पविषयत्वेनाविरोधात् सर्वेषां प्रामाण्यमेव । स्पष्टश्चायमर्थः शिवपुराणे प्रतिपादितः—

त्रयस्ते कारणात्मानो जातास्साक्षान्महेश्वरात् ।
चराचरस्य विश्वस्य सर्गस्थित्यन्तहेतवः ।
पित्रा नियमितास्सर्वे त्रयोऽपि स्वेषु [त्रिषु] कर्मसु ॥
ब्रह्मा सर्गे हरिस्त्राणे रुद्रः संहरणे पुनः ।
तथाप्यन्योन्यमात्सर्यादन्योन्यातिशयार्थिनः ॥

तपसा तोषयित्वा तं पितरं परमेश्वरम् ।
ब्रह्मनारायणौ पूर्वं रुद्रः कल्पान्तरेऽसृजत् ॥

कल्पान्तरे पुनर्ब्रह्मा रुद्रविष्णू जगन्मयः ।
विष्णुश्च भगवान् रुद्रं ब्रह्माणमसृजत्पुनः ॥

तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः ।
तानि तानि प्रणीतानि विद्वानत्र[द्वांस्तत्र]न मुह्यति ॥ इति ।

तस्मादुदाहृतवचनैः ब्रह्मादीनां कल्पभेदेन उत्कर्ष-सिद्धावपि तेषां कारणीभूतस्य परमशिवस्य (सर्वकालेष्वेक-रूपत्व) [सर्वकल्पैकरूपस्य सर्वकारणत्व] व्यवस्थायाः शिव-पुराणादिप्रपंचितायाः चलनाभावादथर्वशिखादिश्रुतिसंस्पर्शेन सांख्यादिस्मृतिभ्यो मन्वादिस्मृतिवत्प्रबलैः शिवपुराणैः तस्य सर्वकारणत्वसिद्धिर्निष्प्रत्यूहा ॥

तथा मानववचनमपि परमशिवस्य सर्वकारणत्वं व्यव-स्थापयति । 'ततः स्वयम्भु[म्भू]र्भगवान्' इत्यादिना पिता-महस्रष्टृत्वेन प्रतिपादितस्य नारायणस्य 'प्रादुरासीत्तमोनुदः' इति तमःप्रेरकात्परमशिवात् प्रादुर्भावोक्तेः । तमोनुद इति पंचम्यन्तम्, न प्रथमान्तम् । पश्चात्प्रादुर्भवतः पूर्वसिद्ध-तमोऽधिष्ठातृत्वायोगात् ॥

तथा बादरायणे(णवचने)न च महाभारते सभापर्वणि भीष्मपर्वणि च,

यत्र भूतपतिस्सृष्ट्वा सर्वलोकान्सनातनः ।
उपास्यते तिग्मतेजाः[वृ]तो भूतैः सहस्रशः ॥

इत्यादिमैनाकोपवर्णनवचनैः,

ईश्वरश्चेतनः कर्ता पुरुषः कारणं शिवः ।
विष्णुर्ब्रह्मा शशी सूर्यः शक्रो देवाश्च सानुगाः [सान्वयाः] ॥

सृज्यते ग्रस्यते चैव तमोभूतमिदं यथा ।
अप्रज्ञातं जगत्सर्वं तदा ह्येको महेश्वरः ॥'

इत्यादिशान्तिपर्ववचनैः,

'स एष भगवानीशः सर्वतत्वादिरव्ययः ।
सर्वतत्वविधानज्ञः प्रधानपुरुषेश्वरः ॥

सोऽसृजद्दक्षिणादङ्गाद्ब्रह्माणं लोकसंभवम् ।
वामपार्श्वे [र्श्वा] त्तथा विष्णुं लोकरक्षार्थमीश्वरः ।
युगान्ते चैव संप्राप्ते रुद्रं प्रभुरथासृजत् ॥'

इत्यानुशासनिकवचनैः,

अहं ब्रह्मा कपिलोऽथाप्यनन्तः
पुत्राः सर्वे ब्रह्मणश्चातिवीराः ।

त्वत्तः सर्वे देवदेव प्रसूता
एवं सर्वेशः कारणात्मा त्वमीड्यः ॥

इत्यादिकृष्णकृतस्तोत्रादिमध्यगतहरिवंशवचनैश्च तस्य सर्वकारणत्वं व्यवस्थापितम् । तस्मात्परमशिव एव परमकारणमिति ॥ १७० ॥

अत्रोच्यते । यत्तावदुक्तं—मात्स्यवचनेन तत्तत्कालभेदेन प्रवृत्तानां पुराणानामविरोध इति, तद्भ्रान्तिकल्पितम् । तथा हि—शिवपुराणे शिवस्यैवोत्कर्षः, सर्वकल्पेष्वपि शिवस्यैव कारणत्वादि नान्यस्येति । एवं शाक्तादीनि प्रतिपादय-

न्तीति त्वत्परिकल्पितमात्स्यवचनं कानि पुराणानि शृण्वन्ति ॥

ननु तथापि शैवागमोक्तस्य चलनं नास्तीत्युक्तमिति चेत् — ओमिति ब्रूमः। तदुक्तस्य परमशिवस्य शशविषाणायमानत्वेन चलनाभावात्। 'न हि नाशोऽसतो भवेत्' इत्युक्तेः। किं च शैवागमोक्तस्य चलनाभावस्त्वद्वचनाद्वा, शैवागमाद्वा, श्रुतिसंस्पर्शाद्वा। नाद्यः, यज्ञदत्तवचनात् ब्राह्मागमोक्तस्यापि चलनाभावप्रसङ्गात्। अकिंचित्करत्वाच्च। अत एव न द्वितीयतृतीयौ, ब्राह्मागमादीनामपि श्रुतिसंस्पर्शसंभवात्। 'हिरण्यगर्भः समवर्तताग्रे' इति ब्राह्मागमस्य, 'पराऽस्य शक्तिर्विविधैव श्रूयते' अस्य प्रपंचस्य जनिका शक्तिरिति शाक्तागमस्य, 'निषुसीद गणपते गणेषु' इति गाणपत्यागमस्यापि आपाततः श्रुतिसंस्पर्शसंभवात्। सम्यक् श्रुतिसंस्पर्शस्य शैवेऽपि श्रुतिपरिच्छेदोक्तरीत्याऽभावात्। तस्मात्समानानेकगाणपत्याद्यागमविरोधेन शैवागमस्य प्रामाण्यानिर्णयात् कथं तेन परमशिवतत्सर्वोत्तमत्वसिद्धिः ॥ १७१ ॥

किं च कथं कल्पभेदेन व्यवस्थापनम्? प्रतिकल्पं प्रलये 'एको नारायण आसीन्न ब्रह्मा न च शंकरः' इति श्रुतेः जागरूकत्वात् प्रतिकल्पं प्रलयेऽपि नारायण एव सिध्यति, नेशान इति शिवस्य निषिद्धत्वात्। न च परमशिवो न निषिद्ध इति वाच्यम्। असतोऽप्रसक्तेर्निषेधस्य वैयर्थ्यात्।

ननु यः प्रलये विद्यमानः जगत्कारणं (णतावान्) स एवास्माकं परमशिव इति चेदोमिति ब्रूमः। 'एको नारायणः'

इत्यादिभिः नारायणस्यैव प्रलयकालेऽवस्थानात् । शैवागमस्याप्येवं तात्पर्यकल्पने सोऽपि वैष्णवागम एव स्यात् । अन्यथा शाक्तादिबह्वागमविरुद्धत्वेनाप्रामाण्यमेव स्यात् । तेषां स्वस्वोक्तार्थे एकैकत्वेऽपि तत्प्रतियोगिकविरोधानां शैवे बहुत्वात् । लोकेऽपि समानानेकविरोधिनो बाधदर्शनाच्च ॥ ॥ १७२ ॥

एवं सति प्रमाणभूतपांचरात्रागमविरोधेन पाशुपतागमानामप्रामाण्यवर्णनं तु मृतमारणम् । न च पंचरात्रस्य प्रामाण्यानिर्णयः । उभयवादिसिद्धप्रमाणभावे महाभारते मोक्षधर्मे,

'सांख्यं योगः पाशुपतं वेदारण्यकमेव च ।
ज्ञानान्येतानि भिन्नानि नात्र कार्या विचारणा ॥'

इत्यनेनागमानां परस्परं विरोधमभिधाय विरुद्धानां प्रामाण्यासंभवात्कस्य प्रामाण्यमित्यपेक्षायां,

पंचरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम् ।
ज्ञानेष्वेतेषु राजेन्द्र सर्वेष्वेतद्विशिष्यते ॥

इति पंचरात्रस्यैव प्रामाण्यमुक्तम् । इतरेषां च भिन्नानां अप्रामाण्यं निर्णीतमेव । न च वेदारण्यकस्याप्यप्रामाण्यापत्तिः । तस्य पंचरात्रसमानार्थकतया विभिन्नत्वाभावात् । अन्यथा विरुद्धानां प्रामाण्यायोगेन वेदाप्रामाण्यं भारताभिमतं स्यात् । वेदानां च अपौरुषेयत्वेन अनाशंकितदोषत्वाच्च । एतेन शैवागमानां श्रुतिसंस्पर्शात् सांख्यादिस्मृतिभ्योऽधिकत्व-

मिति वचनमपहस्तितं भवति । तेषां श्रुतिविरुद्धत्वस्यैव भारताभिप्रेतत्वात् । न च वेदपंचरात्रयोरेकार्थत्वे(न) वेद-प्रामाण्येनैव पंचरात्रप्रामाण्यसंभवात्पुनः पंचरात्रप्रामाण्यप्रति-पादनं व्यर्थमिति वाच्यम् । (यतः) वेदप्रामाण्यकथनमात्रेण न पंचरात्रप्रामाण्यं झडिति सिध्यति । अतः पंचरात्रस्यैव प्रामाण्यमुक्तम् ॥ १७३ ॥

अनेन सर्ववेदानां आरण्यकभागानां च व्याख्यान-भूतपंचरात्रानुसारेण विष्णोः सर्वोत्तमत्वमेव भारताभिप्रेत-मिति सुनिर्णीतमेव । तेन भारते परमशिवस्य तत्र तत्र कारण-त्वं प्रतिपाद्यत इति वचनं पाशुपतागमस्य कण्ठतः अप्रामाण्य-प्रतिपादकेन भारतेनैवापहस्तितं भवति ॥ १७४ ॥

किं च न भारते आपाततोऽपि परमशिवकारणत्वासिद्धिः । सभापर्वणीत्याद्युदाहृतवचनेषु (ये) भूतपत्यादिशब्दाः श्रूयन्ते, ते विष्णुवाचका एव । 'ईश्वरश्चेतनः कर्ता' इत्यादौ ईश्वरादिशब्दाः विद्वद्रूढ्या भगवदेकवाचकाः, 'यो देवानां नामधा एक एव' इति श्रुत्यैव साधितत्वात् । न च 'वाम-पार्श्वात्तथा विष्णुः' इति विष्णोः सृष्ट्यनुपपत्तिरिति वाच्यम् । मूलरूपादवतारसंभवात् । तत्र च मानुषकर्मप्रदर्शनसंभवाच्च । तच्चोक्तमेव । न च तावन्मात्रेण अप्रामाणिकोऽर्थः सिध्यति । अथवा 'यत्र ह क्व च पुत्रस्य तत्पितुर्यत्पितुस्तद्वा पुत्रस्य' इति पुत्रनाम्ना पितुः ग्रहणं, पितृनाम्ना ग्रहणं पुत्रस्य इति ऐतरेयोपनिषद्युक्तरीत्या विष्णोः परमप्रीतिपात्रपुत्रत्वेन वायो-र्विष्णुपदेन ग्रहणसंभवात् इत्युक्तत्वादिति दिक् ॥ १७५ ॥

एतेन मानववचनं व्याख्यातम् । तमोनुद इति पञ्चमीपक्षे मूलरूपात्प्रादुर्भावः । प्रथमान्तत्वपक्षे अव्यक्तः तमःप्रेरकः व्यक्तोऽभूत् इति । तस्मादप्रामाणिक एव विष्णुव्यतिरिक्तः परमशिवः । अन्यथा भारतवत् द्राविडप्रबन्धस्यापि ईश्वरेशानादिपदवतः कार्त्स्न्येन शिवपरत्वं कुतो नाङ्गीकुर्याः ? ॥ १७६ ॥

वस्तुतो भारतमत्यन्तं शैवागमविरुद्धं शैवागमान पूर्वोक्तरीत्या आदावप्रामाण्यं साधयति । तत्र तत्र श्रीकृष्णकर्तृकं नमस्कारस्तवनाभ्यां शिवादिपूजनं मानुषकर्मप्रदर्शनमात्र न तावता शैवैः संतोष्टव्यमिति ज्ञापयितुं तत्र तत्र नमस्कारस्तवनाभ्यां ब्राह्मणादिपूजनं स्वजनपूजनं कुन्तीप्रभृतिस्त्रीजनपूज मित्यादिकर्मप्रदर्शनेनाभाससाधारण्यं प्रतिपादयति । त बाणासुरयुद्धेषु पारिजातहरणयुद्धेषु च श्रीकृष्णेन ताडितः शि पलायित इति भारतं किं न जानासि । एवं सर्वं जानन् (कृष्ण)कृ पूजनमात्रेण शिवस्य सर्वोत्तमत्वं वक्तुं कथं न लज्जसे ॥ १७७

अत्रार्थे भागवतमपि संवादि । तथा हि—भागव दशमस्कन्धे षट्षष्टितमाध्याये उत्तरार्धे—

'तत उद्यम्य निशितं खड्गं पन्नगभूषणः ।
कृष्णमभ्यद्रवत्संख्ये पार्ष्णिभ्यां चोदयन्वृषम् ॥

तूर्णं गृहीत्वा पाणिभ्यां विषाणे तस्य नन्दिनः ।
रुद्रं शूलपाणिं चिक्षेप वैनतेयो धनुश्शतम् ॥

ततो विसृज्य संग्रामं त्रिशूली वृषवाहनः ।
प्रमथैः सहितः प्रायात्कुरुश्रेष्ठ यथागतम् ॥'

अस्यार्थः—पन्नगभूषणः = नागभूषणः । संख्ये = युद्धे । वृषं = वृषभं । वैनतेयः = गरुडः । शूलपाणिः शिवः तत्सहितं कन्दुकवत् नंदिनं चिक्षेप ॥

ततः (त्रिशूली) युद्धं परित्यज्य आगतमार्गेण गतः । कुरुश्रेष्ठेति परीक्षितः संबुद्धिः इति ॥ १७८ ॥

आदित्यपुराणे—

'तस्यैव मूर्तयास्तिस्रो ब्रह्मविष्णुमहेश्वराः ।
सर्वासामधिकस्त्वात्मा शूलपाणिरिति श्रुतिः ॥'

इति भवतोक्तस्य [अपि] ईदृशी गतिः ॥

तदुत्तरत्र वसिष्ठविश्वामित्राद्यागमनानन्तरम्,

'तान्दृष्ट्वा सहसोत्थाय प्रागासीना नृपादयः ।
पाण्डवाः कृष्णरामौ च प्रणेमुर्लोकवन्दितान् ॥

तानानर्चुर्यथा सर्वे सहरामोऽच्युतोऽर्चयत् ।
स्वागतासनपाद्यार्घ्यमाल्यधूपानुलेपनैः ॥

उवाच सुखमासीनान् भगवान्धर्मगुप्तनुः ।
सदसस्तस्य महतः यतवाचोऽनुश्रृण्वतः ॥'

श्रीकृष्ण उवाच—

'अहो वयं जन्मभृतो लब्धं कात्स्न्र्येन तत्फलम् ।
देवानामपि दुष्प्रापं यद्योगेश्वरदर्शनम् ॥'

इत्यादिना अतिशयेन स्तोत्रं चकार । तदनन्तरं ते ऋषय एवमूचुः—

'जनसंग्रहमित्यूचुः स्मयन्तस्तं जगद्गुरुम् ।'

इत्यादि । तान् आनर्चुः = पूजां चक्रुः । स्मयन्तः = आश्चर्यं कुर्वन्तः ॥ १७९ ॥

तथा वाल्मीकिरामायणे बालकाण्डे पंचसप्ततितमसर्गे-

'तदा तु देवताः सर्वाः पृच्छन्ति स्म पितामहम् ।
शितिकण्ठस्य विष्णोश्च बलाबलनिरीक्षया ॥

अभिप्रायं तु विज्ञाय देवतानां पितामहः ।
विरोधं जनयामास तयोः सत्यवतां वरः ॥

विरोधे च महद्युद्धमभवद्रोमहर्षणम् ।
शितिकण्ठस्य विष्णोश्च परस्परजिगी(जयै)षिणोः ॥

तदा [तु] विजृंभितं शैवं धनुर्भीमपराक्रमम् ।
हुंकारेण महादेवः स्तंभितोऽथ त्रिलोचनः ॥

देवैस्तदा समागम्य सर्षिसंघैः सचारणैः ।
याचितौ प्रशमं तत्र जग्मतुस्तौ सुरोत्तमौ ॥

जृंभितं तद्धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः ।
अधिकं मेनिरे विष्णुं देवाः सर्षिगणास्तदा ॥'

इत्यादिना अतिशयेन विष्णुपराक्रम एवोक्तः ॥

अथ तत्र कृष्णेन अन्यः शिवस्ताडितः न परमशिव इति चेत्, तर्हि अन्येनैव कृष्णेन रुद्रः पूजितः, न परमकृष्णेन। तथा रुद्रप्रसादादेव पाण्डवानां जय इति तद्वाक्ये अन्यपाण्डवानामेव, न परमपाण्डवानाम् । तेषां विष्णुप्रसादादेव जय इति स्यात् । कृष्णद्वैविध्ये पाण्डवद्वैविध्ये च मानाभावादिति चेत्, समं शिवद्वैविध्ये ॥ १८० ॥

किं बहुना? 'भारतं सर्वशास्त्रेषु भारते गीतिका वरा' इति वचनात् भारतसारभूतगीतायां तेनैव कृष्णेन,

'सर्वस्य चाहं हृदि संनिविष्टो मत्तस्स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥'

इति स्वस्यैव सर्वान्तर्यामित्वं सर्ववेदार्थत्वं, तज्ज्ञत्वं चोच्यते, का वार्ता शिवस्येति । अनेन वेदवेदान्तभारतादीनां अर्थपरिज्ञानं साकल्येन शिवादीनां नास्तीत्युक्तं भवति । अनन्तरं स्वस्यैव सर्वोत्तमत्वमुच्यते—

'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥

यो मामेवमसंमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ॥

इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ ।
एतद् बुद्ध्वा बुद्धिमान्स्यात् कृतकृत्यश्च भारत ॥'

इति । लोके श्रुत्यादिष्ववलोकने । कूटस्थो लक्ष्मीः । स क इत्यपेक्षायां अहमेवेत्याह— यस्मादिति । असंमूढः संमोहवर्जितः । स सर्ववित्, अस्यैव सर्वशास्त्रार्थत्वात् । सर्वभावेन = सर्वप्रकारेण । बुद्ध्वा = परोक्षतो ज्ञात्वा । बुद्धिमान् =

अपरोक्षज्ञानी स्यात् । कृतकृत्यश्च-मुक्तो भवति । एतेन भारतस्य अतिविस्तृतत्वादतिगहनार्थत्वाच्च देवानामप्यर्थ-बोधो दुर्लभः, किमु मनुष्याणामिति ज्ञापयितुं संकोचग्रन्थेन अर्जुनोपदेशः कृत इति ध्वनयति ॥ १८१ ॥

यदप्युक्तम्—कृष्णस्य बहुधा सर्वकारणत्वादिकं प्रति-पादयन्त्या गीतायाश्च शिवविषयत्वं कूर्मपुराणे पार्थं प्रति—

'ज्ञानं तदैश्वरं दिव्यं यथावद्विदितं [त्व]मया ।
स्वयमेव हृषीकेशः प्रीत्योवाच सनातनः ॥

गच्छ गच्छ स्वकं स्थानं न शोकं कर्तुमर्हसि ।
भजस्व परया भक्त्या [शरण्यं] शरणं परमं शिवम् ॥'

इति तस्य ईश्वरविषयत्वं [ऐश्वरं ज्ञानं] वर्णयद्व्यासवाक्य-मित्यादिवचनं [तत् अ] बुद्धिमतामेव शोभते । कृष्णस्य कारण-त्वादिकमिति गीतार्थोऽनूदितः । स किं सामान्यार्थः? कूर्म-पुराणे च परमं शिवं [शरणं शिवं] इति पदद्वयं विशेषार्थं? [ॐ मिति चेन्न) 'स ब्रह्म स हरिः स शिवः' इति वाक्यस्य भग-वत्परत्वस्योक्तत्वात् । ततश्च विपरीतमेव सामान्यविशेषभाव-वर्णनम् ॥

अस्तु वाऽत्र शिवपदस्य रुद्रपरत्वम् । तावता गीता-र्थत्वं कुतः? । न हि गुरुं भजस्वेत्युक्ते (स) गीतार्थो भवति । नाप्यर्जुनं प्रति कूर्मपुराणोपदेशः, गीतोपदेशानन्तरं 'नष्टो मोहः स्मृतिर्लब्धा' इत्यर्जुनवचनात् तस्य शोकाभावात् । किं तु परमशैवं प्रति व्यासवचनं । हृषीकेशः कृष्णः प्रीत्या अर्जुनं प्रति यदुवाच, तत् ज्ञात्वा मया गीता निर्मिता । अत

एव सकलश्रुतिस्मृतिनिर्णयरूपा सा च भगवदेकविषया। अतस्त्वदभिमतपरमशिवे प्रमाणाभा[वात् शोको](वमुक्तं शोकं) मास्त्वित्याह— गच्छेति। शिवं भजस्व संतुष्टः स्वभक्तपिशाचगणे अवस्थानं करिष्यतीति। प्रत्युत 'यो देवानां नामधा एक एव,' नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति' इत्यादिश्रुतिभिः शैवागमानां विशेषतो विष्णौ पर्यवसानं दर्शितम्। तेषां विष्ण्वाज्ञया महद्भिः प्रणीतानां मोहकत्वेन स्वार्थेऽप्रामाण्येऽपि अन्तर्यामिणि विष्णौ पर्यवसाने प्रामाण्यमेवेति यत्किंचिदेतदिति संक्षेपः। तस्माद्विष्णोरेव श्रुतिमूलस्मृतिभिः सकलजगज्जन्मादिकारणत्वेन सर्वशब्दाभिधेयत्वेन महातात्पर्येण प्रतिपाद्यत्वात् स एव सर्वोत्तम इति सिद्धम् ॥ १८२ ॥

इति श्रीमत्पदवाक्यप्रमाणविदामग्रेसराणां श्रीमत्सत्यविजयतीर्थगुरुराजानां निजशिष्येण वखेंडितिमणेन विरचितायां विष्णुतत्त्वमीमांसायां (दीपिकायां)

स्मृतिपरिच्छेदः समाप्तः॥

सत्यविजयगुर्वन्तर्गतश्रीरामचन्द्रार्पणमस्तु॥

|| ॐ ||

श्रीरामचन्द्र प्रसन्न ||

इदानीं युक्तिविचारः क्रियते । शैवागमोक्तः परमशिवोत्कर्षः सत्यो मिथ्या वा । नाद्यः, जगत्सत्यताऽऽपत्तेः । तत्सत्यतासापेक्षत्वात्सर्वोत्कर्षसत्यत्वस्य । उत्कर्षस्य सत्यत्वे अनन्तविरुद्धधर्माधिकरणत्वस्य जीवेश्वरयोः सत्यत्वेनाभेदवार्तायाः भवद्रीत्यैव शशविषाणायमानताऽऽपातात् । सत्यस्यात्मवत् नित्यत्वाद्भेदकधर्माणां भेदस्य च भवत्पक्षे नित्यत्वापत्तेश्च । तत्र तत्र शिवाभेदप्रतिपादनेन स्वव्याहतेश्च । शंकराचार्यमतस्य स्वेनैव दूषितत्वाच्च || १८३ ||

केचित्तु शैवागमसिद्धोत्कर्षस्य सत्यत्वमेव । न तु तावता जगत्सत्यतापत्तिः, इष्टत्वात् । तत्र शिवसायुज्योक्तिस्तु भवत्पक्षे विष्णुसायुज्यवत्संयोगपरत्वादिति वदन्ति । तन्न, 'अग्निर्वै देवानामवमः विष्णुः परमः' इत्यादिश्रुतिविरुद्धत्वेन शैवागमानामप्रामाण्यस्यैव निपुणतरं साधितत्वेन तत्सिद्धोत्कर्षस्य गगनकुसुमायमानत्वात्, श्रुत्या विष्णोरेव परमशिवत्वोक्तेश्च || १८४ ||

न द्वितीयः, शैवागमोक्तशिवोत्कर्षस्य बाध्यत्वे शैवागमानां भवतैवाप्रामाण्याङ्गीकाराऽऽपत्तेः । बाधितार्थप्रति-

पादकत्वातिरिक्तस्याप्रामाण्यस्य चार्वाकादिशास्त्रेऽभावात् । शैवागमोक्तस्य परमशिवोत्कर्षस्य कालत्रयेऽपि चलनं नास्तीति स्ववाक्यव्याहतेश्च । अन्येषां सर्वेषां अप्रमाणत्वेन संमतस्य शैवागमस्य परमशैवेन भवताप्यप्रामाण्याङ्गीकारे तत्सिद्धस्य च सोत्कर्षस्य परमशिवस्य नरविषाणायमानता स्यात् ॥ १८५ ॥

अपि च परमशिवस्योत्कर्षो बाध्यश्चेत्तन्निवृत्त्या भाव्यम् । तन्निवृत्तिश्च ज्ञानेनैव भवदभिमता । तन्निवारकं ज्ञानं परमशिवस्य सदा अस्ति? उत नास्ति? आद्ये सदा तन्निवृत्त्यापत्त्या न कदाचिदपि परमशिवोत्कर्षसत्त्वम् । किं च न तावत्परमशिवस्योत्कर्षप्रतिभासः । सदा तन्निवर्तकविशेषज्ञानसद्भावात् । न हि नेदं रजतमिति ज्ञानसद्भावे इदं रजतमिति ज्ञानमस्ति । तथा चोत्कर्षनिवारकपरमशिवज्ञानस्यात्यन्ताबाध्यत्वेन श्रुत्याद्यनुसारित्वेन च तदभाव एव सिध्यति । नापि शैवानां तत्प्रतिभासः, शैवैस्तस्य बाध्यत्वस्य निश्चितत्वात् । न हि शुक्तिरजतं बाध्यमिति निश्चयानन्तरमिदं रजतमिति कस्यचिदपि प्रतिभासोऽस्ति, नेदं रजतमिति ज्ञानरूपत्वाद्बाधस्य । तस्मात्परमशिवोत्कर्षप्रतिभास एव भवद्रीत्यैव दुर्लभतरः ॥ १८६ ॥

न द्वितीयः । परमशिवस्य स्वोत्कर्षनिवर्तकज्ञानाभावे तत्त्वज्ञानाभावेन परमाज्ञत्वापत्तिः । उत्तरत्र भविष्यतीति चेत्—किं तस्यैव कालान्तरे तज्ज्ञानं उत शैवानाम्? नाद्यः । स्वोत्कर्षभ्रान्त्या महोन्मत्तस्य परमशिवस्य प्रबलतराशिक्षकाभावे देवदत्तवन्निवृत्त्यादौ प्रवृत्त्ययोगात् । परमशिवस्य

दृढतरभ्रान्तत्वांगीकारापत्तेश्च । न द्वितीयः । यतः परमशिवस्य स्वतन्त्रत्वेन तदुत्कर्षनिवृत्तौ यतमानानां स्वाधीनानां शैवानां घातकत्वमेव स्यात् राजादिवत् । शैवानां परमशिवोत्कर्षनिवर्तकवेदादिजनितविज्ञानेन कदाचित् तदीयभ्रान्तिनिवृत्तावपि कालत्रयेऽपि परमशिवभ्रान्तिनिवृत्त्ययोगात् । समानाधिकरणज्ञाननिवर्तनीयत्वात् भ्रान्तेः ॥ १८७ ॥

अपि च परमशिवस्य मिथ्याभूतस्वोत्कर्षभ्रान्तिरूपबन्धमोक्षोऽस्ति वा न वा? नाद्यः । तस्याधिकारिवर्गप्रविष्टत्वेन (त्वापत्त्या) परमशिवत्वव्याघातात् । स्वापेक्षयाऽप्यधिकगुर्वाद्युपदेशादिना ज्ञानोत्पादस्य वक्तव्यत्वात् । तस्य च भवताऽनंगीकारात् । तथा च तस्य तत्वज्ञानशून्यत्वान्न मोक्षः (स्यात्) ॥

ननु परमशिवः नित्यमुक्तः सर्वदा तत्वज्ञानीति चेत्— कथं तर्हि देवदत्तवन्मिथ्याभूतं स्वोत्कर्षं जानाति? शैवा एव सर्वोत्कर्षं जानन्ति, न शिव इति चेत्— कथं तस्य सर्वोत्कृष्टत्वम्? तेनैवाज्ञायमानत्वात् । तथात्वे स्वस्वरूपं अपकृष्टं स जानातीति वाच्यम् । तथा च तज्ज्ञानस्याबाध्यत्वात्तदेव सत्यम् (स्यात्) । न द्वितीयः, परमशिवस्य बन्धान्मुक्त्यभावे सर्वदा भ्रान्त्यवस्थयैवावस्थानेन उन्मत्तचार्वाकादिवत् यमवश्यताऽऽपद्येतेति परमत्वव्याघातात् । एतेन शङ्कराचार्यमते ईश्वरस्य मुक्तिर्व्याख्याता भवति ॥ १८८ ॥

किं च, परमशिवोत्कर्षस्य बाध्यत्वे बाधकं वेदादिजनितविज्ञानं वा शैवागमजनितविज्ञानं वा? नाद्यः । तस्य पर-

मोत्कर्ष(मशिवोत्कर्ष)बाधकत्वेऽस्मदभिमतस्यैव 'अग्निर्वै देवानामवमो विष्णुः परमः' इति ज्ञानस्य भवतैवाङ्गीकारात् (कर्तव्यताऽऽपत्तेः)। विष्णवधीनोत्कर्षस्य प्रत्युत पूर्वोक्तरीत्या तत्साधकत्वाच्च। न द्वितीयः। शैवागमानां तदुत्कर्षज्ञानार्थमेव प्रवृत्तत्वेन तद्विरुद्धार्थत्वायोगाच्च ॥ १८९ ॥

ननु शैवागमानामेवैवं तात्पर्यं भूयः प्रतीयते। [तत्र हि] परमशिवोत्कर्षं प्रतिपाद्य भक्त्यादिभिस्तदुपासकानां तादात्म्यं प्रतिपाद्यते। न हि धर्ममिथ्यात्वं विना तादात्म्यं संभवति। एवं च शैवागमैरेव महातात्पर्यतः विरुद्धमेव प्रतिपाद्यते। अतो नास्माकमपराध इति चेत्, तर्हि शैवागमा एव परस्परव्याघातेनैवोन्मत्तवाक्यवदप्रमाणभूता इति भवत्संमता एव (स्युः)। अतः किं तन्निराकरणेन पिष्टपेषणेनेति संक्षेपः। तन्निराकरणाय अस्मदादिप्रयत्नस्तु न्यायकथनद्वारा ईश्वरप्रीत्यै सज्जनप्रीत्यै च भविष्यति ॥ १९० ॥

स्यादेतत् शैवागमानां इत्थं तात्पर्यम्। परमशिवोत्कर्षः व्यावहारिकः। सर्वं जगच्च तादृगेव, अतो भेदनिवृत्त्या शिवसायुज्यं परमभक्तानामिति चेत्—न।

व्यावहारिकं अत्यन्ताबाध्यं बाध्यं वेति पूर्वोक्तदोषगणापरिहारात्। न च शिवोत्कर्षः इदानीं सत्यत्वादबाध्योऽपि कालान्तरे बाध्य इति व्यावहारिकः इत्युच्यत इति वाच्यम्। इदानीमत्यन्ताबाध्यः किं शैवानामेव उत सर्वेषां। नाद्यः। शैवानामेवात्यंताबाध्यत्वमात्रेण (तस्य) व्यावहारि-

कत्वे चार्वाकाणामेवात्यंताबाध्यत्वेन संमतस्य धर्माद्यभावस्य भवत्पक्षे व्यावहारिकत्वाऽऽपत्तेः । बहुतरकालानुवृत्तभ्रमस्य कस्यचिदंते बाधेऽपि तत्पूर्वं शुक्तिरजतस्यापि व्यावहारिकताऽऽपत्तेश्च । कालान्तरे बाध्यस्येदानीमपि यत्किंचित्पुरुषबाध्यत्वनियमाच्च । अत्यंताबाध्यत्वस्य कालत्रयाबाध्यत्वरूपत्वाच्च । न द्वितीयः । 'अग्निर्वै देवानामवमो विष्णुः परमः' इति श्रुत्या सर्वेषामपि शिवोत्कर्षबाधदर्शनादित्येवमनन्तदोषदुष्टत्वादिति दिक् ॥ १९१ ॥

अनेन सूचितान्यनुमानानि—विमतः परमशिवः तदुत्कर्षो वाऽत्यन्तासन्। स्वव्याहतशास्त्रपरमतात्पर्यविषयत्वात्। चार्वाकशास्त्रविषयधर्माद्यभाववत । शैवागमो वा न प्रमाणं स्वव्याहतत्वात् । वेदादिविरुद्धत्वाद्वा । चार्वाकादिशास्त्रवत । विमतः अचेतनः अप्रामाणिकत्वात शशविषाणवत । विमतः न सर्वोत्तमः न जगत्कारणं वा अचेतनत्वात् घटवत् । शिवः आदिसृष्टौ न कस्यचिज्जनकः प्रलये असत्त्वात । देवदत्तवत । शिवः प्रलयेऽसन् । नेशान इति प्रलये सत्त्वनिषेधविषयत्वात् । य एवं स एवम् । यथा घटः । शिवः विष्णुदासः तदाराधनेन प्राप्तस्वपदत्वात् । यथा देवदत्तः । न चासिद्धिः । 'अस्य देवस्य' इति मन्त्रवर्णस्योदाहृतत्वात् , रुद्रो ध्याता [ध्याता रुद्रः] इति श्रुतेश्च । विमतं जगन्न रुद्रजन्यम् । परब्रह्मजन्यत्वात् । [न चासिद्धिः] 'यतो वा इमानि' इति श्रुतेः । शिवः न परब्रह्म तदुपासकत्वात् । यथा देवदत्तः । [न चासिद्धिः] 'ऊर्ध्वरेतं विरूपाक्षम्' इति श्रुतेः । शिवः न स्वतन्त्रः लक्ष्मी-

नियम्यत्वात् । [न चासिद्धिः] 'यं कामये तं तमुग्रं कृणोमि' इति श्रुतेः । शिवः शैवद्वेषी स्वाभिन्नत्वेन तैरुपासितत्वात्, मिथ्योत्कर्षत्वेनोपासितत्वाद्वा । राजादिवत् । [शैवानां] स्वस्वामिविष्णुद्वेषित्वाद्वा । सच्छिष्यवत् । शैवाः शिवद्वेषिणः । निर्निमित्ततत्स्वरूपतदुत्कर्षाभिलाषित्वात् संमतवदित्येवमादीन्यनन्तानि ॥ १९२ ॥

विष्णुः सर्वोत्तमः जगत्कारणत्वात् । य एवं स एवं यथा पिता पुत्रात् । नारायणः जगत्कारणं तत्पूर्वं प्रलये नियमेन सत्त्वात् । संमतवत् । श्रुत्यादिभिर्जगत्कारणत्वेनोक्तत्वाद्वा । नारायणः जगत्कारणं परब्रह्मत्वात् । सर्वशब्दवाच्यत्वाद्वा । यो यत्कारणवचनप्रमाणप्रतिपाद्यः स तत्कारणं यथा संमतः । जगद्वा नारायणजन्यं कारणान्तराभावे सति जन्यत्वात् यथा संमतः । न चासिद्धिः । प्रलये कस्याप्यन्यस्याभावात् । ब्रह्मरुद्रौ विष्णुपुत्रौ तत्पत्नीलक्ष्मीपुत्रत्वात् । संमतवत् । न चासिद्धिः । 'यं कामये' इति श्रुतेः । सर्वे वैष्णवाः स्वस्वयोग्यपुरुषार्थभागिनः सत्यभूतस्वाम्युत्कर्षोपासकत्वात् संमतवत् । विष्णुर्वा स्वभक्तानुग्राहकः । स्वस्वामित्वेन (तेषां) सदोपास्यत्वात् । संमतवत् । विष्णोर्महिमा पारमार्थिकः अत्यंताबाध्यत्वात् । जगत्पारमार्थिकं अत्यंताबाध्यत्वात् (ब्रह्मवत्) । न त्वासिद्धिः । भवदभिमतबाधकस्य शशविषाणतुल्यत्वस्य संक्षेपेण स्थापितत्वात् । इत्येवमाद्यनन्तानां पूर्वोक्तश्रुतिस्मृतिमूलानामतिप्रबलानामनुमानानां सत्त्वान्न क्वापि दोषशंकेति दिक् ॥ १९३ ॥

तस्मात् बाधकगंधाभावात्सकलश्रुतिस्मृतिभिः युक्तिभिश्च विष्णोरेव सर्वोत्तमत्वमिति सिद्धम् ॥ १९४ ॥

इति श्रीमत्पदवाक्यप्रमाणविदामग्रेसराणां श्रीमत्सत्य-
विजयतीर्थश्रीमच्चरणानां निजशिष्येण वखोंडितिंमणेन
विरचितायां विष्णुतत्वदीपिकायां (मीमांसायां)
युक्तिपरिच्छेदः समाप्तः ॥

समाप्तोऽयं ग्रन्थः । श्रीरामचन्द्रार्पणमस्तु ॥

॥ श्रीः ॥

॥ श्रीविष्णुतत्त्वदीपिकायाः शुद्धाशुद्धपत्रिका ॥

पुटं	पङ्क्तिः	अशुद्धम्	शुद्धम्
5	1	सत्यं	(सत्येन)
,,	2	सत्येन	(सत्यम्)
,,	,,	धर्मं धर्मेण	(धर्मेण धर्मं)
6	16	तदानीं तम	तदानीं 'तम'
8	22	तनुः	तनूः
12	5	आपो वा ऋत्विय	(अपो वा ऋत्व्य)
13	4	सोमाधि	सोमप्रत्यधि
20	12	यत्र भूतपतिः	(स्रष्टा भूतपति)
,,	13	सृष्ट्वा सर्वलोकान् सनातनः । उपास्यते तिग्मतेजा वृतो भूतैः	(यत्र सर्वलोकान् सनातनान् । उपास्यते तिग्मतेजा यत्र भूतैः)
,,	14	सहस्रशः	(समन्ततः)
,,	16	सृज्यते ग्रस्यते चैव	सृजते ग्रसते चैतत्
,,	17	वानीशः सर्वतत्वादि	(वान् देवः सर्वसत्त्वादि)
,,	18	षेश्वरः । सोऽसृज	(षः परः । योऽसृज)
22	13	तत्सिध्यर्थं	(तत्त्वासिध्यर्थं)
25	9	अन्तः समुद्र	अन्तः समुद्रे
26	8	संहरति	(संह्रियते)
,,	18	रप्स्वन्तः	रप्स्व १ न्तः
27	21	ष्टापत्तेः	ष्टापत्तेः ॥ ३८ ॥

28	7	नेशानो	नेशानो (नापा)
30	10	अमूल्यमनाधारा इमाः	अमूलमनाधारमिमाः
,,	,,	प्रजा जायन्ते ' ' दिव्यो	प्रजाः प्रजायन्ते दिव्यो
31	2	४९	४५
33	1	मृास्य	मृत्या
37	3	न स्यात् ॥	न स्यात् ॥ ५३ ॥
,,	5	सत्व	सत्त्व
,,	6	निषधा	निषेधा
38	17	अहं नाम	अहंनामा
40	17	परास्तम्	परास्तम् ॥ ५९ ॥
,,	23	वाच्यम्	वाच्यम् । (विकल्पासहत्वात् तथाहि)
45	4	परतया	परतया वा
51	10	दद्दष्टार्थत्वात्	दृष्टार्थत्वात्
52	7	शम्रो	शंरो
54	4	सुरेशाद्याः	सुराद्याश्च
,,	15	प्रपंचनेन	प्रपञ्चेन
56	4	किंऽच	किञ्च
,,	10	द्विराध	द्विरोध
57	15	मुख्यभृत्त्या	मुख्यवृत्त्या
60	15	पुंव्यक्ति	पुंव्यक्ति
64	12	नामसा	नामस
65	11	त्वदत्ता	त्वद्दत्ता
66	13	स्त्रीप्रायाम	स्त्रीप्रायमि
,,	16	लिङ्गा	लिङ्गा

67	18	रूप	समर्पक
,,	19	रूप	समर्पक
72	24	भूया।द्वि	भूयाद्वि
76	12	क.रणा	कारणा
79	20	न्नयण	न्नारायण
80	21	इत्युक्तेः	इत्युक्तिः
83	2	परत्वाानि	(परत्वस्य अनि)
,,	12	स ब्रह्म	स ब्रह्म स शिवः
85	13	भावतुल्य	भाव(वर्णन)तुल्य
86	9	यदुक्तम्	(तथा हि) यदुक्तम्
95	18	सी	सीत्
,,	21	तद्धयेक	तद्वैक
96	4	मूर्तामूर्त्त	मूर्तामूर्ते
98	5	रुद्रः सर्वः	सर्वो वै रुद्रः
100	1	ग्रहणार्थे	(ग्रहार्थे) ग्रहणार्थे
110	3	सृज्यते ग्रस्यते चैव	सृजते ग्रसते चैतत्
,,	4	तदा	(यदा)
,,	6	तत्वा	(सत्त्वा)
,,	12	कापिलोऽथा	(कापिलो यो)
118	15	स हरिः स शिवः	(स शिवः स हरिः)